- Title – प्रायश्चित्त मयूख (पृष्ठ 15 के 9वीं पंक्ति)
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 69/138
- Lines-
- Size
- Substance Paper –
- Script Devanagari देवनागरी
- Language – संस्कृत
- Period –
- Beginning – विवेकतास्तु त्पादि आर्जना पर्वत प्रदक्षिणा-वदपते पकृतौ देवलः।
- End – यत्तुमंतः अश्वग्रीवामेद तस्त प्रकृष्टमिति तत्रमतो-त्पताभ्यासे।
- Colophon-
- Illustrations -
- Source -
- Subject - धर्मशास्त्र
- Revisor -
- Author - भट्ट नीलकण्ठ

1. Remarks- अपूर्ण, 1-8, 24, 27-28, 30-31, 49-50, 54, 64, 81, 87-88, 90-91, 93-94, अनुपलब्ध

धनीर/प्रवीण/

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विवेक्तारस्तस्मात्प्रार्थनापर्षत्प्रदक्षिणाद्युक्तमनेपद्धतौ देवलः पापकृत्स्वकृतं पापं कृत्स्नमाख्याय संसदि न
श्मश्रुमानेन याचेत निष्कृतिं तत्स्वकर्मणः अङ्गिराः कृत्वा पापं न भुञ्जीत त्रिरात्रमहरेव वा कुर्याद्ब्राह्मणाश्च प्र
णामान्प्रदानाद्युत्तमस्तत एतच्च पर्षदुपस्थानं प्रकाशप्रायश्चित्तेष्वेव न रहस्ये विख्यातदोषः कुर्वीत पर्षदो
नुमतं व्रतं अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेत् इति याज्ञवल्क्योक्तेः प्रकाशेऽपि पर्षदसंभवे स्वयमे
व कुर्यात् मनुः मतिपूर्वमनुद्दिश्य प्रमाणातिक्रमितिस्थितिः मतिपूर्वमयं च यत्प्रमाणार्थे पृच्छतीति ज्ञात्वा अं
गिराः ततस्ते प्रणिपातेन दृष्ट्वा तं समुपस्थितं किं ते कार्यं वदास्माभिः किं वान्वेषयसे द्विज तत्त्वतो ब्रूहि
तत्सर्वं सत्यं हि गतिरात्मनः यदि चेदिह सर्वेषां संनियतं प्राप्य सेप्सुभं यथागतोऽस्य सत्येन त्वं प्रबुद्धोऽसि कर्हिचि
त् एवं तैः समनुज्ञातः सर्वं ब्रूयाद्यथातथं विश्वामित्रः जातिशक्तिगुणापेक्षं सकृद्बुद्धिकृतं तथा अनुबन्धा
दि विज्ञाय प्रायश्चित्तं प्रकल्पयेत् उपदेशश्च पर्षदन्तर्गतेन पर्षत्सम्मत्या केन चित्कर्तव्यः तथा चाङ्गि
राः आहूय श्रावयेदेकः पर्षदा यो नियोजितः उपदेशप्रवृत्तिः कार्या इति मदनः पितामहवरणाश्च स ए
व ब्राह्मणो ब्राह्मणानां तु क्षत्रियाणां पुरोहितः वैश्यानां याजकश्चैव प्रायश्चित्तं समादिशेत् अङ्गिराः
क्षत्रियाणां यो वैश्यानां याजकः प्रायश्चित्तं समादिश्य नमस्कृत्य व्रतं चरेत् स एव तथा शूद्रं समास्मा
घस्तद्धर्मप्रसक्तं प्रायश्चित्तं प्रदानकृत्यं जपहोमविवर्जितं जपहोमौ चाङ्गप्रधानरूपावविशेषाच्च पर्षदन्तर्ग

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्योपदेशकर्त्तैः प्रायश्चित्तमाह हारीतः प्रायश्चित्तं तु निर्दिष्टं यत्कार्यं पापात्प्रमुच्यते यस्य चित्तं विजानीयाज्जपेद्धावे
स्मात्तरं अंगिराः वचः पूर्वमुदाहार्यमयमोत्त्मं धर्मवर्त्तृभिः पश्चात्कार्यांतु सारेण पश्चात्कुर्यादनुग्रहं वचः प्राय
श्चित्तविधायकं अनुग्रहः प्रायश्चित्तमन्यतमा पापादिः कुर्वतेनुग्रहः कार्यं तथैव शिष्यवृद्धयोः अतोन्यथा
भवेद्दोषस्तस्माद्यानुग्रहो भवेत् देवलः प्रायश्चित्तं प्रयोगेहि पश्चात्स्मात्तदुपास्तनः दृश्यते नुग्रहस्यापि पूजा
नुग्रहकारणात् एकोनार्हेति तत्कर्त्तुमन्यत्वानोप्यनुग्रहं पर्षत्तावद्बहवो विप्राः कर्त्तुमर्हन्त्यनुग्रहं स्नेहाद्वायदि वा
लोभाद्भयादज्ञानतोपि वा कुर्वन्त्यनुग्रहं ये तु तत्पापं तेषु गच्छति शुद्धास्माघस्य रूपत्वं अनुग्रहोदया अनु
ग्रहस्वरूपस्तन्तावधिमाह हारीतः तस्मात्कुर्वन्यथा पूर्वं पापं सर्वमपि विधानतः ज्ञात्वा बलाबलं कार्यं प्रायश्चित्तं
प्रकल्पयेत् किंचिदस्मात्कौशकृच्छ्रं प्राजापत्यंस्त्रधिकार्यं पादं अधिकतरायं त्वर्द्धमनुग्रहं कृत्वा प्रकल्पयेदिति
नुग्रहं कृत्वा सप्रमाहारेणायोऽस्य अथेतिकर्त्तव्यता विष्णुः सर्वपापेषु सर्वेषां व्रतानां विधिपूर्वकं ग्रहणं सप्रव
स्याभिप्रायश्चित्ते चिकीर्षिते दिनांतेनखरोमादीन्प्रवाप्य स्नानमाचरेत् भस्मगोमयमृद्वारिपंचगव्यादि
कल्पितैः मलापकर्षणं कार्यं ब्रह्मशौचविशुद्धये दंतधावनपूर्वेण पंचगव्येन संयुतं व्रतं निशामुखे ग्राह्यं।
बहिस्तारकदर्शने आचम्य प्रातः परं मौनी ध्यायन्दुष्कृतमात्मनः मनः संतापनं तीव्रमुद्वहेच्छोकमंततः तितिः
रोमश्मश्रु आदिनात्केशग्रहणं ब्रह्मशौचं पापनिर्हरणं पंचगव्येनेति भस्मादिसमस्तस्यैव पंचगव्यादेरनुवा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

3

शात् भस्मादिस्नानापेक्षयाजिदतभावनस्य दुर्बलत्वसिद्धिः आचारोप्येवं जितामहवरणाद्य व्रतंहोमावशिष्ट
पंचगव्यप्राशनमिति मदनपारिजातादौ प्रायश्चित्तसंकल्पइति माधवशूलपाणीतु तत्प्राशनमिति कल्पतरुः सु
प्यकेशान्तस्नान्सर्वत्र तत्प्राशपविशुद्ध्यतीति प्रांचलिखितोक्तेः सर्वमित्युक्ताग्रे तु यामस्नात्वा विशुद्ध्यतीतिपाठः
तदानघृतप्राशनंबहिर्ग्रामात् जबालिः आमेस्वर्णजयाणांसमासीच विशेषतः आज्येनेवहिरग्राना
ग्रह्योग्नाहुतीःइयक् आइंकर्यात्मितेचगोहिरण्यादिदक्षिणां स्त्रीणांहोमोनदातव्यःपंचगव्यंतथै।
वच आर्डवैसर्व विभायबेत्वंश्राइंसांकल्पनिजकाम्यया यंतुद्याद्विजेभ्योयदक्षिणांचस्वशक्तितः।
निशातातपोक्तेः व्रतांतेप्रायश्चित्तांतेगोहिरण्यादिदक्षिणादेयेतिसंबंधः अत्रविश्वेदेवतयापित्रादिदेवता
बाधः सांकल्पत्वाद्यार्घावाहनाग्नौकरणावनेजनपिंडस्वधावाचनानांवाधश्चतुश्च मस्मल्लुतेश्राइमयू।
खेसमाप्तोवेतिश्राइंकुर्यादित्पन्नाप्यन्येति शूलपाणिस्तुगोहिरण्यादिदक्षिणामितिपपाठतदाप्रायश्चित्तां
तेच्चगोहिरण्यादिदक्षिणांकार्यंतदाविपर्यः स्त्रीणांश्चालाग्निहोमएवनभवति तस्येवप्रकृतत्वात् लौकि
केग्नौतुभवत्येव कृत्विप्रद्वारेणकिंचन उपवासोव्रतंहोमस्तीर्थस्नानजपादिकं विप्रैःसंपादितंयस्यसंप
न्नंतस्यतत्फलंमिा,पराशरोक्तेः तत्र असमर्थेषुजपहोमादिषुअशक्तोविप्रद्वारापत्तिविधिनियममात्रार्थ।
त्वात् प्रायश्चित्तंगजपहोमयोस्तुनिषेधाद्वाप्राप्तेस्तत्रनस्याप्रहृत्तिः एतेनत्यन्मदनरत्नमहार्णवयोःस्त्री

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शूद्रादेर्विप्रद्वारासांतंत्रकौलपदोमौभवत्विति तन्मतंस्तं पराशरः स्त्रीशूद्रस्यतुशूद्रार्थं प्राजापत्यंसमाचरेत्
पंचगव्यंचकुर्वीतस्नात्वापीत्वाशुचिर्भवेत् स्त्रीणांपंचगव्यस्यविहितंप्रतिषिद्धत्वाद्विकल्पः शूद्राणांतुनि
मंभवत्येव शूद्रस्यापिविकल्पइतिमदनपारिजाते तन्न तस्यस्त्रीपदस्याभिनिषेधमात्रत्वेः यत्तुस्त्रीशूद्रास्तुसधर्मा
णइतितन्द्विप्राभावेस्त्रीशूद्रयोःसमानधर्मत्वप्रतिपादनार्थं अस्तिचात्रशूद्रेपंचगव्यस्यविशेषविधिः य
त्तु पंचगव्यंपिबेच्छूद्रोब्राह्मणस्तुसुरांपिबेत् उभौतौतुल्यकर्माणौशयात्येनरकेवसेत् इत्यत्रिवचनंतत्वग
ज्ञानप्राशननिषेधपरं वपनेविशेषमाह वसिष्ठः कृच्छ्राणांव्रतरूपाणांश्मश्रुकेशादिवापयेत् अक्षिरो
मशिखावर्जमिति काम्यकृच्छ्रादौवपनंनेतिमदनपारिजाते गोवधेच पराशरः प्राजापत्यंचरेत्कृच्छ्रंगोघ्ना।
तीव्रतत्समं सशिखंवपनंकार्यंत्रिसंध्यमवगाहनमिति विशेषमाहसंवर्तः पादेंगरोमवपनंद्विपादेश्म
श्रुणोपिच त्रिपादेतुशिखावर्जंसशिखंतुनिपातनइति सधवानांविशेषमाह वसिष्ठः केशानांनास्ति
नारीणांवपनंव्रतयज्ञयोः गोवधादिषुसर्वेषुछेदयेदंगुलद्वयं सधवानांतुनारीणामलंकारायसर्वदा
केशसंधारणांप्रोक्तंप्रायश्चित्तेद्विजोत्तमैरिति अंगुलत्रयमितिक्वचित्पाठः अत्रसधवापदाद्विधवानांसर्ववप
नं अत्रविशेषमाह पराशरः वपनंनैवनारीणांनानुव्रज्याजपादिकं नगोष्ठेशयनंतासांनवसेद्गवाजि
नं सर्वान्केशान्समुद्धृत्यछेदयेदंगुलिद्वयं सर्वत्रैवंहिनारीणांशिरसोमुंडनंस्मृतं वासिष्ठ्यादिपदंमाय।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्चित्तांतरपरं तेनप्रयोगादेर्मुंडनं चोपवासश्च सर्वतीर्थेष्वयं विधिरिति देवलाद्युक्तेः सर्वे मुंडनमेव केशानां वेशा
पदानमिति लिंगाद्वाचाराच्च तीर्थांतरे न भवतीत्यदेतत्‌ अपरार्के उक्तं स्मृत्यंतरे प्राङ्मुखो वा वपनं कार
येद्बुधः केशश्मश्रुलोमनखान्युदक्संस्थानि वापयेत्‌ दक्षिणांकर्णमारभ्य कर्मार्थं पापसंचयः शिखा
यं न वसंस्कारे शिखावर्जं तां शिरो वपेत्‌ पापसंचये निमित्ते प्रायश्चित्ते तैत्तिरीयके आस्ते वपनं निंदि
त्वादृष्टेकमङ्गः देवाश्चातुर्मास्यतउपपक्षावपेयं तद्वायुश्मश्रूणापयकेशानिति मन्त्रेपि तत्रैव मन्त्रप्र
क्रम्य श्मश्रूणापग्रे वपेत्‌ अथोपपक्षौ वपथकेशानिति अग्न्याधानेऽपि सेमेऽतृदेवं तत्र तस्य विधानात्‌ प्राय
श्चित्ते दैवमानुषे विकल्पेन तत्राप्युदक्संस्थताद्यो दक्षिणादिश्मश्रूपपक्षौ वापयामिति इदं च वपनं नि
षिद्धकालेपि कार्यं दोषे नैमित्तिकं कार्यं निषेधे सत्यपि ध्रुवं पित्रादिस्मृतिया त्वाह प्रायश्चित्तं व्रतीर्थकर
ति स्मृते निषेधाच्च वृद्धगार्ग्यः स्वातौ सोमवारे गुरौ रात्रौ पातेऽह्नो नेहनि … प्रतिपद्रिक्ता भद्राः दोषेषु वर्ज
येत्‌ भद्रा द्वितीया… नक्षत्रे तु न कुर्वीत यस्मिन्‌ जातो भवेन्नरः न मौष्टपक्षयोः ।
कार्यं नैव ग्रस्ते … दाहगोऽस्तु सर्वे क्षुरकर्माणि वर्जयेत्‌ बादरायणः सिंहे धनुषि मीने च स्थिते स
प्तसंगमे यात्रोद्वाहगृहारंभक्षौरकर्माणि वर्जयेत्‌ व्यासः विवाहमौंजीचूडासु वर्षमर्द्धं तदर्द्धकं ।
अंतर्वत्न्यां च जायायां नेष्यते केशवापनम्‌ … निषेधाः समयमयूखे ज्ञाः तथा च जीवत्पितृकेण।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पिकार्यं मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः न जीवत्पितृकः कुर्याद्गुर्विणीपतिरेव च इति निषेधस्य रागप्राप्त
विषयत्वाद्विधिस्पृष्टेनवकाशात् वस्तुतस्त्विदं वचनं तौनिबंधेष्वनुपलंभान्निर्मूलं यत्तु राजा वा राजपुत्रो वा
ब्राह्मणो वा बहुश्रुतः केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत् केशानां रक्षणार्थं तु द्विगुणं व्रतमाचरेत् द्वि
गुणे व्रत आचीर्णे नेष्यते केशवापनं अन्ये महापातकिनो गोघ्नेनोऽप्यावकीर्णिन इति नवविद्वान्वेश्वरः महापात
कादिभिन्नविषये राजादीनां वपनं नास्त्येव महापातकादौ तु तेषां वपनानिच्छायां द्विगुणादक्षिणासहितं व्रतं द्वैगु
ण्यमिति अन्ये तु महापातकादौ नियमाद्राजादेरपि वपनमेवान्यत्र तु वपनानिच्छायां व्रतद्वैगुण्यविधिरित्याहुः
इयं च वपनाद्येतिकर्तव्यता प्राजापत्यप्रभृतिनिषेधव्रतेष्वनन्येषु तथा च पैठीनसिः द्वादशाहे सर्वत्रोवप
नमिति वपनग्रहणं चेतिकर्तव्यतांतरस्याप्युपलक्षणं तथा च याज्ञवल्क्यः कुर्यात्त्रिषवणस्नायी कृच्छ्रं चांद्रा
यणं तथा पवित्राणि जपेत्पिंडान्गायत्र्या चाभिमंत्रयेदिति निवर्तमानवपनसाहचर्यात्स्वगन्ध्यादेरपि निवृत्तिः
अत एवस्नेपातत्रतेवस्त्रामिनिवैस्यदेवस्त्राद्दिमहदानोन्वेष्वपीदमवगम्यते अथ सर्वांगभस्मादिस्नानप्रयोगः
लैंगे ईशानेन शिरोदेशो मुखं तत्पुरुषेण तु ऊरुदेशमघोरेण गुह्यं वामेन संस्पृशेत् सद्येन पादौ सर्वांगं प्रणवेन
तु शोधयेत् अत्रेशानादिपदेनेशानः सर्वविद्यानामित्यादयो मंत्रा उच्यंते चतुर्थ्यंतानि नमोंतानीशानादिपदान्ये
वमंत्रा इत्यन्ये अग्निरितिभस्म जलमितिभस्म स्थलमितिभस्म व्योमेतिभस्म सर्वं ह वा इदं भस्मेति पंचमंत्रा इ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्नानादिमंत्रस्थानस्त्वपरे विष्णुः अग्रमग्रमितिस्त्वामानस्लोकेनताडनं: गोमयैर्लेपयेत्स्नात्रःसोदकैर्भानुदर्शि॥
नैः योगी त्रिधाकृत्वामृदंतांतुगोमयंचविशेषतः अधमोत्तममध्यानांअंगानांक्षालनंचरैः कौर्मे गोमयस्यप्र॥
मासांतुयेनांगंलेपयेन्नरइति ॥ अथमृत्तिकास्नानं जमदग्निः अश्वक्रांतेतिचैवंतुतांमृत्तिकामाहरेत्ततः नमो॥
मित्रस्येत्यादिनायदर्शयेत्सूर्यायकटौ गंधद्वारामितिजस्तथास्त्वांचगात्रमनुलेपयेत् शिवपुराणे अश्वक्रांतइतिस्त्वा
मंत्रेणामंत्र्यमृत्तिकां उद्धृतासीतिमंत्रेणाभ्युक्ष्यसमाहितः नमोमित्रस्येतिसूर्यायदर्शयित्वाचभानवे आलभ्येतिच
गात्राणिसमालभ्यद्विराचमेत् अनुलेपनमंत्रांतरमाह योगी आलभेतमृदागात्राणिइदंविष्णुरितिऋचा मत्स्यपुरा
णेस्नानं कौर्मे मृत्तिकाचसमुद्दिष्टासार्द्रामलकमात्रिकेति क्रमेणोनारदे आयुष्कामोषिलेपंमृदाकुर्याद्द्विजः
उत श्रीकामःपादयोःशौचंमृदापूर्वंसमाचरेत् पारस्करः एकयातुशिरःक्षाल्यंद्वाभ्यांनाभेस्तथोपरि तिस्रश्च
त्रिभिःकार्यंषड्भिःपादुस्तथैवच कटिवस्त्ररुजंघाश्चमादौचरणस्पृश्यततः तथाहसोपरितात्स्पृष्ट्वाचमेत्समा
हितः योगी मृद्भिरद्भिश्चगात्राणिक्रमशाल्लवनेजयेत् शीर्षाद्यानाभिसर्वाणिस्नात्वाविसृजनामयं कटिवस्त्ररु॥
रुजंघेचचरणौच त्रिभिस्त्रिभिः तथैवहस्तावाचम्यनमस्कृत्यमलंततः यत्किंचेदमितिमंत्रेणनमस्येत्प्रयतांज॥
लिः अत्रविरुद्धानांमृत्संख्यादीनांयथाशाखंव्यवस्थेतिहेमाद्रिः इतिमृत्स्नानविधिः ॥ अनंतरंचतर्पयेद्वारिस्ना
नमुक्तंतत्रमंत्रोब्रह्माण्डपुराणे आपोअस्मानितिसूक्ताभास्कराभिमुखःस्थितः इदंविसर्जपिबाचप्रतिस्रोतोनिम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उ
प्रा॰म॰
१२

इति महार्णवेनवैकल्पिकोहोमंत्राबुक्तौ इदमापःप्रवहतेतिमंत्रकं आपोहिष्ठेत्यृचोवेतितत्रमूलंस्मृणं अनंतरंपं।
चगव्यस्नानाम्मुक्तादि तत्रतद्गुणाणंत्रामाननमे सावित्र्यादायगोमूत्रंगंधद्वारेतिवैशकृत् आप्यायस्वेतिचक्षीरंदधिक्रा।
व्णोतिवैदधि तेजोसीतिहुतंतद्देवस्यत्वेतिचोदकं कुशामिश्रंजपेद्विद्वान्मंत्रगावंभवेत्ततइति पराशर्यैत तेजो
सिशुक्रमित्याज्यंदेवस्यत्वाकुशोदकं पंचगव्यमृचापूतंस्थापयेदग्निसन्निधाविति द्वितीयःश्लोकउक्तः देवसत्वे
त्यनेनत्वमभिषिंचामीतिवाक्यशेषःपूरणीयइतिनिबंधकृतः यद्यपि मात्स्ये देवप्रतिष्ठायांदेवस्नानार्थंपंचगव्य
ग्रहणेएतेमंत्राउक्ताः पात्रपरेणात्ववत्रअसर्वेगकरणेनत्वाशुभस्मापिकुशोदकसहितानांपंचानांगोमूत्रादीनांपंचग
व्यंभवेत्ततइतिपंचगव्यमृचापूतमितिपरिभाषेतिगम्यते तस्याश्वमेधकरणेननियमाभावाद्यत्रपंचगव्यमितियो।
गस्तत्रैवदेवमंत्राद्यवृत्तंतव्यं अन्यथागव्यमितितद्धितस्मृतावश्यंगतस्मादिसाधारणपतेनापिस्नानंस्यात् केचि
त्तु मलापकर्षणंकार्यंतावद्भूतशौचोपसिद्धयइतिवाह्यधारीरमलगंधनमात्रार्थंत्वादमंत्रकाण्यपिचतानीत्याहुः।
जमदग्निः हिरण्यशृंगवरुणमित्याग्नेभिप्रपद्यते स्तुभिर्याइत्यापःस्पृष्ट्वानुर्निर्यास्तुबहिःक्षिपेत् यदपांकूरमि।
त्यपस्त्रिरालोड्यानुपाणिना प्रायश्चित्तार्थमस्यापर्वतंधर्मानुस्मृत्याग्नेः प्रायश्चित्तमुपासीनोवाग्यतस्त्रिरुपस्पृ।
शेत् एकवासार्द्रवासावालच्छायाशीर्ष्यस्थंडिलेशयः स्नानवीरासनंमौनंमौंजीदंडकमंडलुः भैक्षचर्यापात्रिका।
पंचहृत्पांडरैर्जंकृत्याहुतं उपस्पर्शःस्नानमित्यपरार्के दिवास्थितोरात्रौचोपवेशानंवीरासनमितिविज्ञानेश्वरः।

8

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कृतं महापापं ज्ञातमज्ञातं किल्बिषं प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ इत्यैः कृतः पवित्रोऽहं भवेयं द्विजसत्त
मैरिति मे स्थैः प्रार्थयेज्ज्ञानावरान् ततः सभ्यास्तत्किंचिद्विचार्य संमन्त्र्य तदनुग्रहाय स्मिन्निर्दिश्य ब्रह्मकाण्डक्रमाऽप्राकृत्वी वा ।
लपहृद्रोगादिषु तत्प्रसंगात्तस्मात्प्राग्वादकादिषु पद्वादाश्वकर्मजन्यपापनाशार्थमिदं प्रायश्चित्तमप्रकाशव्ऽ
त्तकमपत्यस्याये नत्वया कार्यं तेन तस्य दोषो भविष्यतीति सर्वप्रायश्चित्ते तत्तवजन्मप्रभृति अद्य यावत् ज्ञाताज्ञातः
कम्माकम्मसकृदसकृज्ज्ञातकायिकवाचिकमानसिकसंसर्गिकातिपातकमलचुपातकसंकरीकरणमलिनी
करणापात्रीकरणजातिभ्रंशकरप्रकीर्णकपापानां मध्ये संभाविताना भाव्यार्थं बर्हू मधाक्को अवं सार्द्धं त्र्य वा
प्रायश्चित्तं चरिष्ये इति अयं चोपदेशो ब्रह्मकर्मानुकल्पकस्य जनेस्तस्याप्यानन्दे देशेन गोदानेन च कृतेनावबन्धपंका
र्यं इति संप्रदायः ततः कर्ता मासपक्षादिसत्वामम जन्मप्रभृत्यद्ययावदित्यादि प्रायश्चित्तमित्यतः सर्वाङ्ग
मुत्काम्यहं करिष्य इति संकल्प्य यानि कानि च पापानि ब्रह्महत्यासमानि च केशानाश्रित्य तिष्ठन्ति तस्मात्केशान्
प्राग्वपाम्यहमिति मंत्रमुक्त्वा कक्षोपस्थशिखावर्जं शेषाणां श्मश्रुपदकेशानुदक्संस्थान्वापयेत् यतिविध
वार्द्धिनं सशिखं वपनं ब्रह्महत्यादिषु पितृसंसर्गे गत्नीगाञ्च सधवानां द्व्यंगुलं केशाग्रच्छेदनं राज्ञस्तथैव
कुष्ठकृतविप्राणामिच्छया वपनाभावः तदा च द्विगुणं व्रतं दक्षिणा च द्विगुणा इत्थं वापयित्वा आप्रवर्णमित्या
दिस्नात्वा दंतधावनं कृत्वा दशस्नानानि कुर्यात् तत्र भस्मस्नानं ईशानः सर्वविद्यानामिति शिरसि तत्पुरुषायेति ।

9

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निऋपूर्वे अघोरेभ्योथघोरेभ्य इति हृदि वामदेवायेति गुह्ये सद्योजातमिति पादयोः प्रणवेन सर्वांगे यद्वा ईशा
नाय नमः शिरसि तत्पुरुषाय नमो मुखे अघोराय नमो हृदि वामदेवाय नमो गुह्ये सद्योजाताय नमः पादयोः
प्रणवेन सर्वांगं अग्निरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं ह वा इदं भस्मेति मंत्रैः क्रमा
च्छिरस्यादिषु ततो गोमयमादाय त्रिधा कृत्वा सूर्याय प्रदर्श्य अग्रमग्रं चरंतीनामोषधीनां वने वने तासामृ
षभपत्नीनां पवित्रं कायशोधनं तन्मे रोगांश्च शोकांश्च नुद गोमय सर्वदेति मंत्रेणैकेन भागेन नाभेरधः परे
ण नाभेरूर्ध्वमाकंठं तृतीयेन शिरः क्षालयेत् मानस्तोके इति मंत्रः ततः अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंध
रे मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतमिति मृत्तिकामभिमंत्र्य उद्धृतासि वराहेण कृष्णेन शतबाहुना मृत्ति
के ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतं मृत्तिके देहि मे पुष्टिं त्वयि स
र्वं प्रतिष्ठितं त्वया हतेन पापेन जीवामि शरदः शतमिति त्रिसांडीय मंत्रेण उद्धृतानि त्वा नमो मित्रस्येति सूर्यं प्रद
र्श्य त्रिधा कृत्वैकस्माद्भागात् इदं विष्णुरिति पादयोः जंघे मृत्तिके दिव्यं पपतेवं वचनः कः पुरोद्वेष इदं रुद्र धिप
मृद्वदेहस्तकं षष्ठद्वंद्वे शिरस्येका मृत्तिका मामार्द्रामलकमात्रं ततः आपो अस्मान्मातरः शुंधं विश्वरिपेना
भांटे वस्त्रलेपनेन वाम्नाशनाय आगोमूत्रेण गां धद्वारेति गोमयेन आप्यायस्वेति दध्ना दधिक्राव्ण
ति दध्ना तेजोसि शुक्रमसि अमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसीत्याज्येन देवस्य त्वे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋणाभेगव्यमात्रं एतन्मंत्रांतेनरुद्रगायत्रीलिंगाभ्यांशोधः ततआपोहिष्ठेतिहस्तेनालोड्य मानस्तोकइतियज्ञिय
काष्ठेननिर्मथ्यसप्तावृत्तैःकुशैःसिक्तैःपलाशपत्रैर्वाजुहुयात् मंत्रास्तु ॐइरावतीधेनुमतीहिभूतंपृथिव्या
इदंनममेतिन्यासः इदंविष्णुर्विचक्रमे मानस्तोकेरुद्राय ब्राह्मीस्वी अथ अग्नयेस्वाहा सोमायस्वाहा ।
इदंद्यवते गायत्र्यासावित्र्यैः प्रजापतेनत्वदेतान्यन्यः प्रजापतयइदं ॐस्वाहाप्रजापतयइदं अग्नेःचब्रह्मकू
र्चहोमेतिप्रमाणवान् ततःस्विष्टकृदादिहोमशेषंसमाप्यतान्कोद्ययेहोमावशिष्टंपंचगव्यंप्रणवेनालो
ड्यप्रणवेननिर्मथ्यप्रणवेनपीत्वास्मृत्यादिपठितंसंकल्पितंप्रायश्चित्तं मात्रादाघ्य भवप्रमाप्नायेनवाहू।
त्वाशूर्वंवहद्याद्दतिभिरात्मपतोम ब्रह्मकूर्चहोमंविसृज्य आज्यंचकृत्वागोहिरण्यादिदक्षिणांचदत्वाशिरसा
प्रणमानीयगोभ्योदत्वानाभिर्मत्र्येतिनिष्क्रमेत् ॥ इतिश्रीमीमांसककंकरभट्टात्मज भट्टनीलकंठकृते
भास्करेप्रायश्चित्तमयूखेसाधारणप्रायश्चित्तप्रयोगः ॥ २ ॥ अथकृच्छ्रादिस्वरूपं याज्ञवल्क्यः प
कभक्तेननक्तेनतथैवायाचितेनच उपवासेनचैकेनलघुकृच्छ्र उदाहृतः यथाकथंचित्त्रिगुणःप्राजापत्यः
सउच्यते एषएवातिकृच्छ्रःस्यात्पाणिपूरान्नभोजनःयति लघुकृच्छ्रस्यैवप्राप्तकृच्छ्रइतिनामांतरं यथाक
थंचिदनुलोमःप्रतिलोमोदर्शकलितवदाहृतेः स्वस्थानविहितोवा एतास्मान्तुरःपदान्स्मरसंतसिद्धा
न्यथाकथंचिमदैनैवसंजग्राहयोगी ग्राससंख्यामाहापस्तंबः सायंद्वाविंशतिर्ग्रासाःप्रातःषड्विंशतिः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्मृताः चतुर्विंशतिरेवाद्याः परंभिरघानंस्मृतं कृच्छ्रार्धं च प्रमाणानामद्युर्यथाक्रमंविशेषतस्तवं पाराशर्येण
सायंतुद्वादशग्रासाः प्रातः पंचदशास्मृतानाद्यनिपूर्वोर्द्धे चतुर्विंशतिमितेतु प्रातस्तुद्वादशग्रासाः सायंपं
चदशैवतु अयाचिते ब्रह्मचर्ये परं वै मासनाशनमिति आसांच संख्यानां ग्रासानां विकल्पः अतिकृच्छ्रे उप
वासभिन्नत्रदिनभोजने ग्रासानामि [illegible] विधिः पाणिपूरमेकग्रासमितं एकैकं ग्रा [illegible] मर्यादाद्दिनत्र
णि पूर्ववत् अहं चोपवसेदन्नमिति कृच्छ्रं [illegible] मनुः सांतपनं प्राजापत्यमाह गोमः हविष्यान्नानता
शान्तुक्तानि त्र्योरात्रीर्नाश्नीयाद आपरं अहं नभक्षं जीना ध्याप [illegible] हं न कं च न य [illegible] ता ध्याप [illegible] हस्तुप
स्तोत्रि हेदहनि रात्रावासीनाह्निमकामः सामं वदेद्नार्द्रकं भा धे न रो खयो धाज पे नित्यं प्रभुंजीतान्नम
वनमुदकोपस्पर्शनमापोहिष्ठेतिति सृभिः पवित्रवतीभिर्मार्जयित्वा हिरण्यवर्णाः शुचयः पावकरूप
ष्टाभिः अघोदकतर्पणं नमोहंसायसमोहंसायमहंसायधुन्वतेनापसायकुनर्वसवेनमोमोज्यायो
व्यायस्त्वविदायवस्तुविदेसर्वविदायनमः परायसुविदायसर्वविदायनमः परायसुपरायपारदायपार
यिष्णवेनमोरुद्रायपशुपतयेमहतेदेवायत्र्यंबकायैकचरायाधिपतयेहरयेशर्वायेशानायोग्रायव
ज्रिणेहृणिनेकपर्दिनेनमः सूर्यायादित्यायनमोनीलग्रीवायशितिकंठायनमः कृष्णायपिंगलाय
नमो ज्येष्ठाय श्रेष्ठाय वृद्धायेंद्रायहरिकेशायोर्ध्वरेतसेनमःसत्यायपावकायपावकवर्णायचकामा
प्र

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यवाग्मरूपिणेनमोदीप्तायदीप्तरूपिणेनमः सौम्यायपुरुषायमहापुरुषायमध्यमपुरुषायउत्तमपुरुषायब्रह्मचारिणेनमस्त्रं
द्रललाटायकृत्तिवाससेनमइति एवान्मोदेवस्यानएतानएवान्याहुतयोहुत्वासत्रसंतातेचरुंश्रपयित्वे
ताभ्योजुहुयात् अग्नयेस्वाहा सोमायस्वाहा अग्नीषोमाभ्यामिन्द्राग्निभ्यामिन्द्रायविश्वेभ्योदेवेभ्योब्रह्मणे
प्रजापतयेअग्नयेस्विष्टकृतइत्यंतेब्राह्मणभोजनमेतेनातिकृच्छ्रंव्याख्यातमिति नमोहमायेसाद्यस्त्व
योदशमंत्रानमः सर्वान्नमोन्ताश्चेति हरदत्तकौथुमशाखाशतितस्यैवपाठः ॥ अथकृच्छ्रातिकृच्छ्रं याज्ञ
वल्क्यः कृच्छ्रातिकृच्छ्रःपयसादिवसानेकविंशतिमिति अथोजलं चवेत्कृच्छ्रातिकृच्छ्रं तुपिबेत्तोयंतुशीत
लमितिश्रुमांडपुराणात् अथपराकः सएव द्वादशाहोपवासेनपराकः परिकीर्तितइति मासोपवा
सेकृच्छ्रमाह जाबालः अनश्नन्मासमेकंतुमहापातकनाशनमिति यावककृच्छ्रमाह यमः गोपुरी
षान्यवान्मासमेकंसमाहितः व्रतंतुयावकंकुर्यात्सर्वपापापनुत्तये तप्तकृच्छ्रमाहमनुः तप्तकृच्छ्रं
चरन्विप्रोजलक्षीरघृतानिलान् प्रतित्र्यहंपिबेदुष्णान्सकृत्स्नायीसमाहितः पराशरः षट्पलंतुपिबे
दंभस्त्रिपलंतुपयः पिबेत् पलमेकंपिबेत्सर्पिस्तप्तकृच्छ्रोविधीयते तप्तकृच्छ्रमुक्त्वाशंखलिखितौ प
षण्वशीतैः शीतकृच्छ्रइति ब्रह्मकूर्चमाह जाबालः अहोरात्रोषितोभूत्वापौर्णमास्यांविशेषतः
पंचगव्यंपिबेत्प्रातर्ब्रह्मकूर्चविधिः स्मृतः प्रजापतिः पलाशपद्मपत्रंवाताम्रंवाथहिरण्मयं गृह्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्वासार्द्धमेववाचनयाकर्मसमाचरेत् पराशरः गोमूत्रंकृष्णवर्णायाः श्वेतायाश्चैवगोमयं पयश्चताम्रवर्णा
यारक्तायागृह्यतेदधि कपिलायाघृतंग्राह्यंसर्वंकापिलमेववेति सएव मूत्रमेकंपलंदद्यादंगुष्ठार्द्धंतुगोमयं
क्षीरंसप्तपलंदद्याद्दधित्रिपलमुच्यते घृतमेकपलंदद्यात्पलमेकंकुशोदकं गृह्णीयात्तत्रसप्तपंचगव्यपरिमा।
णस्यचवोदकवासानिअंगुलानिद्वात्रिंशानि तद्धितस्तुप्रयोगेस्याभिःसंगृहीतः पराशरः आपोहिष्ठेति।
चालोड्यमानस्तोकेतिमंथयेत् सएव सप्तवारान्तुयेदर्भांश्छिन्नाग्राःशुककल्मिषः तैरुद्धृत्यचहोतव्यंपं।
चगव्यंयथाविधीति प्रजापतिस्तु स्थापयित्वाथदर्भेषुपालाशैःपत्रकैरथ तमस्तुहुत्वाहोतव्यंदेवता।
भ्योयथाक्रमं पराशरः इरावतीदंविष्णुर्मानस्तोकेचशंवती एताभिश्चैवहोतव्यंहुतशेषंपिबेद्द्विजः प
जापतिः अग्नयेचैवसोमायसावित्र्याचतथैवच प्रणवेनतथाकुर्यात्स्विष्टकृच्चतुर्थेवच मरीचिः अग्न
येस्वाहा सोमायस्वाहा इदंवन्ते इदंविष्णुः मानस्तोके गायत्र्या प्रजापतेनत्वदेवानीत्याज्याहुतीर्मन्त्रेणहु
यात् पराशरः आलोड्यप्रणवेनैवनिर्मथ्यप्रणवेनतु उद्धृत्यप्रणवेनैवपिबेच्चप्रणवेनतु मरीचिः पाला
शेनचपद्मेनवाबिल्वपत्रेणवापिबेत् त्वगीयताअपानंवाज्ञानाज्ञानप्रशानितानिवा हृदपराशरः यत्त्वस्थिगत
तंपापंदेहेतिष्ठतिमानवे ब्रह्मकूर्चोदहेत्सर्वंप्रदीप्ताग्निरिवेंधनमिति पार्वणेदिनेचोपवासः ब्रह्मकूर्चोपवा
सस्तुदहत्यग्निरिवेंधनमितिपराशरोक्तेः ॥ अथसांतपनं शंखः गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकम्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

६
प्रा॰म॰
१७

16

एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतं एतदेव त्र्यहाभ्यस्तं यतिसांतपनं स्मृतं महासांतपनमाह याज्ञवल्क्यः
पृथक्सांतपनद्रव्यैः षडहः सोपवासकः समाहेतु - - - महासांतपनः स्मृतः यमः एतमेव चयैर्यानि एकै
कं च त्र्यहं त्र्यहं अतिसांतपनं नाम श्वपाकमपि शोधयेत् द्वादशाहोयं त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत्
त्र्यहं दधि त्र्यहं क्षीरं त्र्यहं सर्पिस्ततः शुचिः पंचदशाहः जाबालः एकैकमेतद्द्वे त्रिरात्रमुपयोजयेत् त्र्यहं चोप
वसेदंत्यं महासांतपनं विदुरिति एकविंशतिरात्रोयं ॥ अथ तुलापुरुषकृच्छ्रं शंखः पिण्याकाचामतक्राम्बुस
क्तूनां प्रतिवासरं उपवासांतराभ्यासात्तुलापुरुष उच्यते आचामओदनमिश्र - - - रंतियावत् ब्रह्मकूर्चमाहां
गिराः गोमूत्रेणासमायुक्तं यावकं चोपयोजयोजयेत् एकाहेनातु कृच्छ्रोयं कृच्छ्रः सर्वगिरसा स्वयं सर्वपापहः
रोऽद्भ्यो नाम्नावज्रमिति स्मृतः सर्वमश्नांत दधि तक्रात्सेपयावाग्भ्यो शाकोविकल्पः ॥ अथ चांद्रायणं यमः
वर्द्धयेत्पिंडमेकैकं शुक्ले कृष्णे च ह्रासयेत् एतच्चांद्रायणं नाम यवमध्यं प्रकीर्तितं एकैकं ह्रासयेत्पिंडं कृष्णे शु
क्ले च वर्द्धयेत् एतत्पिपीलिकामध्यं चांद्रायणमुदाहृतं त्रीस्त्रीन्पिंडान्समश्नीयान्नियतात्मा दृढव्रतः हवि
ष्यान्नं तु वै मासमृषिचांद्रायणं स्मृतं चतुरः प्रातरश्नीयाच्चतुरः सायमेव च पिंडानेतद्धि बालानां शिशुचां
द्रायणं स्मृतं पिंडानष्टौ समश्नीयान्मासं मध्यदिने रवौ यतिचांद्रायणं त्वेतत्सर्वकल्मषनाशनं यतिचांद्राय
णमिति संज्ञामात्रं तेन न यतिमात्रस्यैवाधिकारः किंतु सर्वेषां एवं शिशुचांद्रायणेपि यवपिपीलिकामध्ययो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्तिथिवृद्धौह्रासेवाग्रासानामपिवृद्धिह्रासौ यथाहवसिष्ठः अमावास्याविकारमश्नीयात्तांश्चैकैककलाभिवृद्धौक
मेणावर्द्धयेद्धानौचह्रासयेदमावास्यायांकुर्वाञ्जीयादिति एतेनयवमध्यतःकृच्छ्रमूलपाणिग्राहतः ह्रासप्रति
पदिपंचदशग्रासाः ततएकैकह्रासेनावमावास्यायामेकोग्रासः शुक्लप्रतिपदादिषुद्व्यादिवृद्धिरिति तथापस्तंबः
अमावास्यांतंभुंजीतएवचांद्रायणोविधिरिति मतांतरमेतत् सामान्यचांद्रायणमाह सएव यथाकथंचित्पिंडा
नांतिस्रोशीतिरश्नीयात्सामान्यचांद्रायणमनुतिष्ठतिदिनसंख्यानियमात् देवताच्चार्दिपिंडान्तरेउत्तदूष्यंग्रासानश्नी
यादित्यर्थः पिपीलिकायवमध्यभिन्नचांद्रायणोक्तदिनांतरेष्वाश्रमानप्रतिपदेव ग्रासपरिमाणमाह याज्ञवल्क्यः
तिथिवृद्ध्याचरेत्पिंडान्शुक्लेशिख्यंडसम्मितान् शिखीमयूरः चांद्रायणप्रकरणेपराशरः कुक्कुटांडप्रमाणां
स्तुग्रासान्वैपरिकल्पयेत् गौतमस्तु आर्द्रामलकमात्रांस्तुग्रासानिंद्वतेस्मरताइति एतेषांचपरिमाणानांविक
ल्पः एकादश्यादौतुनित्यप्राप्तउपवासस्तावच्चांद्रायणविधिनाबाध्यते एतस्यधर्मोयं चचरेदेतमश्चन्द्रस्येति।
सलोकतामिति काम्यत्वाच्छुभलक्षणादिनिमित्तेविहितत्वेननैमित्तिकत्वाच्च काम्यस्यैकादश्याद्युपवासोऽप्यहा
एकवृत्तीयः प्रतिनिनिधिनाकृतेपिफलप्राप्तेःकाम्यायनादिभिरुक्तत्वात् वचनानित्वस्याकृतेसमयमएवेत्र
पुण्यानि अयंचेकादश्याद्युपवासबाधःसामान्यचांद्रायणाभिन्नेष्वेव तत्रप्रतिदिनंग्रासग्रहणेनियमाभावात्
गौतमः अथातश्चांद्रायणंतस्योक्तोविधिः ॥ कृच्छ्रेवपनंव्रतंचरेच्छ्वोभूतांपौर्णमासीमुपवसेदाप्यायस्वसंतेप

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यांसिनवो नवइति चैताभिस्तर्पयामाज्यहोमो हविषश्चानुमंत्रणमुपस्थानं चंद्रमसो यद्देवा देवहेडनमिति चतसृभि
राज्यं जुहुयाद्देवकृतस्यैनसोवयजनमसीति समिद्भिः ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं यशः श्रीः ॐ ऊर्ग् इट्
ओजः तेजः पुरुषः धर्मः शिवः इत्येतैर्ग्रासानुमंत्रणं मनसा नमः स्वाहेति वा सर्वग्रासप्रमाणमास्याविकारेण चरुभै
क्ष्यसक्तुकणयावकशाकपयोदधिघृतमूलफलोदकानि हवींष्युत्तरोत्तरं प्रशस्तानि पौर्णमास्यां पंचदशग्रासान्भुक्त्वा एकैका
पचयेनापरपक्षमश्नीयात् अमावास्यायामुपोष्यैकैकोपचयेन पूर्वपक्षमिति बौधायनः ॥ अथातश्चा
न्द्रायणकल्पं व्याख्यास्यामः शुक्लचतुर्दश्यामुपवसेत् केशश्मश्रुलोमनखानि वापयित्वा श्म
श्रूणि चेत्यादि यमः कांस्यं तैजसं पात्रं चक्रोत्पन्नं विवर्जयेत् अश्वत्थपर्णानि जतुपात्रं देवपात्रमुचरुकं चक्रोत्प
न्नं घटप्रमाणादि सएव अंगुल्यग्रस्थितं ग्रासं सावित्र्या चाभिमंत्रयेत् अन्नग्रासे एव प्राणाग्निहोत्रमाह बौ
धायनः अश्नीयात्प्राणायेति प्रथमं अपानायेति द्वितीयं व्यानायेति तृतीयमुदानायेति चतुर्थं समानाये
ति पंचमं यदा चत्वारस्तदाद्याभ्यां पूर्वं यदा त्रयस्तदाद्याभ्यां पूर्वौ यदा द्वौ तदाद्याभ्यामेवोत्तरमेकं सर्वैरिति ग्रा
सद्वयपक्षे प्रथमायैस्त्रिभिरंत्याभ्यामपरः एकपक्षे सर्वैरेकमित्यर्थः ॥ अथप्रयोगः चतुर्दश्यां कृतनित्यक्रियः
सर्वांहसां नाशाय अमुकमासे पक्षादौ कृच्छ्रं वा सकलपापक्षयकामः श्रीकामो देवताप्रीतिकामो रसायनादिसिद्धि
कामो वा अमुकं चान्द्रायणं करिष्य इति संकल्प्य अग्ने व्रतपते व्रतं चरिष्यामीत्यादिमंत्रैर्व्रतमादित्याय निवेद्य के

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रथमग्रासो मनसा निश्चयस्य आपेववा यथित्वा न हि नडपोष्ठ दिने माघे मासे शुक्ले पौर्णिमायां चेत्पंचदश ग्रासान्भुंजीत तत
श्रमोन्नरपक्षेऽप्येवं चयः पौर्णिमो मरपक्षे पंचदशो ग्रासानां प्रतिदिनं वृद्धिर्नेचं द्वे आप्यायस्व सोमं तर्पयामि संतेपयांसि सोमेन
पयामि नवो नवो चंद्रमसमन्त्र यामिदृतिन्यथिना स्थेनैते देवमंत्रैः लौकिके पौर्णमेन देवपात्रस्य हविरन्नमं स्मृते देव चं
द्रमुपस्थाय यद्देवा देवहेडनं मितिचतसृभिर्ऋग्भिः प्रत्येकमात्मनं कुर्यात् सर्वत्राप्यनेनममेति त्यागः ततो देवकृ
तस्येति त्रिभिः समित्त्रयं हुत्वा ओं भूः भुवः स्वः महः जनः तपः सत्यं यशः श्रीः ओं ऊर्जं इट् तेजः ओजः पुरुषः धर्मः
शिवः इत्येतैः पंचदशभिरेकैकं मेणापात्रस्थं ग्रासमनुमन्त्रमनसा नमः स्वाहेत्यन्तान् सर्वानेतन्मंत्रैरेकैकमंगुष्ठे
नहीत्वा सावित्र्यानुमंत्र्य भक्षयेत् तत्र प्रथमं मद्वेनैकग्रासं भक्षयेत् प्राणाय स्वाहेत्यादयः पंचापि मंत्राः द्वयोर्ग्रा
सयोस्तायैस्त्रिभिर्मंत्रैरेकैकस्याभ्यां मंत्राभ्यामपरं त्रिषु ग्रासेषु द्वाभ्यां द्वाभ्यां शेषेकेनान्त्यः चतुर्षु द्वाभ्यां सर्वं प
चैकेनान्यान् पंचभ्योऽधिकग्रासास्तु सर्वमेव भक्षणीयाः समाप्ते च व्रतान्ते प्रायश्चित्तं भोजयित्वा गां दक्षिणां दद्यात्
ग्रासमापि मन्त्रह त्रिषवणस्नानं सोममंत्रैः कृतांजलिरादित्योपस्थानं गायत्र्या व्याहृतिभिः कूष्माण्डैर्वा होमः
दिवा स्थितिः रात्रावुपवेशनं यथाक्रमोपपन्नं यथा प्राप्तिस्यात् इति नित्यकं यतो निंदः ऋतं चेति त्र्यृचं पात्रं इद्रामी
सलिनामिति पुनंतुमां देवजनाः अघमर्षणं विरजं सरस्वत्यो धाज्य सामन्नी च पठेत् एतेषामसंभवे गायत्र्यो व्याहृतीः प्र
णवं वा जपेत् एतच्च विप्रभोजनं दक्षिणादानादि जपांतं सर्वेष्वपि प्राजापत्यादिव्रतेषु तुल्यं इति चांद्रायणव्रत

19

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विप्रांस्तिला—माहुताशानः इत्याहद्वादशसाहस्रं गायत्र्याः कृच्छ्रमाचरन् द्वादशभिरधिकं साहस्रं द्वादशसा-
हस्रं याज्ञवल्क्योपि यत्र यत्र च संकीर्णमात्मानं मन्यते जनः तत्र तत्र तिलैर्होमो गायत्र्या वाचनं तथा सं-
कीर्णपापक्षमं वाचनं दानं तिलैरित्यत्रापि संबध्यते तिलदानमित्यर्थः वेदपारायणं संहितापारायणं अभुत-
गायत्रीभिस्तुल्यत्वात् संहिताध्ययनं यावतैकालं सावित्रीं जपेदिति अपरार्के प्रचेतः स्मृतेश्च पराकः
कृच्छ्रो घृतं तु गायत्र्या उदवासस्तथैव च धेनुप्रदानं विप्राय सममेतच्चतुष्टयमिति उदवासो होमस्त्रमितिम-
हार्णवे मार्कण्डेयः प्राजापत्यक्रियाशक्तौ धेनुं दद्यात्पयस्विनीं धेनोरभावे दातव्यं मूल्यं तुल्यं न संशय इति सं-
वर्त्तः गवामभावे दातव्यं मूल्यं तुल्यं न संशय इति कल्पतरु माधवीये ब्रह्मपुराणे गवामभावे निष्कं स्यात्त-
दर्द्धं पादमेव वा रूप्यपरिमाणे निष्कपरिभाषामाह याज्ञवल्क्यः निष्कं सुवर्णाश्चत्वार इति सुवर्णाश्चतुष्ट-
यस्मतो लितं रूप्यनिष्कमित्यर्थः लीलावत्यां वराटकानां दशकद्वयं यत्सा काकिणी ताश्च पणाश्चतस्रः
ते षोडश द्रम्म इहावगम्यो द्रम्मैस्तथा षोडशभिश्च निष्क इति मूल्यानयनमपि प्रायश्चित्तविवेके षड्भिधान्मते।
धेनुः पंचभिराढ्यानां मध्यानां त्रिपुराणिका कार्षापणैकमूल्या हि विप्राणां प्रकीर्तिता दरिद्राणामि-
ति वचिम्राठ। पुराणो द्वात्रिंशत्कृष्णलमितं रजतं द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकः ते षोडश स्या-
द्धरणं कार्षापणास्तु कर्षापणाः स विज्ञेयः कार्षिकस्ताम्रिकः पण इति मन्वकेन किं तु कार्षापणो दक्षिणास्सा।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ई
प्रा॰म॰
२०

२२

दिग्विरोप्यःप्रवर्तते पणोनिर्बद्धःसर्वेषांषोडशैवपणाःस्मृताइति नारदोक्तेःएवंषोडशपणात्मकाःषोडशकाः तेनगोसजातीये
लोभसंभवात् मनुःकल्प्तदंडादिविषयइतिव्यवहारार्थमायएवज्ञेयोऽन्यत्रराजतमितिमिताक्षरायांस्मृतेः कार्षापणि
पिहात्रिंशत्कृष्णलत्रजलमितिएवविरोधाभिधिकःपणोभद्रसोमेश्वरोक्तोयासः कार्षापणाद्दक्षिणस्यांदिशिरोप्यः
प्रवर्तते पणोनिर्बद्धःसर्वेषांषोडशैवपणाःसन्ति तन्निरुद्दवचनेपिनाधन्मितमेवरजतंषोडशपणात्मकंरजतंद
क्षिणस्यांकार्षापणाख्यंनिर्दिष्टंतन्निर्णयेनानवद्यणाः मूल्याध्यायेकात्यायनः द्वात्रिंशत्पणिकागावत्स्तत्तुष्काकार्षाप
णोवत्सः षष्ठेपञ्चकार्षापणिकाअष्टाविंशतिस्मृताः दशकार्षापणाधेनोःस्यात्पञ्चवत्सौवनिति एतेषांचगोमूल्य
पक्षाणांप्रत्याम्नायभेदेनव्यवस्था यत्रयत्रार्के द्वादशैवसहस्राणिजपेद्देवीमुपोषितः जलान्तेविधिवन्नित्यप्रा
जापत्योयमुच्यतइति जलान्तेजलसमीपे नद्यान्तेअर्कचवत्रद्विशानिमतस्तु अतिकृच्छ्रेयत्रार्केचप्राजापत्यस्यत्रय
ऽर्थानु कृच्छ्रेगोमिथुनमिति अत्रद्वादशसहस्रगायत्रीजपोगोमिथुनंचगोनमाधकप्राजापत्यविषयंप्रक
विषयंवा तत्रैव अत्रदानादिरूपेनद्वादशब्राह्मणाभ्युचीन् तर्पयेन्माहन्ताधोचप्रोत्रियंकृच्छ्रउच्यते उ
पोष्यश्रद्धयायुक्तस्तिलपात्राणिधर्मतः द्वादशब्राह्मणानादिभ्यःप्राजापत्येनतत्समं स्वयमाज्यस्यपोमूर्धान्तण
भागान्नुपोषितः दशाज्ञोर्मडलेकृच्छ्रेद्वादशैवनसंशयः मासोपवासमप्रानंकृत्वाद्वात्रिंशोत्तरमार्गेषु अहोरात्रो
षितस्तिष्ठेत्स्नानमुखःकृच्छ्रउच्यते नमस्कारसहस्राणिद्वादशैवदक्षतः गोविप्रपितृदेवेषुकुर्यात्कृच्छ्र

२०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यं भवेत् तिलपात्रप्रदानानि कौर्मे तिलपात्रं त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमं ताम्रपात्रं दशपलं जलवर्त्तसंपरिकी
र्त्तितं द्विगुणं मध्यमं प्रोक्तं त्रिगुणं चोत्तमं स्मृतं वसिष्ठः अपि चेत्सुकृतं कर्म दिवसे समाहूताप्राप्तं रात्रौ स्थित्वा जल
ले विप्रः प्राजापत्येन तत्समं गोमूत्रेण समायुक्तं यावकं चोपयोजयेत् कृच्छ्रमेकाहिकं प्रोक्तं हृष्टमंगिरसा स्व
यं निष्पापसीनो द्विजातिर्हे द्विरात्रं समाहृताघ्नः प्राजापत्यं विजानीयात् कृच्छ्रार्द्धे ज्ञेयाहुतमिति पराशरः कृ
च्छ्रो देवासुरं चैव प्राजापत्यमथान्तरं अर्पणीयं नाडीभिः स्नानं द्वादशसंख्यया माधवीये स्मृत्यंतरे प्राजा
पत्यं चरन्विप्रो यद्यशक्तः कथंचन अशक्तौ दधिविप्रान्ना भोजयेत्सम्पर्गीपितान् अत्र कपिंजलाधिकरण
न्यायेन पंचसप्तदशत्रयस्त्रिंशो विप्राः कृच्छ्रः एकमध्ययनं कुर्यात्प्राजापत्यसमं पिबेत् दशाहं द्वादशाहं सहस्र
गवां पुष्टिं विचक्षणाः एकमध्ययनं सक्तसंहिताध्ययनं तथा वहुपवासैः वापि प्राजापत्यमिति निबंधकृतः
चतुर्विंशतिमते प्राजापत्येन गामेकां दद्यात्सांतपनद्वयं पराकं तप्तमतिकृच्छ्रेति स्वल्तिर्वर्लगालयेति सां
तपनमत्रमहत् स्नात्वा सार्धं प्राजापत्यं प्रोक्तः तथा चवर्षाद्युष्मन्मते पराकं तप्तमतिकृच्छ्रस्थाने कृच्छ्रत्रयं चरेत्
सांतपनस्य चार्धं इमस्याश्नोव्रतमाचरेदिति स्मृत्यर्थसारे पराके पंचकृच्छ्रे षडिति अपरार्के मार्कंडे
यः प्राजापत्यसमा धेनुः स्यात्तूयनमहाकृच्छ्रके पराके तु सुवर्णं स्यात् हेमशृंगी तथैव चेति पराके तु सुवर्णं धे
नुद्वयं मूल्यसमं हेमशृंगी महाणीन सकलकांस्यदोहा सुपस्करवनी धेनुं लक्षयति कर्मविपाकसारं गोरत्न

23

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रा०म०
२९

स्मृतौ एकाहकृच्छ्रे तिकृच्छ्रे इति त्र्यहं चांद्रायणोऽस्मरन्नाह इति मदनरत्नेऽस्मृतौ प्राजापत्ये तु गामेकामतिकृच्छ्रे द्वयं
स्मृतं चांद्रायणे पराके च त्रितयो गावः दक्षिणा तथेति बृहद्विष्णुः चांद्रायणमनूक्तवान् कृच्छ्रकृच्छ्रचन्द्रह
यं प्रत्यघ्नति चांद्रायणे पर पिपीलिकायवमध्यमोरक्षधेनुरुक्तैः द्विविधं चांद्रायणादौ च धेनुत्रयोक्तेः यत्र
चतुर्विंशतिमते अशीतौ चांद्रायणोऽदेयाम्नत्याम्नायाविशेषादिति तत्पिपीलिकायवमध्यविषयमिति धनिनः
धर्मविज्ञौ चतुर्विंशतिमते च चांद्रायणं मृगारेष्टिः पवित्रेष्टिस्तथैव च मित्रविंदापशुश्चैव तप्तकृच्छ्रत्रय
मथापि वा तिलहोमा घृतं चैव पराकद्वयमेव च गायत्र्या लक्षमेकं तु समान्याहुर्मनीषिणः नित्यनै
मित्तिकानां च काम्यानां च कर्मणां इष्टीनां पशुबंधानामभावे च स्वः स्मृता इति कृच्छ्रे तु धेनुत्रयं अत्र
विघटके घमेकृच्छ्रस्त्वतिकृच्छ्रो निपातने कृच्छ्रातिकृच्छ्रोऽस्त्वर्थातेकृच्छ्रो भूत गोणानदत्यतिकृच्छ्रे धे
नुद्वयोक्ते स्वविषयनिपातनादाधिक्ये स्वातेविहितस्य कृच्छ्रातिकृच्छ्रे स्यातिकृच्छ्रादाधिकावगमाद्धेनु
त्रयं प्रत्याम्नाये गम्यते यदा त्वतिकृच्छ्रे तिसृस्तत्रापि कृच्छ्रातिकृच्छ्रे ततोऽधिके च तस्रः तथा चोक्तं नारा
धिकेनाह हारीतः अनाश्रमी संवत्सरं प्राजापत्यं चरित्वाश्रममुपेयात् द्वितीये तिकृच्छ्रं तृतीये कृच्छ्रा
तिकृच्छ्रमत ऊर्ध्वं चांद्रायणमिति चतुर्विंशतिमते कृच्छ्रे पंचातिकृच्छ्रे त्रिगुणामहरहस्त्रिंशदेव तत्तो
येचत्वारिंशत्त्वत्रैत्रिगुणानगणिता विंशतिः स्यात्पराके कृच्छ्रे सांतपनाख्ये भवति षडधिका विंशा

24

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ति: सैवहीनाह्वाभ्यांचांद्रायणोभ्यासप्रसिक्तृशानभुर्भोजयेद्विप्रकुरवान् अनुसंधान्वितमहत्तरः पदंभोज
नान्यपि तेनकृच्छ्रेप्रत्यहंपंचानिकृच्छ्रेप्रत्यहंपंचदश एवमुत्तरत्रेतिकेचित् पक्षांतसप्तावीस्मयोः प्रसं
रमनन्वितयोरेवक्रियान्वयः तेनकृच्छ्रेपंचसुदिनेष्वेकोभोज्यः अतिकृच्छ्रेनवस्त्वेकेकस्त्रिषष्ठाहाविति
पंचदशैव तृतीयेकृच्छ्रातिकृच्छ्रेत्रिंशद्द्वादशदिनैर्विभज्यभोज्याः सांतपनेचांद्रायणेच विंशतेत्रैः
गणपमन्वेतिसौम्यकृच्छ्रेएकाधेनुः ब्रह्मकूर्चेद्वे पराकेतिस्रः मासोपवासेसार्द्धसप्तेतिनिबंधकृतः
मूलपाणिस्तु पराकेपंचचांद्रायणेसार्द्धसप्तमिश्रचांद्रायणेतप्तकृच्छ्रेचपादेनचतस्रश्च कृच्छ्राति
कृच्छ्रेमहासांतपनेचषट् मासोपवासेपंचदशेत्याहुश्चे अथतीर्थप्रत्याम्नायाः ब्रह्महत्याव्रतमुपक्रम्य
भविष्यत्पुराणे विंध्यादक्षिणतोयस्यनिवासःपरिकीर्तितः पराशरमतंतस्यसेतुबंधस्यदर्शनं विंध्यो
त्तरवर्त्तिनस्तुत्वा न चैव चान्द्रविद्योपपन्नस्तुविधिवन्नाव्यानके सप्तदर्शनेनगमनेप्रायश्चित्तं विनि
र्दिशेत् स्वल्पपर्यवसाने च भागीरथ्यांस्नानंषष्ठियोजनगतस्यषड्ढ्रसमं अत्रयात्रायोजनहृद्वाव
ईकृच्छ्रवृद्धिः एकयोजनागतस्यमध्येपर्वतादिभिर्व्यवधानेकृच्छ्रत्रयं तृतीयांशाधिकक्रोशागा
तस्यभागीरथ्यांविधिवत्स्नानमेकःकृच्छ्रः अर्धक्रोशस्यचद्वियोजनागतस्यप्राक्रस्यापिमार्गसङ्गम
तेभागीरथीस्नानमद्वियोजनागतस्यैकः कृच्छ्रापादिकल्पयंति प्रयागस्नानेषष्ठियोजनागतस्यद्वाद

25

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शाहृसमं गंगाद्वारेगंगासागरसंगमेचैव यमुनायाःनंविंशतियोजनागतस्यद्वादशकृच्छ्रसमंमथुरायांद्विगु।
णं सरस्वत्यांचचतुर्दशकृच्छ्रसमं चत्वारिंशद्योजनागतस्य प्रभासेद्वादशवत्यांचाद्विगुणं अनयोर्नद्योः
योजनहीनंड्योगादकृच्छ्रद्धिः शतद्रूरिरावतीविपाशावितस्तापारावतीमरुद्वृधादिषुस्नानंविंशत्कृच्छ्र
समंपंचदशयोजनागतस्य चंद्रभागावेत्रवतीसरयूगोमतीदेविकाकौशिकीगंडकादिदेवनदीषुत्रिं
शत्कृच्छ्रसमंद्वादशयोजनागतस्य एतासुमहानदीषुपरस्परसंगमेत्रिनदीफलम् अमासुमहानदी
षुषट्कृच्छ्रसमंमहानदीषुमहानद्यर्धं शोणामहानदेगंगाईफलं नदेषुनद्यर्द्धंवेरोचननदेमहानद्य
र्धं नर्मदायांचचतुर्विंशतियोजनागतस्यचतुर्विंशतिकृच्छ्रसमं कुब्जिकासंगमेद्विगुणं शुक्लतीर्थेचत्रि
गुणं ताप्त्यांदशकृच्छ्रसमंदशयोजनागतस्य पयोष्ण्यामष्टयोजनागतस्याष्टसमं तत्रतत्रसंगमेद्वि
गुणं गोदावर्यांषष्टियोजनागतस्यषाड्समं त्रिंशद्योजनागतस्यैकादशं तत्तीर्थेषुप्रतिलोमानुलोम
स्नानंषष्टिकृच्छ्रसमं वंजरासंगमेप्रयागेद्विगुणांसप्तगोदावरीभीमेश्वरेत्रिगुणं कुशानर्दशोवंजराया
द्वादशयोजनागतस्यद्वादशकृच्छ्रसमं गोदावर्याविश्लेषेसमुद्रान्तेषड्गुणं प्रणीतायांचतुःकृच्छ्र
समं चतुर्योजनेषण्णांमानदइंयोजने कृष्णवेण्यायांपंचदशयोजनेपंचदशकृच्छ्रसमं तुंगभद्रा।
यांविंशतियोजनागतस्यविंशतिकृच्छ्रसमं मलापहारिण्यामष्टकृच्छ्रसमंअष्टयोजनागतस्य निद्व।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सांपवृत्कृच्छ्रसमं षड्योजनागतस्य गोदावर्यां यात्रा योजनत्रयं द्वौ योजने पादकृच्छ्रः सिंहस्थे गुरौ सर्वत्र जाह्नवीस
मं कन्यास्थे गुरौ कृष्णवेण्यायां सर्वत्र जाह्नवीसदृशं तुंगभद्रायां तुलास्थे गुरौ जाह्नवीसदृशं अन्यत्र तुंगभद्रायां तुला
स्थे रवौ जाह्नवीसदृशं कर्कटे रवौ च कृष्णवेण्यायां मलापहारिण्यां संगमे प्रयागे त्रिंशद्योजनगतस्य त्रिपादकृच्छ्रसमं
भीमरथ्याः संगमे प्रयागे हि दशगुणं तुंगभद्रासंगमे त्रिगुणं निवृत्तिसंगमे चतुर्गुणं ब्रह्मेश्वरे पंचगुणं पाताल
गंगायां मल्लिकार्जुने षड्गुणं ततः एवं षष्टिकृच्छ्रसमं लिंगालये दशगुणं समुद्रसंगमे चैवं कावेर्यां महानद्यां अपि
चतुर्दशकृच्छ्रसमं दशयोजनागतस्य ताम्रपर्णीकृतमालापयस्विनीषु द्वादशयोजने द्वादशकृच्छ्रसमं सह्यपा
दोद्भवा वेदाद्रिपादोद्भूता नद्यः सर्वे अनुसारेणाप्य कृच्छ्रत्रिकृच्छ्रफलप्रदाः विंध्यशैलोद्भवा हिमगाः हिमा।(
द्भूतास्त्रिगुणाः स्रोतोगताश्चतस्यापि कथं चिद्दूनक्षीणकल्पास्त्रिमात्रफलप्रदाः अल्पनद्यः कृच्छ्राः नद्यो
द्विकृच्छ्राः सर्वत्र यात्रानुक्रमेण कृच्छ्रसंख्या योजनसंख्या स्यात् एकयोजनगादिपंचयोजनगांताः स्रवंत्यः
कल्पाः ततो द्वादशयोजनगा अल्पनद्यः चतुर्विंशतियोजनगांतं नद्यः चतुर्विंशतियोजनाधिकगांतः
नद्यः चतुर्विंशतियोजनाधिकागा नद्यः समुद्रगाश्च महानद्यः यत्र महानदीसमाख्यास्तिता अमहानद्यः।(
उपवाससहितं नदीस्नानं कृच्छ्रसमं योजनादर्वागपि प्रसूनीगर्भ्यां चांडालीशूद्रीकष्टगादिनद्यः पापनद्यश्च व
र्ज्याः सर्वत्र समुद्रस्नानं दर्शे कार्यं देवतासमीपे सरः सरिन्नदीसंगमेषु सर्वदा कार्यं समुद्रस्नानं पंचदशयोजन

प्रा॰म॰
२३

28

गतस्य प्रख्यातदेवतासमीपे द्विगुणं तत्स्नानात्तद्देवतादर्शने त्रिगुणं सेतोर्गमनं त्रिंशत्कृच्छ्रसमं त्रिंशद्योजन
गतस्य स्नानाद्रामेश्वरदर्शने षष्टिकृच्छ्रसमं विंध्यदेशीयानां हेतुयमेश्वरजाह्नव्योश्च त्रिगुणफलं जाह्नवीके
दारयोस्तत्रैव दक्षिणदेशीयानां जाह्नव्यां षड्गुणं गंगादेशीयानां सेतुरामेश्वरे षड्गुणं स्कंददर्शने त्रिंश
त्कृच्छ्रसमं त्रिंशद्योजनगतस्य यत्र गंगासंगतास्तिष्ठेव श्रीरंगपद्मनाभपुरुषोत्तमचक्रकोटमहालक्ष्मीदर्श
नेलोणारस्थाने त्रिंशद्योजनगतस्य त्रिंशत्कृच्छ्रसमं केदारे त्रिगुणं सर्वत्रैव समाहेश्वरसोमरूपकादिपीठ
दर्शनेष्वपञ्चदशकृच्छ्रसमं प्रख्याते द्विगुणं अहोबलेपि तथा श्रीशैलप्रदक्षिणं षष्टिकृच्छ्रसमं श्रीशैलेप्र
कैकस्मिंगदर्शने द्वादशकृच्छ्रसमं अन्येष्वप्रख्याततीर्थदेवदर्शनेषु पादकृच्छ्रफलं सिद्धक्षेत्रे स्वक्षेत्रे च स्वयं
विष्णुदर्शने त्रिंशत्कृच्छ्रसमं त्रिंशद्योजनागतस्य सर्वत्र कृच्छ्रसंख्यया योजनसंख्या ज्ञेया इति तीर्थप्रसा
न्गयाः ॥ अथ पतितस्य हेतवः गौतमः ब्रह्महत्यासुरापगुरुतल्पगमातृपितृयोनिसंबद्धागो मातृष्व
सृपितृष्वसृस्वाम्रभगिनीगामीस्तेनस्तुवर्णतस्मनोः नास्तिको वेदाप्रामाण्यवादी अपतितत्यागी गु
रुमभिशाप्यतन्त्यागी पातकसंयोजकाः स्वसंसर्गेणाद्दोषहेतवद्गृनिसंश्च अपरार्केण पातकसंयोजकाः प्र
योजकादयस्तेपि पतिताइति एवं कल्पतरावपि यमः मातृष्वसा मातृसखी दुहिता च पितृष्वसा मातुला
नीस्वसा पुत्रस्त्री चास्य यः पतेन्नरइति सद्यः पतति मांसेन लाक्षया लवणेन च सप्व छत्राकं विड्वराहं च ल॰

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यसाधारणान्यायश्चित्तानि संवर्तः हिरण्यदानं गोदानं भूमिदानं तथैव च नाशयंत्याशु पापानि महापातकजा
न्यपि गौतमः संवत्सरः षण्मासाश्चत्वारस्त्रयो द्वावेकश्चतुर्विंशत्यहो द्वादशाहः षडहस्त्र्यहो होरात्र इति कालाः ए
तान्यनादेशे विकल्पेन क्रियेरन् एनःसु गुरुषु गुरूणि लघुषु लघूनि कृच्छ्रचांद्रायणादीनि प्रायश्चित्तानीति वि
ष्णुधर्मोत्तरे सायं प्रातस्तथा मध्ये वासुदेवस्य कीर्तनं सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते प्रभासखंडे श्रीभगवद्वाक्यं
नाम्नामनुस्मरतवनामसहस्रमाल्यं येपरंतप प्रायश्चित्तमशेषाणां पापानां मोचकं परं वाराहे वासुदेवस्य संकीर्त्या सुरा
पोध्यमितोपिवा स्मृतो जायते नियतं महाविल्वः सीदति गोविंदेति जपाप्रोक्तं भक्त्या वा भक्तिवर्जितैः दहते सर्व
पापानि युगांताग्निरिवोत्थितः विश्वामित्रः कृच्छ्रचांद्रायणादीनि शुद्ध्यर्थं प्रकारान्तरं अकामतो वत्सस्य च अग्रसंकेतं
प्रायेस्मृते प्राजापत्यः सांतपनः शिशुकृच्छ्रः पराकः अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यकृच्छ्रो तप्तकृच्छ्रः महासांत
पनः सिद्धे तप्तकृच्छ्रः स्यात्पावनः जलोपवासः कृच्छ्रः स्याद्ब्रह्मकूर्चः सर्वशोधकः एते व्रताः समस्ता वा व्यस्ता एकैकशो
शोधिता पातकादिभ्यः सर्वेषु उपवासेषु यत्नतः कार्यः संग्रहयशोधिकाः केवलावापिश्चनुद्वये शिशुचांद्रायणं
प्रोक्तं यतिचांद्रायणं तथा यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति उपवासस्त्रिरात्रं वा मासः पक्षस्तदर्धकं
षडहो द्वादशाहश्च कार्यं शुद्धिफलार्थिना उपपातकयुक्तानामनादिष्टेषु चैव हि अकामतो वा कामतो वा अभिसंधा
यपेक्षया जातिशक्तिगुणानपेक्ष्य सर्वकार्यं यथाक्रमं प्रकाशमुक्तं यत्किंचिद्धिंसा गोवधस्य च त्रिभागाः प

विभागः कलौ ज्ञात्वा यथापेक्षया । याज्ञवल्क्यः । अनादिष्टेषु पापेषु शुद्धिश्चान्द्रायणेन च धर्मार्थं यश्चरेदेतच्चंद्रस्यैति स
लोकता षट्त्रिंशन्मते त्रयाणां समुच्चयः प्रतिपादितः यानि कानि च पापानि गुरोर्गुरुतराणि च कृच्छ्रातिकृच्छ्रचां
द्रैस्तु शोध्यंते मनुरब्रवीत् निरपेक्षेपि प्राजापत्यमनुविधानमिति लघुदोषे त्वनादिष्टे प्राजापत्यं समाचरेदिति
द्वयोः समुच्चयमाह शंखः दुरितानां दुरिष्टानां पापानां महतामपि कृच्छ्रं चांद्रायणं चैव सर्वपापप्रणाश
नमिति दुरितमुपपातकं दुरिष्टं पातकं निरपेक्षपराकमाह मनुः पराको नाम कृच्छ्रोयं सर्वपापप्रणोदन
इति गौतमोपि प्रथमं चरित्वा शुचिः कर्मण्यः पूतो भवति द्वितीयं चरित्वा यत्किंचिदन्यन्महापातकेभ्यः पापं कुरुते
तस्मात्प्रमुच्यते तृतीयं चरित्वा सर्वस्मादेनसो मुच्यत इति प्रथमादिपदैः कृच्छ्रोतिकृच्छ्रः कृच्छ्रातिकृच्छ्रश्चोच्य
ते हारीतः चांद्रायणं पराकं च तुलापुरुषमेव च गवां चैवानुगमनं सर्वपापप्रणाशनमिति तथा गोमूत्रं गो
मयं क्षीरं दधि सर्पिः कुशोदकं एकरात्रोपवासश्च श्वपाकमपि शोधयेत् एतेषां सर्वेषां व्यवस्थोक्ता विष्णुपुरा
णे पापे गुरूणि गुरूणि स्वल्पान्यल्पे च तद्विदः प्रायश्चित्तानि मैत्रेय जगुः स्वायंभुवादयः भविष्ये एवं वि
धयभेदेन व्यवस्थाप्यानि पुत्रक प्रायश्चित्तानि सर्वाणि गुरूणि च लघूनि च अन्यथा हि महाबाहो लघूनां तु
पदे स्थानं गुरूणां तु पदे शो हि निष्प्रयोजनतां व्रजेत् गौतमः एनसि गुरूणि गुरूणि लघुनि लघूनि ॥ इति
साधारणप्रायश्चित्तानि ॥ अथ पापभेदाः विष्णुः अतिपातकमहापातकानुपातकोपपातकेषु प्रवर्तते

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जातिभ्रंशकरेषु संकरीकरणीपात्रीकरणेषु मलावहेषु प्रकीर्णेष्वपि ब्रह्महापापान्याह मनुः ब्रह्महत्यासुरा।
पानं स्तेयं गुर्वंगनागमः महान्ति पातकान्याहुः संयोगश्चैव तैः सह ब्रह्महत्या साक्षाद्ब्राह्मणमारणं अका
मकृतेन तस्मिन्प्रायश्चित्तमाह याज्ञवल्क्यः शिरःकपाली ध्वजवान्भिक्षाशी कर्म वेदयन् ब्रह्महा द्वादशाब्दानि
मितभुक् शुद्धिमाप्नुयात् शिरःकपाली खेट्टले विप्रशिरोऽस्थिधृक् ध्वजः आरोपितः शवशिरो दंडः यत्तु मध्य
मांगिराः गवां शतसहस्रं विधिवत्पात्रेभ्यः प्रतिपादयेत् ब्रह्महा विप्रमुच्येत सर्वपापेभ्य एव चेति तद्द्विगुणं सवन।
स्थेन ब्राह्मणो व्रतमादिशेत् द्विष्टेन द्वादशवार्षिकं द्विगुणं व्रतं चरणाच्छक्तिविषयं यत्तु पराशरः अमत्या द्वादशसंव।
त्सरान्षट्त्रिंशत्सार्धसंवत्सरं च व्रतमादिशेत् अमते गोसहस्रं तदर्धं तस्मार्धं च दद्यात् सर्वेषां वर्णानामानुपूर्व्वे
णेति तन्मातापितृभ्रातृगुर्वादिविषयं आनुपूर्व्वेणेति द्वादशाब्दं षडब्दं सार्धत्र्यब्दं नाम गोसहस्रं तदर्धं त
दर्धं तदर्धं नां सर्वेषां वर्णानां ब्राह्मणकाकर्त्तं बोधयति मनुर्द्वादशाब्दादिव्रतचतुष्टयं गोसहस्रादि च तत्त्रयसहि
तं ब्राह्मणादिवर्णचतुष्टयस्य तथा च पर्षद् ब्राह्मणानां तु सा राज्ञां द्विगुणा स्मृता वैश्यानां त्रिगुणा प्रोक्ता पर्ष
द्वच्च व्रतं स्मृतमित्यंगिरसा शूद्रो वा ब्राह्मणं हत्वा प्रायश्चित्तचतुष्टयमिति भविष्यवचनेन ब्राह्मणापेक्षयेत
रवर्णानामधिकप्रायश्चित्तविधानात् इदं च यावज्जीवव्रताचरणाशक्तस्य शक्तस्य तु भविष्यपुराणे मात
रं पितरं हत्वा सोदरं भ्रातरं तथा गुरुं हत्वा श्रोत्रियं च आहिताग्निमथापि वा यावज्जीवं व्रतं चीर्त्वा प्रतिहंता वि।

31

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मुच्यतीति एवंचयदापञ्चत्वेनोक्तं विप्रहाश्रपेक्षते तदा वाच्यमनः शवशिरोध्वजः प्रायश्चित्तमात्मशुद्धिरज्ञानाद्वा
दयेदित्युपक्रम्य एतदेवब्रह्मनमेतन्माडकृत्वाश्वमेधेन नास्मिंल्लोके प्रत्यापत्तिर्विद्यत इति तन्मात्रापित्रादिविषयं प्रायश्चि
त्तः प्रायश्चित्तमप्यवसैकदेशः ज्ञानमाडकृत्वासाधारणात् मनुः यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा अभिजि
द्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा जपन्वान्यतमं वेदं योजनानां शतं व्रजेत् ब्रह्महत्यापनोदाय मितभुङ्नियः
तेन्द्रियः सर्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत् धनं वा जीवनायालं गृहं वा सपरिच्छदं हविर्भुग्वाप्यनुस
रेत्प्रतिस्रोतः सरस्वतीं जपेद्वा नियताहारस्त्रिः कृत्वा वेदसंहितामिति सर्वस्वं वा धनं वा गृहं वेति प्रायश्चित्तत्रय
मिति वित्तानेश्वरः ज्ञानार्थं सर्वमेवैषः तच्चैतत्प्रायश्चित्तद्वयविधानार्थमिति मेधातिथिः पुनश्चै
तत् किं यत्सर्वस्वमित्याकांक्षायामनपायात् अन्यथाप्रायश्चित्तादिसर्वस्वदानेपि शुद्धिः स्यात् कामपपः आत्मतत्त्वं तु
वर्णावादपाद्वाविप्रतनुष्टिक्रादिति एतेषां च प्रायश्चित्तानां व्यवस्थोक्ता भविष्ये जातिमात्रं यदा विप्रं हन्यादम
तिपूर्वकं वेदविद्याग्निहोत्री च तदा तस्य भवेदिदं जपन्वान्यतमं वेदं योजनानां शतं व्रजेदिति तत्रैव जातिमा
त्रं यदा हन्याद्ब्राह्मणं ब्राह्मणो गुरुः वेदाभ्यासविहीनो वै धनवानग्निवर्जितः प्रायश्चित्तं तदा कुर्यादिति पापवि
शुद्धये धनं वा जीवनायालं गृहं वा सपरिच्छदमिति एतस्मिन्नेव विषये पराशरस्त्वाह चातुर्विद्योपपन्नस्तु
विधिवद्ब्रह्मघातके समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दिशेत् सेतुबंधपथे भिक्षां चातुर्वर्ण्यात्समाहरेत् व

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गृंग्रामकुक्कुटं पलांडुं गृंजनं चैव मत्या जग्ध्वा पतेद्द्विजः यमः जलाग्न्युद्बंधनभ्रष्टाः प्रव्रज्यानाशकच्युताः वि
षप्रतपनं प्रायश्चित्तं शस्त्रघातहताश्च ये नचैते प्रत्यवसिताः सर्वलोकबहिष्कृता इति उपनयनगौणमुख्यका
लातिक्रमे व्रात्यानां पातित्यमाह याज्ञवल्क्यः अतऊर्ध्वं पतंत्येते सर्वधर्मबहिष्कृताः सावित्रीपतिता व्रा।
त्या व्रात्यस्तोमादृते क्रतोः आश्वलायनोपि अतऊर्ध्वं पतितसावित्रीका भवंति नैतानुपनयेन्नाध्यापयेन्न।
याजयेन्नैभिर्व्यवहरेयुरिति अत्रिः आरूढपतितं विप्रं मंडलाच्च विनिःसृतं उद्बद्धं कृमिदष्टं च स्पृष्ट्वा चां।
द्रायणं चरेत् आरूढो नैष्ठिकस्थः यतिः आश्रमी ब्रह्मचर्यसंवत्सरान् द्विजातिकर्मानधिकारी मंडलाच्च
सजातीयेभ्यो विनिःसृतो बहिर्भूतः उद्बद्ध उद्बंधनाद्युत्क्रान्तसृता कृमिदष्टः स्वादिष्टप्रादेशेनोत्पन्नकृमिः
मनुः चांडालांत्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति गौतमः।
नस्त्रीषु गुरुतल्पं पतंतीत्येके भ्रूणहनने हीनवर्णसेवायां स्त्री पततीति मातृपितृयोनिसंबद्धागः प
ततीत्यस्यापवादः तासु गर्वगमना व्यतिरिक्तास्तु गच्छन्नपि न पततीत्येके मन्यंते किंतु प्रायश्चित्तीयते गौत
मस्तु पततीति मन्यते सोयं बुद्ध्यबुद्ध्यापेक्षोभ्यासानभ्यासापेक्षो वा व्यवस्थितो विकल्प इति भर्तृयतः
भ्रूणहनने गर्भवधे हीनसेवायां स्वापेक्षया हीनवर्णपुरुषगमने प्रतिलोमगमने च याज्ञवल्क्यः नीचा।
भिगमनं गर्भपातनं भर्तृहिंसनं विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवं अपि ब्राह्मणब्रह्महत्यादीस्तु पापा

33

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उ
प्रा.स.
२४

34

तत्कान्यप्यप्सु तानि नीचोहीनवर्णस्तद्गमनं च गर्भो भ्रूणस्तं अत एव व्यभिचारादत्तौ शुद्धिर्गर्भत्यागो विधी-
यते गर्भभर्तृवधादौ च तथा महापातकरूपतिर्याज्ञवल्क्यवाक्ये शूद्रकृते गर्भ इति प्राचां व्याख्यानं ब्राह्म
णादत्र विप्रा भार्याः शूद्रेण संगताः अप्रजाता विशुद्ध्यंति प्रायश्चित्तेन नेतरा इति वासिष्ठात् यत्तु शौनकः पुरुष
स्य यानि पतननिमित्तानि स्त्रीणामपि तान्येव ब्राह्मणी हीनवर्णसेवायामधिकं पततीति तत्र हीनवर्णसेवाग
र्भितशूद्रगमनं प्रतिलोमगमनमात्रं च वसिष्ठः त्रीणि स्त्रियः पातकानि लोके धर्मविदो विदुः भर्तृवधो भ्रू-
णहत्या स्वस्य गर्भस्य पातनं भ्रूणहत्योक्तिर्द्वयं तार्थो वसिष्ठः चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या पतिघ्नी
च विशेषेण जुंगितोपगता च या जुंगितः प्रतिलोमजः शिष्यगमनादीनामपि पातित्यहेतुपतिवधसाहचर्यात्पा
तित्यहेतुत्वं त्यागश्च वस्त्रान्नगृहवासादिजीवनहेतुविच्छेदेन नीचाभिगमनादावपीदृगेव त्यागः प्रायश्चित्त
चिकीर्षंतीनां त्वत्यागमाह याज्ञवल्क्यः पतितानामेष एव विधिः स्त्रीणां प्रकीर्तितः वासो गृहांतिके देयमन्नं वासः
सरक्षणं मनुः पतत्यर्द्धं शरीरस्य यस्य भार्या सुरां पिबेत् पतत्यर्द्धशरीरस्य निष्कृतिर्न विधीयत इति द्विजाति
भार्यायाः शूद्रायाः सुरापाननिषेधार्थमिदमिति विज्ञानेश्वरः माधवस्तु ब्राह्मणादीनामप्ययं निषेधः स्त्रिया भ
र्तुः संसर्गेपि दोषार्थं तत्रबाधं सहाधिकारात्स्त्रियाश्चार्द्धशरीरत्वं पतितमर्द्धशरीरं यस्येति बहुव्रीहिरित्यूचे तत्र
ब्राह्मणादीन्प्रति निषेधे वचो वैयर्थ्यापत्तेः बहुव्रीहौ लक्षणापत्तेश्च अतो विज्ञानेश्वर एव सम्यगूचे ॥ अ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ध्यादिनिर्यातनार्थं संयमनादिप्रवेशनं तथा दाहच्छेदसिराभेदैः प्रयोगैरुपकुर्वतां द्विजानां गोहितार्थं तु प्राय
श्चित्तं न विद्यत इति, तथा कूपखातेऽथवा धर्मार्थं गृहदाहे च यात्सता ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यत
इति एतच्च बंधनादि बहिनासैव कर्षणं विहृद्दनादिविषयं इतरथा त्वापस्तंबः कांतारेषु च दुर्गेषु गृहदाहेस
लेषु च यदि तत्र विपत्तिः स्यात्तस्मात्पादो विधीयत इति पराशरः दहनात्तु विपद्येत अनड्वान्योक्त्रयंत्रितः
उक्तं पराशरेणैव ह्येकपादं यथाविधीति बलबलादिनाम्नेन कालिलेरी धारसौ त्वापस्तंबः पादमेकं चरे
द्रोधे द्वौ पादौ बंधने चरेत् योजने पादहीनं स्याच्चरेत्सर्वं निपातन इति पराशरः गवां बंधनयोक्त्रैस्तु भ
वेन्मृत्युरकामतः अकामकृतपापस्य प्राजापत्यं विनिर्दिशेत् प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोज
नं अनडुत्सहितां गां च दद्याद्विप्राय दक्षिणामिति व्यासः कंठाभरणदोषेण विपत्तिर्यत्र गोर्भवेत् गोघ्न
स्यार्धं चरेत्तत्र भूषणार्थं हि तत्स्मृतमिति आपस्तंबेनातिदाहादौ विशेष उक्तः अतिदाहातिवाहाभ्यां
नासिकाच्छेदने तथा नदीपर्वतसंरोधे मृते पादोनमाचरेत् अस्यापवादमाह पराशरः अन्यत्राकेन
लत्रानंबाहनेमोचने तथा सायंसंगोपनार्थं च न दुष्येद्रोधबंधने इति पराशरः अतिदाहे चरेत्पादं
द्वौ पादौ वाहने चरेत् नासिक्ये पादहीनं तु चरेत्सर्वं निपातन इति नासाभेदनदाहेषु कर्णच्छेदनबंधने
अतिदाहातिवाहाभ्यां कृच्छ्रं चांद्रायणं चरेदिति तत्कपिलत्वापनेकगुणावहविषयमिति स्वामिनो गो

35

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रा॰ म॰
३२

रुपेक्षणो प्रायश्चित्तमाह व्यासः गलेघंटालग्नमात्रे वा विशुद्धा गो विवा स्वयं वा पतिता वा कस्मात्कूपादेनापि
भग्ना मात्रा वत्सं च वेदात्कृच्छ्रं गोस्वामीत्युक्तमुक्तमं शीतवात हता वा स्फोटं बंधनमृता पि वा गृहागारूपे
तायां मृता प्रायश्चित्तं विनिर्दिशेदिति स्वामीनि पालस्य तु स्वलक्षणं सत्कार्यमिति बैयाग्राऽऽवेत्तायां त्वर्द्धं अ
नवबिस्तः पल्लोत्रमस्तात्मात्र स्वयमदादिति पालने स्वयं अपतात सर्पादेर्दर्शनेऽकृच्छ्रार्द्धमाचरेदिति अ
नवस्थ पालनात्तत्कृच्छ्रः स्यात्कृच्छ्रयाणां तत्रैव च पतने नैवो पेत्तायां प्राजापत्यकृच्छ्रः आपस्तंबः अ
स्थिभंगे तत्रवांकुल्यालां मूलच्छे रसं तया पादं तदं तमृंगाणां मासार्द्धं तत्पयवात्पिबेदिति एतत्कामतः
अकामतस्तु अंगिराः शृंगभंगे स्थिभंगे चाचर्मनिर्मोचने पि वा दशरात्रं पिबेद्धं यावत्स्वस्था पि यदि गौर्भ
वेदिति पराशरः पाषाणैर्न वदंडैर्न गावो येनाभिघातिताः शृंगभंगे चरेत्पादं द्वौ पादौ नेत्रघातने लांगू
लेपादकृच्छ्रं तद्द्वौ पादास्त्वस्थिभंजने त्रिपादं चैव कर्णे तु चरेत्सर्वं निपातने इति एतदेव शृंगभंगे स्थिभं
गे च कटिभंगे तथैव च यदि जीवति षण्मासान्प्रायश्चित्तं न विद्यत इति व्यासः एवं संचोपहतं यावद्
द्रोहे तत्तदुक्तं संस्पर्शं दन्तिषां दयाद्गुनः पापान्मुच्यते पराशरः पराः स्पर्शनं सर्वांगो हीनदेहो भवेत्तदा
गोघातकस्य तस्यार्द्धं प्रायश्चित्तं विनिर्दिशेत् एतदेव मेरयेत्कूपवापीषु वृक्षच्छेदेषु पातयेत् नवोस्माने
षु विक्रीणीततः प्राप्नोति किल्बिषमिति कूपवाप्यादि निम्नेषु पातनात्पिंडहस्तच्छेदे स्नादि दुर्गमेषु भवता॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

र्थमेवगोमांसादानत्सलेगोविक्रयेचगोवधप्रायश्चित्तमर्थः एवं गोहत्यातांविषयेनैवपावंतःमेवेका।
न्यः अनिवारयतांतेषांसर्वेषांप्रायत्कंभवेत् संभावितेगोमरणेदेशेस्वोपभोगार्थंकूपादिखननेदोषमा
ह एवं वेश्मद्वारनिवासेषुधर्मार्थनःस्वानमिकृति स्वकार्यकृतेखानेषुप्रायश्चित्तंविनिर्दिशेत् स्वकार्य
परार्थमार्गेनदोषः तथाच एवं कूपखानेनदारुखानेदीर्घखानेनथैवच अन्येषुधर्मखातेषुप्रायश्चि
त्तंनविद्यतइति दीर्घखानंवाप्यादि अत्रस्वयमेवमस्याधर्मार्थगतेमृतेचनदोषइत्याह एवं कूपखातेनदा
रुबंधेनदीर्घबंधेमिर्यावच पानीयेषुविपन्नानांप्रायश्चित्तंनविद्यते एवं निशिबंधनिरुद्धेषुसर्पव्याघ्रहतः।
तेषुच अग्निविद्युद्विपन्नानांप्रायश्चित्तंनविद्यते नत्रहितार्थेविहितस्तुबंधेनेषं अपवादंव्यासः।
अप्यावचेदवेक्ठंकासार्धगोगोपतेर्मृते गोभ्योपाततुसंनिध्यंप्रायश्चित्तंवावदंपिबेदिति एतद्विवित्त।
ब्रवंधपदं रज्जुविधिनिषेधोप्यागतौ ननारिकेलैर्नचबाणीवर्कैर्लैर्नवापिमौंजेनचशृंखलैः एते
स्तुगावोनिबंधनीयायवद्यान्नतिष्ठेत्परशुंगृहीत्वा ॥ अत्रगोवधेविशेषमाह मनुः योयसहिंसा
द्भुताशिजानतोज्ञानतोपिवा सनस्तेनात्पस्येन्त्रिंशंहिंसरस्यचतत्समं पराशरः प्रमापणेप्राणभृतां
दद्यात्तत्प्रतिरूपकं तस्यानुरूपंमूल्यंवाइत्याहदिग्रवौयमः छागं आसैगोपतयेदत्वागोहस्याप्रा
युकल्पितमिति एतानिचसर्वाणिप्रायश्चित्तानिवृषभेपिभवंति निमित्ततयाकोगवामनुवादेनगतज्ञ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३
प्रा॰म॰
२२

तस्त्रीलिंगस्याविवक्षितत्वात् हननं तु स्त्रीगवीनामेव तच्च कोटवधे विधेयत्वेन तत्र न स्त्रीत्वस्य विवक्षितत्वा
त् गोसहस्रं शतं वा पौन्सायौ लिंगविशेषनिर्देशाभावेऽपि स्त्रीगवीनामेव तासां तु स्पर्धादिद्वारा बहूपका
रकत्वात् अत एव गोऽश्वाश्वश्चाश्वतरश्चेत्यत्र लिंगविशेषानिर्देशेऽपि तत्सहस्राद्युपात्तं दद्याद्गोतिन
छन्देनाश्वादीस्तिरश्चामगोपशाम स्त्रीरूव स्त्रियाः एवा स्त्राश्च हरणे बहूपकारकत्वमेव निदानमिति भा
ति अन्यथा तत्रहरणमपि दानमापद्येतेति दिक् याज्ञवल्क्यः गजे नीलवृषाः पंच शुके वत्सो द्वि
हायनः खराजमेषेषु वृषो देयः क्रौंचे त्रिहायनः मनुः वासो दद्याद्धयं हत्वा पंच नीलान्वृषान्गजं अ
जमेषावनड्वाहं खरं हत्वैकहायनमिति एतानि प्रायश्चित्तानि धनिकविषयाणि निर्धनस्य तु जा
बालिः हस्तिनं तुरगं हत्वा महिषं गां तथैव च कृच्छ्रं सांतपनं कुर्याद्गोभूकन्यान्तेषु वा विष्णुः हस्तिनं
तुरगं हत्वा महिषोष्ट्रौ कपिं तथा एषु सर्वेषु कुर्वीत सप्तरात्रमभोजनं इदमभ्यासविषयं अस्मिन्नेव
विषये सिंहव्याघ्रतरक्षूंश्च मृगखड्गरुरुहिपान् हत्वा सांतपनं कुर्याद्गोभूकन्यान्तेषु च सुमंतुः
वानरसिंहमार्जारमंडूकमूषकाश्ववधे प्राजापत्यमिति पराशरः हत्वा मूषकमार्जारसर्पाजगर
डुंडुभान् कृसरं भोजयेद्विप्रांल्लोहदंडं च दक्षिणेति विष्णुः हत्वा मूषकमार्जारनकुलमंडूकडुंडुभा
जगराणामन्यतमं कृसरान्नं भोजयित्वा लोहदंडं दक्षिणां दद्यात् यत्तु शंखः हत्वा द्विजस्तथा सर्पं बिले

38

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राप्यजलेश्मयो समरात्रं तथा कृच्छ्रं तंकृच्छ्रमवधेनचरति तत्कामकृते प्रत्योपपन्ना खरमार्जारमंडूकसर्पाजगर
मूषकान् हत्वा कृच्छ्रं द्वादशरात्रं चरेत्किंचिद्द्यादिति तत्कामाभ्यासे विषयः श्वानं हत्वा त्रिरात्रमुपवसेदिति
यत्तु माधवीये पैठीनसिः काकोलूककाककलासकर्कटबकबलाककालभासबर्हिणमूषकचक्रवाकहंसम
वनकुलमंडूकविडालश्ववधे एतेषामेकैकस्मिन्कृच्छ्रमवधेवद्धिहितमिति तत्कामकृतोत्पन्नाभ्यासविषयं म
नुः हत्वा तु रूपेण ब्राह्मणो चरणीयेद्धारसगणायथा क्रव्यादस्तु मृगान्हत्वा धेनुं दद्यात्पयस्विनीं अक्रव्यादो व
त्सतरीमुष्ट्रं हत्वा तु कृष्णलं सएव अग्निकार्यं [illegible] दद्यात्सर्पं हत्वा द्विजोन्नमः पलालभारकं षंडे से।
सकं चैव माषकं तित्तिरौ तु तिलद्रोणं गवादीनामप्राप्त्यवत् दानदानं च वल्कृच्छ्रमेकैकस्य विशुद्धये प्रत्येकं
प्राजापत्यं कुर्यादिति केचित् विज्ञानेश्वरस्तु हत्कृच्छ्रपदं तपोमात्रपरं तपांसि च संवत्सरः षण्मासास्त्रयश्च
त्वारो द्वावेकश्चतुर्विंशत्यहो द्वादशाहः षडहस्त्र्यहमहोरात्रश्चेतिकालाः एतान्येवानादेशे विकल्पेन क्रियेर
न्नेनसि गुरुणि गुरूणि लघूनि लघूनीति गौतमोक्तानि तानि दानतारतम्येनव्यवस्थानीयाह याज्ञवल्क्यः
अस्थेश्वापयसो दंडः पंडके त्रपुसीसकं कोले घृतघटो देय उष्ट्रे गुंजाहयेंशुकं कोलः सूकरः पंडकः स्यान्मृग
पतिसमभिव्याहारात्सएव नतु गोविप्रादिः नत्वनुतन्ह्ययानि मित्तमेव लघुप्रायश्चित्तमिति विज्ञानेश्वरः।
सम्मत्वयथा गोब्राह्मणावधनिषेधस्यजात्यवच्छेदेनैवप्रवृत्तेर्नतज्जातीयपंडवधेऽदंप्रायश्चित्तं तथा मृग

39

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द्विजातिपुरस्कारेणापि प्रायश्चित्तस्योक्तत्वात् तत्रापि न प्रवर्तते अतो यज्जातिविशेषपुरस्कारेण प्रायश्चित्तं।
नोक्तं तज्जातीयपंक्तवधएवैतत्प्रायश्चित्तमिति प्रतिभाति माधवीये कच्छपपन्नगमहिषवराहकुंजरगंड
शरभतरक्षवानरसिंहव्याघ्रशरभसरघल्लकादीनामन्येषांच वधेशोत्रोचितमक्षीतांति हृत्तं दद्यात् व्यासः।
सर्वांश्च प्राणिनः स्थूलान्मंडूकनकुलेष्वर्हमिति इदमज्ञानतः सकृद्वधे ज्ञानतस्तु याज्ञवल्क्यः मार्जारगो
धानकुलमंडूकांश्च पतत्रिणः हत्वाप्यहं पिबेत्क्षीरं कृच्छ्रं पादिकं चरेत् विष्णुः गोधोलूकचाषकाक
वधे त्रिरात्रमुपवसेत् व्यासः सूकरोष्ट्रखरान्हत्वा त्र्यहमेतद्व्रतं चरेत् यत्तु वसिष्ठः श्वमंडूकमार्जार
नकुलसर्पदर्दुरमूषकान्हत्वा कृच्छ्रं द्वादशरात्रं चरेत् तदकामतोऽभ्यासविषयं दर्दुरोल्वमूषकः यत्तुम।
नुः मार्जारनकुलौ हत्वा चाषं मंडूकमेवच श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत् शूद्रहत्याव्रतं।
षाण्मासिकं पिबेत्पयस्त्रिरात्रंवा योजनं वाध्वनो व्रजेत् उपस्पृशेत्स्रवत्यां वा सूक्तं वाऽब्दैवतं जपेत् परा
शरः वृककाककपोतानां मारी तिस्त्रिदिवानक्तः अंतर्जले उभे संध्ये प्राणायामेन शुध्यति वृत्तपत्र
विशेषः संध्ये इत्यत्र संयोगे द्वितीया अतो यावद्भिः प्राणायामैः संध्याद्वयं समाप्यते तावतः
कुर्यात् प्राणायामेनेत्येकवचनमविवक्षितमिति माधवी इदं कामतः सकृद्वधे -------
णापिंगलाजगरस्य च भारद्वाजादिकं हत्वा शिवं पूज्य विशुध्यति पराशरः भारुंडं चाषभासांश्च

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पारावतकपिंजलं पक्षिणां चैव सर्वेषां अहोरात्रमभोजनं यमसंवर्त्तः चक्रवाकं तथा तथा क्रौंचं
तित्तिरं शुकशारिकं गृध्रश्येनमुलूकं च तथा पारावतानपि टिट्टिभं जालपादं च मद्गुं कुक्कुटमेव च
एवं पक्षिषु सर्वेषु दिनमेकमभोजनं यदपि पराशरः क्रौंचसारसहंसांश्च चक्रवाकं च कुक्कुटं ।
जालपादं च शरभमहोरात्रेण शुध्यति यदपि स एव गृध्रश्येनशशादीनामुलूकस्य च घातकः ।
अपक्वाशी दिनं तिष्ठेत्त्रिकालं मारुताशन इति तदकामकृतवधपरं यमसंवर्तः हंसं बकं बलाकां
च मद्वाविधं बर्हिणं तथा सारसं चाषभासं च हत्वा त्रीन्दिवसान्क्षिपेदिति तदभ्यासपरमिति माधवः
यद्वंगिराः काके भासे च गृध्रे च टिट्टिभे खंजरीटके यथा गवि तथा हंसे भगवानंगिराब्रवीदिति न
कामतोभ्यासपरं अत्र धनिकस्तित्तिर्यादौ विशेषमाह मनुः घृतकुंभं वराहे तु तिलद्रोणं तु
तित्तिरिं शुकं द्विहायनं वत्सं क्रौंचं हत्वा त्रिहायनं धनिकस्य कामतो बलाकादिवधे माधवीये क
श्यपः बकबलाकाहंससारसकारंडवचक्रवाककुक्कुटश्येनखंजरीटटिट्टिभोलूकशुकशारि
कातित्तिरमयूरमूषककामेजनककलविंककपोतपारावतादीनां वधे प्रायश्चित्तमहोरात्रोपोषितः ।
सर्वबीजानि दद्यादिति धनिकस्याकामतो वधाभ्यासे तु याज्ञवल्क्यः हंसश्येनकपिक्रव्याज्जल
स्थलशिखंडिनः भासं हत्वा दद्याद्गामक्रव्यादस्तु वत्सिकां जलग्राहेन बकादयः स्थलग्राहेन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बलात्कारस्यइतिमिताक्षरायां याज्ञवल्क्यः किंचिद्देयंप्राणायामस्त्वनाहिताग्निकस्येति किंचिद्दृष्टमृष्टिधार्म्य
मनुः अस्थन्वतांतुसत्वानांसहस्रस्यप्रमापणे पूर्णेचानस्यनस्थांतुशूद्रहत्याव्रतंचरेदिति शूद्रहत्याव्रतंषा
एमासिकं अथात्मघाते ॥ यमः जलाग्न्युद्बंधनभ्रष्टाःप्रव्रज्यानाशकच्युताः विषप्रपतनप्रायःशस्त्रघात
हताश्चये नवैतेप्रत्यवसिताःसर्वलोकबहिष्कृताः चांद्रायणेनशुद्ध्यंतितप्तकृच्छ्रद्वयेनचेति आत्मघा
तिनआदिष्टनजातीयवधप्रायश्चित्तमस्यसुचिन्तमेवकुर्यात् मरणमध्यवसानिवृत्तेन वसिष्ठः आत्महन
नाध्यवसायेजीवन्नात्मत्यागीकृच्छ्रंद्वादशरात्रंचरेत्त्रिरात्रंचोपवसेदिति एतदल्पाध्यवसाये अग्निपा
तादिबहुध्यवसायेतु पराशरः जलाग्निपतनेचैवप्रव्रज्यानाशनेषुच प्रत्यावसितवर्णानांकथंशुद्धि
र्विधीयते प्राजापत्यद्वयेनैवतीर्थाभिगमनेनच वृषैकादशदानेनवर्णाःशुद्ध्यंतितेत्रयः ब्राह्मणस्य
प्रवक्ष्यामिवनंगत्वाचतुष्पथे सशिखंवपनंकृत्वाप्राजापत्यद्वयंचरेत् गोद्वयंदक्षिणांदद्यात् शुद्धिंपारा
शरोब्रवीत् मुच्यतेतेनपापेनब्राह्मणत्वंचगच्छतीति अध्यवसायाद्याहांगिराः यःप्रत्यवसितोवि
प्रःप्रव्रज्याग्निजलादिभिः अनाशकोनिवृत्तस्तुगृहस्थत्वंचिकीर्षति चरेयेत्त्रीणिकृच्छ्राणित्रीणिचांद्रा
यणानितु जातकर्मादिभिःप्रोक्तैःपुनःसंस्कारमर्हति वेधमरणमध्यवसायत्यजतोत पराशरः ज
लाग्निपतनेचैवंप्रव्रज्यानाशनेतथा अध्यवसाननिवृत्तानांप्रायश्चित्तंकथंभवेत् ब्राह्मणानांप्रसा

42

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देनतीर्थानुसरणेनच गवांचग्रानदानेनवर्णानामुद्धृतिनेत्रयः ब्राह्मणस्यप्रवक्ष्यामिगत्वारण्यंचतुष्पथं स
शिखंवपनंकृत्वात्रिसंध्यमवगाहनं गायत्र्यष्टसहस्रंतुजपेदेवदिनेदिने मुच्यतेसर्वपापेभ्योब्राह्मणत्वंच
गच्छति भिक्षार्थीप्रविशेद्ग्रामंसहस्रान्मुच्यनेवत्सरनु धीनसमश्नीयाद्भक्षार्थेनविमुच्यतीति अनुगमनानि
कृत्वोत्वापस्तंबः चितिभ्रष्टात्तुयानारीमोहात्प्रचलितानतः प्राजापत्येनशुद्ध्येत्तस्माद्धेपापकर्मणाइति
आत्मघातिनिमित्तक्रियायांतु वसिष्ठः यआत्मघातिनःकुर्यात्स्नेहात्प्रेतक्रियानरः सतप्तकृच्छ्रसहितंचरे
च्चांद्रायणव्रतं उशना मायोनाथकमस्त्वाग्निविषोद्बंधनत्योदके: कापाद्यैश्चात्मनोहंतुर्नदपक्वन्नसप्ती
रूपेः श्रृंगिदंष्ट्रिश्वचांडालविप्रैर्नाभिहतस्यच तथासंकरजातस्यनाकचोदकक्रियाविन्नयः तत्स्पर्शेयदिवा
कोपोदिनमेकमभोजनं अस्नानाहरनादौतुकृच्छ्रः सांतपनःस्मृतः बुद्धिपूर्वमनस्तस्यकृच्छ्रोगोमूत्रया
वकः तप्तकृच्छ्रोपिवाप्राक्तोमासंभिक्षाशनोपिवा कृत्वाचवहनादीनिप्रायश्चित्तमकुर्वतां तप्तकृ
च्छ्रयाकृद्रिरेकएवानुयायिनां आत्मघातनिमित्तंतुप्रायश्चित्तमकुर्वतां आत्मघातिपुत्रादीनामि
त्यर्थः च्यवनः आत्मघातकस्पर्शनवहनदहनेतप्तकृच्छ्रंचरेद्विंशतिगावोदक्षिणाब्राह्मणोघिति प
राशरः चंडालेनश्वपाकेनगोभिर्विप्रोहतोयदि आहिताग्निर्हतोविप्रोविषेणापिहतोपिवा लौकि
काग्निनासदग्धव्योमंत्रसंस्कारवर्जितः स्पृष्टाद्दग्धाचवोढाचसपिंडेषुचनस्ययः प्राजापत्यंचरेत्पश्चाद्वि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राणामनुशासनं दग्धास्थीनि तु नदीषु तीर्थेष्वालयेद्बुधः स्वादिभिश्च पुनर्दाहः स्वमंत्रेणाथ कर्त्तव्यः एतत्स्वबुद्धि
पूर्वकृतात्मघाते प्रायोनाशकशस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छतामिति गौतमोक्तेः ॥ अथ पापस्य तोय भवि
ष्ये चांडालगोब्राह्मणानि पश्चदंष्ट्रिसरीसृपैः प्रमादान्मरणे चांद्रं तप्तकृच्छ्रमथापि वा स्मरणपर्यंसारेव नमकृ
कृच्छ्रद्वयं पंचदशाहं कृच्छ्राणि वा कृत्वा दाहादिकार्यमिति अंगिराः अथ कश्चित्प्रमादेन म्रियते मृदकादिभिः तस्या
शौचं प्रकुर्वीत कर्त्तव्या चोदकक्रियेति ऊर्ध्वोच्छिष्टादिमरणोपरि अंगिराः ऊर्ध्वोच्छिष्टे ह्यधोच्छिष्टे अंतरिक्षेऽम्र
तिर्यदि कृच्छ्रत्रयं प्रकुर्वीत ह्यशौचमरणेपि च तथा ऊर्ध्वोच्छिष्टे ह्यधोच्छिष्टे अयोच्छिष्टे तथैव च अस्पृश्यस्प
र्शमरणे खट्वादौ मरणे तथा श्वानक्रव्यादसंस्पर्शे कृमिकीटोद्भवेपि च एतद्दोषानुसारेण प्रायश्चित्तं समाच
रेत् कृच्छ्रांस्त्रिषट्पंचदशांश्चान्द्रायणमथापि चेति श्वपाकाकृच्छ्रादिव्यवस्था ॥ अथ पर्युषितशवदाहे गालवः
दिवा वा यदि वा रात्रौ शवस्तिष्ठति कर्हिचित् तत्पर्युषितमित्याहुर्दहने तस्य का गतिः पंचगव्येन संस्नाप्य प्राजा
पत्यत्रयं चरेत् द्विजस्य शूद्रप्रेतानुगमने विष्णुः द्विजः शूद्रप्रेतानुगमनं कृत्वा स्रवंतीमासाद्य तन्निमग्नस्त्रिर
घमर्षणं कृत्वोत्तीर्य अष्टसहस्रं जपेदिति ॥ अथ सुरापाने सुरापैष्टीव सुरा वै मलमन्नानां पाप्मा च मलमु
च्यते तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति मनूक्तेः गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा य
थैवैका तथा सर्वा न पातव्या द्विजोत्तमैः ---------- क्तिः समदोषतयेतरनिंदार्थो अत एव भविष्यत्पुरा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

णे सुरा तु पैष्टी विज्ञेया न तस्याः स्त्रियन्ते समेषु नि उत्तरूपोपि पानसमाह्वात्मा एकं खार्जूरं तालमैक्षवं माध्वी-
कं सैरमारिष्टं मैरेयं नारिकेलजं समानानि विजानीयान्मद्यान्येकादशैव तु द्वादशं तु सुरामद्यं सर्वेषामधमं
स्मृतमिति द्वादशानि मद्यानि विप्रस्यानिषिद्धानि निःपेयं मद्यं ब्राह्मणो वर्जयेदिति स्मृतेः सुरा तु क्षत्रियविशोः

पि पूर्वोक्तमन्त्रक्तेः तत्र सुरापाने प्रायश्चित्तमाह याज्ञवल्क्यः बालवासी जटी वापि ब्रह्महापाव्रतं चरेदिति तच्च
द्वादशाब्दे प्रायश्चित्तान्तरमाह मनुः पिण्याकं वा कणान्वापि भक्षयेत्तु समा निशि समांश्चाब्दे कणान्वा भ-
क्षयेदब्दं पिण्याकं वा सकृन्निशीति मन्त्रक्तेः व्यवहारार्थमेव न तु परलोकार्थे नित्यं चापरार्के केचित्तु भक्षयेत्त्रिः स-
मा इति पेठुः मानवं तु व्रतं तान्यमेवोपाहुः परे समा शतीति बहुवचनान्तं पेठुः तत्र कपिञ्जलाधिकरणन्यायेनाब्द-
त्रयं भवति मानवीये एकवचनं तु जात्यभिप्रायेणेत्याहुः रूढं तु छर्दने सति ज्ञेयं एतदेव व्रतं कुर्यान्मद्यपा छ-
र्दने कृते पंचगव्यं च तस्योक्तं पवित्रं कायशोधनमिति व्यासोक्तेः गौडीमाध्वीः सुरापानेप्येतदेवेति विज्ञानेश्व-
रः यत्तु महापापिन उक्ता आपस्तंबः चतुर्थकालमितभोजनो यामुपेयात् स्थानासनाभ्यां विहरन् त्रिभिर्वर्षैः
पापमपनुदतीति यत्तु यमः बृहस्पतिसवेनेष्ट्वा सुरापो ब्राह्मणः पुनः समत्वं ब्राह्मणैर्गच्छेदित्येषा वैदिकी
श्रुतिः भूमिप्रदानं यः कुर्यात्सुरां पीत्वा द्विजोत्तमः पुनर्न च पिबेत्तां तु संस्कृतः स विशुद्ध्यतीति तानि यानि त्व-
स्मीयत्रैवार्षिकसमानविषयाणीति विज्ञानेश्वरः यत्तु भविष्ये अकामतः सुरां पीत्वा पैष्टीं संकुलनंदन क्व

४५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उ॰
प्रा॰ म॰
२७

46

कृतिकृच्छ्रोऽन्त्यैव पुनः संस्कारितः शुचिः कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशीति तन्मनुस्मृत्यन्त्ययोगा
र्थपानविषयं तथा च तत्रैव तथास्मिन्नेव विषये वासिष्ठपद्धिकीर्तितं यदिद्योगे गर्भे वेदेहुष्टो नेतस्यकत्यचन
कृच्छ्रस्यात्मनुस्मृतेष्टतन स्वैवशुद्धाइतः यत्तुमनुः अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यतीति मतिपूर्वमः
निर्देश्यं पाणांतिकमिति स्थितिरिति तत्रवालाणीपदं पेष्टीपरं अतराईन प्राणांतिकनिर्देशात् पूर्वाई तु
रागिपरमेव अत्रसंस्कारमात्रमेव प्रायश्चित्तमितिकेचित् तत्र अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्य
तीति तत्र कृच्छ्रान्वितेनेत्केवलेन विशुध्यतीति भविष्योक्तेः अज्ञानादोषधार्थमतएव बृहस्पतिः गो
डीमाध्वीं तथा पैष्टीं पीत्वा विप्रः समाचरेत् तप्तकृच्छ्रं पराकं च चांद्रायणमनुक्रमादिति स्नानाद्वानत्र
श्चपानसादिमद्यपानाभ्यासेऽऽसाद्यार्थेनयोरा हतिमाह यमः गोडावधिहितः कल्पश्चांद्रायणामः
घापित्वा अनभ्यासेनयो भूयस्ततः शुद्धिमवाप्नुयात् कामतः सकृत्पाने पराशरः मद्यपस्य द्विजः कु
र्यान्नदीं गत्वा समुद्रगां चांद्रायणे ततश्चीर्णे कुर्याद्ब्राह्मणभोजनं अनडुत्सहितां गां च दद्याद्विप्रेषु दक्षिणां
द्वंदं गवाधिकं प्राज्ञं प्राति अज्ञानतः सकृत्पाने तु विष्णुबृहस्पती पीत्वाप्रमादतो मद्यमतिकृच्छ्रं चरेद्द्वि
जः कारयेत्तस्य संस्कारं भस्मा विप्रांश्च भोजयेत् पराशरः द्वादशं तु वर्षकं वर्जं पानसादेर्भ्याग्यामसः स
द्योजातस्तु तं पीत्वा स्वराञ्छुद्धो द्विजोत्तमः स्तं तु त्रिरात्रं द्राक्षादिरसानां मादकत्वमेव द्रष्टव्यं अन्यथा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सद्योजातेद्वादशाहादवसिष्ठात् सुरासंस्पृष्टदूष्यसाज्ञानतोभक्षणेप्याह मनुः अज्ञानात्प्राश्यविण्मूत्रंसुरा
संस्पृष्टमेवच पुनःसंस्कारमर्हंतित्रयोवर्णाद्विजातयइति पुनःसंस्कारश्चपुनरुपनयनमितिनिबंधकृ
तः तस्यविधिरुक्तःसंस्कारमयूखे यत्तुसुमंतुः ब्राह्मणस्यसुरापस्यगमासान्धृतसमुद्रोदकस्नानं
सावित्र्यष्टसहस्रंजपकुर्यात्सप्तद्वित्रिरात्रमुपासत्तमकृच्छ्रेणाशुद्धोभवतीतित्रैवार्षिकविषयं कामतःस
कृत्सुरापाने याज्ञवल्क्यः सुरांवुघृतगोमूत्रपयसामग्निसन्निभं सुरापोन्यतमंपीत्वामरणाच्छुद्धिमृच्छ
तीति यत्तुवसिष्ठः अभ्यासेतुसुरायाश्चअग्निवर्णांसुरांपिबेदिति तत्कामपरं गोडमाध्वीमन्याभ्यासे
मन्याचात्यंताभ्यासेतु माधवीये व्यासः मद्यमद्यममन्द्यावाउतःपीत्वाद्विजोत्तमः ततोग्निवर्णांतांपीत्वाम्
तःशुद्धेत्सकिल्बिषात् ॥ अथाभक्ष्यभक्षणे विष्णुः अभोज्यानामपेयानामभक्ष्याणांचभक्षणे कृ
च्छ्रपादंविष्ण्यर्थचरेयुःद्विसप्तोथर्मं इदंचमतानात्स्वाहृज्ञदाणे तानतस्तुसंवर्तः अभोज्यंभोजनंकृ
त्वाब्रह्मतत्रविशोणमः गोमूत्रयावकाहारःसप्तरात्रेणशुध्यति अभ्यासेतुबृहस्पतिः अलेह्यानाम
पेयानामभक्ष्याणांचभक्षणे रेतोमूत्रपुरीषाणांशुद्धेश्चांद्रायणंचरेदिति शिष्टविगीतमात्रेतमाग्व
भंगादिष्वविशेषेणअपरार्के भरद्वाजः शिष्टानाभ्यंतियत्किंचिदन्नमूलफलादिकं नतज्जोर्य्यंद्विजाती
नांभुक्त्वाचोपवसेदहरिति अथविशेषतः तत्रज्ञानतोलशुनपलांड्वादौ अज्ञानात्सकृज्जग्धे बृहस्पतिः।

प्रा॰म॰
३८

लशुनं वृक्षकं चैव पलांडुं गृंजनं तथा। चांद्रायणं ज्ञानतो ज्ञानतः कृच्छ्रं चरेद्द्विज इति ज्ञानतस्तु याज्ञवल्क्यः पलांडुं विड्वरा
हं च छत्राकं ग्रामकुक्कुटं लशुनं गृंजनं चैव जग्ध्वा चांद्रायणं चरेत् गृंजनं लशुनतुल्यः कंद इति विज्ञानेश्वरः यदी
यं चूर्णं ग्राम्यकाः कंठशुद्धौ विदाह्यमदार्थं भक्षयंति स एव गृंजन इति माधवः विषदिग्धेन शल्येन यो मृगः परिहन्य
ते अभक्ष्यं तस्य तन्मांसं तद्धि गृंजनमिष्यते इत्यपरार्कः यत्तु हेमाद्रिमाधवौ गाजराख्यं मूलमिति तत्र हेमाद्रावेव
गृंजनं चुक्रिकां चुक्रं गाजरं पोतिकां तथेति ब्राह्मे निर्देशात् शातातपः लशुनं गृंजनं जग्ध्वा पलांडुं च तथाश्म
नीमित्युक्त्वा उपायनं पुनः कुर्यात् तप्तकृच्छ्रं चरेन्मुनिरिति चांद्रायणानुवृत्तौ विष्णुः लशुनपलांडुगृंजनविड्वराह
ग्रामकुक्कुटनरगोमांसभक्षणे सर्वेष्वेतेषु द्विजातीनां प्रायश्चित्तांते पुनः संस्कारं कुर्यादिति यत्तु मनुः छत्राकं विड्व
राहं च लशुनं ग्रामकुक्कुटं पलांडुं गृंजनं चैव मत्या जग्ध्वा पतेन्नरः अमत्यैतानि षट् जग्ध्वा कृच्छ्रं सांतपनं चरेत् ।
यतिचांद्रायणं वापि शेषेषूपवसेदहः तो अभ्यासे पतनं अज्ञानतो षड्धार्थं सकृद्भक्षणे सांतपनं दोषधार्थ्यमेवज्ञा।
नतः सकृद्ज्ञानतो अभ्यासे च चांद्रं पलांड्वादेकनाथ्यप्रयोगे तु नैव दोषः तथा च पलांड्वाद्यनुवृत्तौ सुमंतुः एतान्ये
वात्तरस्पर्शभिषक्क्रियायामप्रतिषिद्धानीति चतुर्विंशतिमते लशुनं गृंजनं चैव तथा राजफलं तथा उलीचैव द्वि
जो भुक्त्वा चरेच्चांद्रायणव्रतमिति तथा राजफलं उलीपलांडुः पराशरः पीयूषं श्वेतलशुनं हंता कंफलं गृंज
नं पलांडुं वृक्षनिर्यासं देवस्वं कवकानि च उष्ट्रीक्षीरमविक्षीरमज्ञानाद्भुंजते द्विजः स त्रिरात्रोपवासेन पंचगव्ये।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नश्यति पीयूषमचिरप्रसूतायागोर्दुग्धं सुमंतुः लशुनपलांडुगृंजनभक्षणेसोम्याविप्रमहस्त्रेणामूर्द्धिसंपाता
नयेदिति एतच्चसप्रवेशमात्रपरं मितास्तावांस्ततिः तिलकापायाकाच्छत्रकंकंसुभालाबुविड्वराह कुंभीकाके
षुहंताककोविदारांश्चवर्जयेत् तथाकालप्रसूतानि शुष्पाणि च फलानि च विकारवच्चयत्किंचित्प्रयत्नेनवि
वर्जयेदिति तथावत्सलाश्चदधित्यनीपकुंदवमानुलिंगफलानि वर्जयेत् यमः तंडुलीयककुंभीकब्रह्म
तप्रभवांस्तथा एतेषां भक्षणं कृत्वा प्राजापत्यं तु चरेदिति कामतोभ्यासेन हस्रयमः नालिकनालिकेरी
श्लेष्मातकफलानि च खड्गबालांकाकुंभीकब्रह्मनप्रभवांस्तथा भक्षणे शिग्रुकं चैव कुसुंभकबकानि
वा एतेषां भक्षणं कृत्वा चरेच्चांद्रायणं द्विजः द्विजपदाच्छूद्रादेर्निषेधः आपस्तंबः भक्षयेयदि लोभप्रमा
दाद्ब्राह्मणः क्वचित् चांद्रायणेन शुचिः स्यादापस्तंबोब्रवीन्मुनिरिति षट्त्रिंशन्मते श्वाविड्गोधाशल्लकिचक्रवनि
र्मथितं दधि वह्निर्बलदिग्धो ग्राम्यं जग्धाना पादहर्निशं कौर्मे अलाबुशिग्रुकं चैव जग्ध्वाप्येतद्व्रतंचरेत् उदुंब
रेकामेनतत्सकृच्छ्रेणशुध्यतीति शंखः माहिषं दधि साजं च भक्षयेदारेण निर्दिशेत् भुक्त्वापरस्य तद्भीरंमा
तंकुर्यात्तंतुषः अनिर्दशाहं गोक्षीरं माहिषं चाजमेव च गोक्षीरं विवत्साया संधिन्याश्च तथापयः स
धान्यमेध्यमलस्याया भुक्त्वा पक्षव्रतं चरेत् क्षीराणि याग्यभक्ष्याणि तद्विकाराशने बुधः सप्तरात्रं व्रतं कुर्यात् यत
त्तत्परिकीर्तितमिति अभ्यासेन संवर्तः अवत्सैकशफास्त्रीणां क्षीरं प्राश्य द्विजोत्तमः अनिर्दशायागोश्चैवत्रि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उ
मा॰म॰
३१

रात्रं यावकं पिबेत् इति अकामतोऽनभ्यासे तु शेषेषूपवसेदहरिति मन्त्रकृद् उपवासः इत्युक्तं द्वितीये तु शातातपः
उष्ट्रीक्षीरमानुषीक्षीरपानेषु पुनरुपनयनं तप्तकृच्छ्रं च कामतो मांसवत् संधिन्यनिर्दशायाश्च गोः क्षीरपाने
त्रयाणां मांसभक्षणे च प्राजापत्यं कपिलाक्षीरपाने विशेषमाहापस्तंबः क्षत्रियश्चैव ब्राह्मणस्यो वैश्यः शूद्रोऽथवा
पुनः यः पिबेत् कापिलं क्षीरं न ततोन्योस्त्यपुण्यकृत् भविष्यपुराणे कापिलं यः पिबेच्छूद्रो नरके स विपच्यते
शतवर्षं पिबेद्विप्रो विप्रः स्यात्स्वयाचकः अन्यथाकृतशेषपाने तत्र षड्कस्य कपिलाक्षीरपाने च्यवनेन त्र
त्र्यहेति ताद्रूप्यातिदेशः कृतस्तेन तस्य तद्वत्तप्तकृच्छ्रं तस्योऽस्यान्वायतामनादिष्टत्वात् ब्रह्मपुराणे हता
स्फेनं चूतान्नं मंडपीयूषमथ चाड्गोः दधिक्षीरमथान्नं च द्रव्यायाश्चैव गोः पयः अनिर्दशायाश्च तथा
संधिन्याश्च तथैव च सक्तुं मरिचान्नं च न खादेत् पर्युषितं दधि. जीर्णं तक्रमपेयं तु न स्रवाद्यं च फेनवत्।
प्रमादाज्जग्ध्वा तेषां पिबेद्व्रतं चरेदिति आड्गोः सद्यः प्रसूतायाः इत्याद्याद्याधादिना ॥ अथमां।
सभक्षणे मनुः नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं न भक्ष
येत् तत्र विशेषात् प्रायश्चित्तमकामतः सप्तकृच्छ्रं शेषेषूपवसेदहरिति मन्त्रकृत् कामतस्तु अनुपाकृतमांसा।
नीत्याद्युपक्रम्य मत्स्यांश्चकामतो जग्ध्वा सोपवासस्त्र्यहं वसेदिति अकामाभ्यासे मनुः अकामांस
भक्षणं च समरात्रं यवान्पिबेत् कामतोऽभ्यासे विष्णुः अनर्चितं वृथामांसं भुक्त्वा मासं पयसा वर्तेत

50

३१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ति नरमांसादिभक्षणे उशना नरमांसं चर्ममांसं च गोमांसं तथैव च भुक्त्वा पंचनखादीनां मद्यसानपनं
चरेत् स्मृत्यंतरे अश्वमांसं नराणां च विड्वराहं खरं तथा गवां च कुंजरोष्ट्राणां सर्वं पांचनखं तथा क्र
व्यादं कुक्कुटं ग्राम्यं कुर्यात्संवत्सरं व्रतं यमः मांसं मूत्रपुरीषाणि प्राश्य गोमांसमेव च श्वगोमायुक
पीनां च तप्तकृच्छ्रं विधीयते उपोष्य द्वादशाहं तु कूष्माण्डैर्जुहुयाद्घृतमिति अत्राद्यमकामतः का
मतोपरं हृदयमः भक्ष्यमांसाशने विशेषाव्रतं चान्द्रायणं चरेदिति बहिर्मांसमते अत्राविमहिष
मृगाणामामामांसभक्षणे केशानखर्धघर्षणोपवासेन निरूढं त्रिरात्रमत्तानाद्युपवास इति क्वचि
मांसभक्षणमनुज्ञानानियाज्ञवल्क्यः प्राणात्यये तथा श्राद्धे प्रोक्षितद्विजकाम्यया देवान्पितॄन्समर्
च्य खादन्मांसं न दोषभाक् मनुः न मांसभक्षणे दोषो न मद्ये न च मैथुने प्रवृत्तिरेषा भूतानां
निवृत्तिस्तु महाफलेति तदनुवादपरं न तु निषिद्धपरं निषिद्धाचरणस्य पापजनकत्वादिति कल्प
तरुकारः तत्र सत्यपि पूर्वार्धेनातिप्रसंगं तदेदिति निषेधे तात्पर्यं भोगमासिकेन तेन निषिद्धाचरणस्ये
ष्टप्रकारप्रयुक्तपापजनकत्वदर्शनात् न त्वतस्तु नात्र निषिद्धाचरणं पापजनकं किंतु प्रजापत
तिव्रतस्त्वमांसनिवृत्तसंकल्पः यथैकादश्यां न भुंजीतेति निषेधस्त्वपि व्रतविधिना भोजनाभावसं
कल्पः फलाय विधीयते एतेन गृहेपि निवसन्विप्रो मुनिर्मांसविवर्जनादिति याज्ञवल्कीयमपि व्याख्या

51

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तं एतस्य फलं सांवत्सरिकसंकल्पस्य वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः। मांसानि च न खादेद्यस्तयोः पुण्यफलं
सममिति मनूक्तेः। योगीश्वरः [illegible] नवेत्यनेन देवादिनानि पञ्चरोगमभिः संमितानि ज्ञसाचारो योऽहं सविधिनाप
मृत्युं हन्तेत्याह मनुः अनुमन्ता विशसिता निहन्ता क्रयविक्रयी संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः।
अत्र देवान्पितॄन्निति सामान्यतोऽनुज्ञातमप्यजादिमांसं विप्रेणाभक्ष्यं तथा च मनुः यक्षरक्षःपिशाचान्नं मद्यं
मांसं सुरासवं तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः। यत्तु मेधातिथिः निषिद्धमांसपरमेतदित्याह तत्
अविशेषनिषेधवैयर्थ्यापत्तेः नचायं दोषाभिप्रायार्थः प्रत्यहिं निषेधस्य निषिद्धविषयत्वमेव नियतं तत्र
निषिद्धविषयालाभाद्दोषातिशयः कल्प्यते यथा नन्दास्वभ्यङ्गनिषेधे सति पुनः षष्ठ्यां निषेधो दोषा
तिशयार्थः। केचित्तु मांसरसलोलुपा अपक्वमांसविषयत्वमस्याहुः। उपक्रमे यक्षरक्षःपिशाचान्नमित्युक्ते य
क्षादीनां च क्रव्यादत्वादपक्वमेव मांसमन्नं तथोपसंहारेऽपि देवानामश्नता हविरित्युक्तेः देवानां च हविः पक्वमेव भ
वति अतः पक्वमेव विप्रैर्भक्ष्यं नापक्वमिति तदुक्तं नहि यक्षादयः पक्वं नाश्नन्ति क्रव्यादत्वे तेषां पक्वालाभे अप
क्वमप्यश्नन्तीत्यभिप्रायेण। देवानां हविषामपि विदितं यथाहोत्रे हुतेऽर्जहोतीति चित्रायां च दधि मधु घृतं पा
नाउदकं तंडुलास्तत्संसृष्टं प्राजापत्यमिति तथा पयस्निकृतानां [illegible] पञ्चरूपाममांसस्यैव देवता
संबंध उक्तः तस्मादपक्वमांसमात्रनिंदार्थमेव उपसंहारोऽपि ब्राह्मणात्तत्पर्यर्थमेव अत्र विशेषः श्रीपितृचरणा

ज्ञानेद्वैतन्निर्णयेद्बुधः ॥ अथ ब्रह्मचारिणो मधुमांसभक्षणे देवलः अज्ञानान्मधुमांसे च यद्यश्नाति व्रती क्वचि
त् त्रिरात्रोपोषितः सम्यक्कुर्यान्निमेकां जले वसेत् हृदमन्तानन्तः सकृज्जप्त्वा तेन संवर्तः ब्रह्मचारी यद्यश्नीया
न्मधुमांसं कथंचन प्राजापत्यं तु कृत्वासौ मौञ्जीहोमेन शुध्यति मौञ्जीहोमः पुनरुपनयनं वसिष्ठः ब्रह्मचारी चेन्म
धुमांसमश्नीयादुच्छिष्टभोजनीयं वा द्वादशरात्रं चरित्वा व्रतशेषं समापयेत् सूतकभोजने चैवमिति शिष्टभोजनी
यं शिष्टभोजनयोग्यं विहितमित्यर्थः अभक्ष्यमांसादिभक्षणे प्रायश्चित्तं स्वकं तदपि कार्यं अपवादमाह देवलः अका
माद्यन्नं वाजसनेयेन दुष्यतीति अकामाद्यन्नं अकामभक्षितं तथा ब्रह्मचार्यधिकारे बौधायनः स चेद्व्याधीयीत
कामं गुरोरुच्छिष्टं भैषज्यार्थं सर्वं प्राश्नीयाद्येनेच्छेत्तेन चिकित्सेत् स यदागदः स्यात्तदुत्थायादित्यमुपतिष्ठेत् हंसः शुचिषदि
ति लघुहारीतः आमिषस्य तु मैथुने पञ्चगव्यमश्नाति स्तब्धनः कूष्माण्डविपक्वेन त्र्यहं हविरेण वर्जयेदिति ॥ अ
थ शारीरमलभक्षणे प्रायश्चित्तं तत्र मलानाह मनुः वसाशुक्रमसृङ्मज्जामूत्रविड्घ्राणकर्णविण्नखाः श्लेष्माऽ
श्रुदूषिकास्वेदो द्वादशैते मलानृणां प्रायश्चित्तमाह योगीश्वरः अज्ञानात्तु सुरां पीत्वा रेतो विण्मूत्रमेव च पु
नः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः पुनः संस्कारः पुनरुपनयनं एतच्च मतिपूर्वके शारीरमलभक्षणे प्रायश्चि
त्तैः समुज्जीवयन्नरतिशूलपाणिः एतत्त्रयमेव प्रायश्चित्तमित्यन्ये अज्ञानात्सकृज्जप्त्वा तेन संवर्तः विण्मूत्रभक्ष
णो विप्रः प्राजापत्यं समाचरेत् ज्ञानतः सकृज्जप्त्वा तेन अङ्गिराः प्राजापत्यं च रेतसे चातिकृच्छ्रं तु त्रिषु स्मरेत् कृच्छ्राणि

53

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कृच्छ्रं कुर्वीत विप्रो विण्मूत्रभक्षणादिति यत्तु वसिष्ठः मत्तामत्तप्रमत्तोन्मत्तानां प्रमादाद्भक्षणे कृच्छ्रातिकृच्छ्रौ हुतमाशनं पुनः संस्का
रो मूत्रपाने कृच्छ्रं मध्यं चरेत् कृच्छ्रं चैव विनिर्दिशेत् इति तदपि विप्रस्य मतिपूर्वं सकृद्भक्षणे अनिच्छया विषये गौतमः अमत्या मद्यपा
नेपयो हुतमुदकं वा पुनः प्रतिग्रहं तप्तानि सुमत कृच्छ्रः ततः संस्कारो मूत्रपुरीषरेतसां प्राशने चैवमिति यत्तु बृहस्प
तिः रेतोमूत्रपुरीषाणां प्राशने ब्राह्मणश्चरेत् इति तदमतिपूर्वाभ्यासविषयं केशादिभक्षणे बृहस्पतिमते केश
नखरोमादिप्राशने मतिपूर्वं त्रिरात्रमज्ञानादुपवासः यत्तु स्मृत्यन्तरं केशकीटनखलोमापयन्त्यः कंटकमेव च हेम
तप्तं घृतं पीत्वा ततस्तेन विशुध्यति तत्तु रजमात्रप्रवेशविषयं प्रचेताः अन्ने भोजनकाले तु मक्षिकाकेशदू
षिते अनंतरं स्पृशेदापस्तच्चान्नं भस्मना स्पृशेत् ॥ अथ त्रिया उच्छिष्टभक्षणे तत्रोच्छिष्टभक्षणे मनुः बिडालका
काखूच्छिष्टं जग्ध्वा श्वनकुलस्य च केशकीटावपन्नं च पिबेद्ब्रह्मसुवर्चलां पानं त्वेकस्मिन्नेव दिने एतच्चाकामतः।
सकृद्भक्षणे कामतस्तु विष्णुः पतितचाण्डालपुल्कसम्लेच्छश्वपाकान्नभक्षणे संस्काररहितस्यापि भोजने कृच्छ्रपादकं।
अकामतोऽभ्यासे शातातपः श्वककाकावलीढं शूद्रोच्छिष्टभोजने तु कृच्छ्र इति कामतोऽभ्यासे यावकं व्रतमक्त
स पांवः शुनामुच्छिष्टकं भुक्त्वा मासमेकं व्रती भवेत् काकोच्छिष्टं गवाघ्रातं भुक्त्वा पक्षव्रती भवेत् बृहद्विष्णुः
ब्राह्मणः शूद्रोच्छिष्टाशने सप्तरात्रं पंचगव्यं पिबेत् वैश्योच्छिष्टाशने पंचरात्रं राजन्योच्छिष्टाशने त्रिरात्रं ब्राह्मणो
च्छिष्टाशने त्वेकाहमिति अकामतो विप्रस्य विप्राद्युच्छिष्टभक्षणे यमः ब्राह्मणोच्छिष्टाशने महाव्याहृतिभिर्व

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

55

भिमंआपःपिबेत् क्षत्रियोच्छिष्टपाने ब्राह्मणस्य[illegible]त्यहंदीक्षितावर्णंयेन वैश्योच्छिष्टभोजनेत्रिरात्रोपो
षितोब्राह्मीसुवर्चलांपिबेत् शूद्रोच्छिष्टभोजनेषड्रात्रमभोजनमिति अकामतोभ्यासेतु यमः भुक्त्वास
हब्राह्मणेनप्राजापत्येनशुध्यति भुक्त्वासहभुक्त्वातेननक्तंकृच्छ्रेणशुध्यति वैश्येनसहभुक्त्वात्रिमतिकृच्छ्रेणशुध्यति
शूद्रेणसहभुक्त्वातुचान्द्रायणमथाचरेदिति इदंकामाभ्यासविषयमितिविज्ञानेश्वरः कामतोभ्यासेत्वेतद्द्वि
गुणंकल्प्यं विज्ञानेश्वरमतेत्वकामतोभ्यासेइदं अन्त्योच्छिष्टभोजनेत्वापस्तम्बः अन्त्यानांभुक्तशेषंतुभक्षयि
त्वाद्विजातयः चान्द्रंकृच्छ्रंतदर्धंतुब्रह्मक्षत्रविशांविधिरिति चान्द्रंचान्द्रायणं अंगिराः चण्डालपतितादी
नामुच्छिष्टान्नस्यभक्षणे चान्द्रायणंचरेद्विप्रःक्षत्रःसान्तपनंचरेत् षड्रात्रंचत्रिरात्रंचवर्णयोरन्त्ययोरिति
द्विजःशुध्येत्पराकेणशूद्रःकृच्छ्रेणशुध्यतीतितन्नमराडँपपाठमूलकाराणिः सान्तपनंमहत् इदमज्ञानतःसकृ
द्भक्षणे ज्ञानतस्तुद्विगुणं पीतोच्छिष्टपाने वृद्धशातातपः पीतोच्छिष्टंतुपानीयंपीत्वातुब्राह्मणःक्वचित्
त्रिरात्रंतुव्रतंकुर्याद्वामहस्तेनवापुनरिति इदंचकामतोभ्यासेकामतस्तुसकृत्पानेकामतोभ्यासेतु वृद्धशा
तातपः पीतशेषंतुयत्किंचिद्भोजनेमुनिभिःस्मृतं अभोज्यंतद्द्विजातीनांभुक्त्वाचान्द्रायणंचरेदिति स्त्री
णामुच्छिष्टभोजनेतु आपस्तम्बः शूद्रोच्छिष्टभोजनेसप्तरात्रमभोजनंस्त्रीणांचेति इदंचकामतःसकृद्भक्ष
णे अकामतस्तुषड्रात्रं एतत्सहचारिशूद्रोच्छिष्टभोजनेदर्शनादितिकेचित् परेइममेवाहुः सहभोजनेतु ह

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उ
प्रा.म.
५२

हृद्यासः मातावाभगिनीवापिभार्यावान्यापियोषितः नताभिः सहभोक्तव्यंभुक्त्वाचांद्रायणंचरेत् पर्ववगिराः।
बालस्तपामस्योभ्योयाउच्छिष्टंबालदाता ननवदोषमसंनेसर्वंपवमनीषिणाइति तदापद्विषयंविवाहविषयं
वा उच्छिष्टापवादमाहापस्तंबः पितुर्ज्येष्ठस्यचभ्रातुरुच्छिष्टंभोक्तव्यं आपदिस्वगृहेभोजनेन पराशरः आ
पत्कालेतुविप्रेणभुक्तंशूद्रगृहेयदि मनस्तापेनशुद्ध्येत द्रुपदांवाशतंजपेत् दीपोच्छिष्टभक्षणेषड्विंशन्मते।
दीपोच्छिष्टंतुयत्तैलंरात्रौरथ्याहतंचयत् अभ्यंगाद्वैचयच्छिष्टंभुक्त्वानक्तेनशुध्यति तैलग्रहणाद्घृतेनदोषः।
मृतश्राद्धभोजने शंखः चांद्रायणंनवश्राद्धे प्राजापत्यंतुमासिकेमतः पक्षत्रयेतुकृच्छ्रंस्यात्षण्मासेकृच्छ्रमेव
च आह्निकेतुकृपादःस्यादेकाहःपुनराह्निके अतऊर्ध्वंनदोषःस्यात्शंखस्यवचनंयथेति मासिकेश्रा
द्धे द्वितीयादिषुतुप्रायश्चित्तमनाचतन्मध्यकृत्स्नं षाण्मासिकमाद्ध्येनकर्तव्यंषाण्मासिकमपिसंदिश्यते एवमाह्नि
कपदेनऊनाह्निकमपिनदोषः एवंचदिनित्रयेषः तृतीयाद्याह्निकेपित्रित्रिरात्रंचान्यमासेषुमप्यहंचेदहःस्त्र
नमितिषड्विंशन्मतेप्रायश्चित्तलेशः पत्तुभरद्वाजः भुक्त्वैवेत्येवंशप्राद्धेप्राणायामान्षडाचरेत् उपवास
स्त्रिमासादिवत्सरांतंप्रकीर्तितः प्राणायामत्रयंत्वह्नादौदशरात्रंसपिंडने अप्सृतपेस्ततेनक्तंव्रतपारणकेतथा
द्विरूपणंहत्रिपक्षेतत्रिगणांवैश्यभोजने मातामहादिप्रस्तावत्तृतीयस्त्यत्रेणसभोजनइति तत्रत्रिमासादी।
नापद्विषयं पत्तुहारीतः चांद्रायणंनवश्राद्धेप्राजापत्यंतुमिश्रके एकाहस्तुपुराणेषुप्रायश्चित्तंविधीयते

56

५२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इति नवं स्ववाक्यसमानविषयं मिश्रकं संवत्सरांतं नवनवं श्राद्धमित्यपरार्के एकादशाहिकमित्यन्ये चांद्राय
णं नवश्राद्धे इत्येतदाद्यनवश्राद्धविषयं प्राजापत्यं तु मिश्रके इत्याद्यमासिकविषये द्वितीयनवश्राद्धादि
षु षड्विंशन्मतेऽपि प्राजापत्यं नवश्राद्धे पादोनं चाद्यमासिके त्रैपक्षिके तदर्द्धं स्यात् द्वैमासादौ मासिके तथा पादो
नं कृच्छ्रमुद्दिष्टं षाण्मासे च तथाब्दिके त्रिरात्रं चान्यमासेषु प्रत्यहं तदहः स्मृतमिति क्षत्रियादिश्राद्धभोजने तु
तत्रैव चांद्रायणं नवश्राद्धे पराको मासिके स्मृतः त्रैपाक्षिके सांतपनं कृच्छ्रं मासद्वये स्मृतं क्षत्रियस्य नव
श्राद्धे व्रतमेतदुदाहृतं वैश्यस्यार्धाधिकं प्रोक्तं क्षत्रियस्य मनीषिभिः शूद्रस्य तु नवश्राद्धे चरेच्चांद्रायणद्वयं
माद्ये चांद्रायणं मासि त्रिपक्षेऽब्दे च वै स्मृतं मासद्वये पराकः स्यादूर्ध्वं सांतपनं स्मृतमिति यत्तु हारीतः एका
दशाहे कृच्छ्रं भुक्त्वा संचयने तथा उपोष्य विधिवद्भुक्त्वा कृच्छ्रं मासे कृच्छ्रपादं हि यदपि विष्णुः प्राजापत्यं नवश्रा
द्धे पादोनं त्वाद्यमासिके त्रैपक्षिके तदर्धं तु पंचगव्यं हि मासिक इति तदुभयमापद्विषयं भरद्वाजः अपंक्ति
यान्यदि श्राद्धे एकादशेऽहनि ब्राह्मणस्तत्र भुक्त्वा त्रिरात्रं चांद्रायणं चरेत् आमश्राद्धे तथा भुक्त्वा तत
कृच्छ्रमाचरेत् संकल्पितेन तथा भुक्त्वा त्रिरात्रं क्षपणं भवेदिति आमश्राद्धे इति नवश्राद्धविषयं संकल्पि
तमिति षाण्मासिकादिविषयं मनुः मासिकान्नं तु योऽश्नीयादसमावर्तको द्विजः स त्रीण्यहान्युपवसेदेका
हं चोदके वसेदिति यत्तु संवर्तः सूतकान्नं नवश्राद्धं मासिकान्नं तथैव च ब्रह्मचारी तु योऽश्नीयात्त्रिरात्रं संकल्प्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चन मासापर्यन्तनक्ताशी भोजी मोक्षेनच्छन्दानीतितु द्विहयी वि[illegible] अन्नप्रायश्चित्ते तु सर्वत्र उपाना दशाक्ं
त्वःपिवेदापोगायत्र्याश्चाश्रुभुङ्द्विजः ततःसंध्यामुपासीतनुञ्जीतनरचन्नंतरस्मिति आमश्राद्धे तु सर्वत्राहं न
पाचषड्त्रिंशन्मते आमश्राद्धे भवेदर्द्धंप्राजापत्यादि सर्वदेति ॥ अथसंस्कारभोजने प्रायश्चित्तविवेके
गिराः जन्मप्रभृतिसंस्कारेषु तस्यान्नस्यभोजने असपिंडैर्न भोक्तव्यं प्रथमस्यातितेविशेषतः व्यासः निर्हतेष
तद्दोमेतु माङ्गामवन्नगोपतथा चरेत्सांतपनंभुक्त्वा जातकर्मणि चैवहि अतोन्येषु तु भुक्त्वान्नं संस्कारेतुद्वि
जोत्तमः नियोगाडुपवासेनशुध्यते निंद्यभोजने धौम्यः ब्रह्मौदने च सोमे च सीमंतोन्नयने तथा जातश्रा
द्धे नवश्राद्धे द्विजश्चांद्रायणं चरेत् आपस्तंबः राजकान्नं नवश्राद्धं संग्रहे चैव भोजनं स्त्रीणांप्रथमगर्भे
च द्विजश्चांद्रायणं चरेदिति स्त्रीणां संप्रदो विवाहः ॥ अथदत्ताद्भिन्नगोमायश्चित्तमाह यमः माहिषंका
णिनं प्राजंगोरसं संलवणोद्घृतं हस्तदत्तानिभुक्त्वा च भोज्यासांतपनं चरेत् एतत्कामतः सांतपनं दिनत्रयसा
ध्यं अकामतस्त्वाह पराशरः माहिषंकाणिनं प्राजंगोरसं संलवणोद्घृतं हस्तदत्तानिभुक्त्वा तु दिनमेकम
भोजनमिति काणिनमित्तस्य विकारविशेषः पर्णायदत्तान्नभोजने वृद्धयाज्ञवल्क्यः ब्राह्मणान्नं ददच्छूद्रः
शूद्रान्नं ब्राह्मणो ददत् इयमेतदभोज्यं स्यात्भुक्त्वा तूपवसेदहविति शूद्रहस्तभोजनादौतु क्रतुः शूद्रह
स्तेन यो भुंक्ते पानीयं वा पिबेत् क्वचित् अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति एवं याज्ञवल्क्योक्तेषु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गोघ्नातं सा कुर्नोत्कि चंपदास्य हेत्वकाकृत तस्मादिह्मपिवत्स्वं प्रायश्चित्तं मनुः चूतहीनं तु यो भुंक्ते न रत्नावृत्ति
पंचकं पश्चाद्भुतेन यो भुंक्ते भुक्त्वा चान्द्रायणं चरेत् तथा पानान्नभक्षणे शातातपः यज्ञनाश्मतिदेवा
न्नपितृव्यव यथाविधि तथा पाकः सविशेषतः स्वनायाकथंचन तथा पाकस्य भुंजानः प्रायश्चित्तं चरेत्
द्विजः प्राणायामं त्रिरभ्यस्य हुतं प्राश्य विशुध्यति लिखितोपि यस्य चाग्नौ न क्रियते यस्य चाग्रं न दीयते न
तद्भोज्यं द्विजातीनां भुक्त्वा चान्द्रायणं चरेत् तथा तथा ह्यशास्त्रयावधा पशास्त्रपशुकुलीः आहिताग्नि द्विजो
भुक्त्वा प्राजापत्यं चरेदिति अनाहिताग्नेस्तु व्यासः पराशरः एकपंक्त्युपविष्टानां विप्राणां सह भोजने य
द्येकोपि त्यजेत्पात्रं शेषमन्नं न भोजयेत् मोहाद्भुंजीत यस्तत्र पंक्त्या चोच्छिष्टभोजनः प्रायश्चित्तं चरेद्विप्रः कृच्छ्रं
सांतपनं तथा एतच्च कामतः यत्तु माधवीये स्मृत्यंतरे यस्तु भुंक्ते द्विजः पंक्त्यां भुक्त्वा पाकवाचनं अहो
रात्रोषितो भूत्वा पंचगव्येन शुध्यतीति तदकामतः निंदितपंक्तिभोजने गिराः यस्तु पंक्तिषु भुंजीत त
स्थितानां विप्रोषतः अतो मात्रोषितः स्नातः पंचगव्येन शुध्यति क्षत्रियादिपंक्तिषु विप्रः ब्राह्मणः क्षत्रिय
पंक्त्यां कुमति विप्रपासेस्तृष्णया यदा भुंक्ते तदा नक्तं चरेद्वैश्यपंक्त्यामेकरात्रं शूद्रपंक्त्यां त्र्यहमाचरेदिति ॥ इति क्रिया
दुष्टाशनप्रायश्चित्तं ॥ अथ भोज्यान्नाः व्यासः शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत् इति शूद्रेषु नापितश्चैव समज
न्मानीत्येवं मनुरुवाच ह शूद्रान्नेनोदरस्थेन यः कश्चिन्म्रियते द्विजः स भवेत्सूकरो ग्राम्यस्तस्य वा जायते

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कथंचन एकमासोषितोऽश्नीयादन्नं तथापि स्वरूपाणि तथापि अथ कापालिकान्ने आपस्तंबः कापालिकान्न-
भोक्तृणां तन्नारीगामिनां तथा ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञानादैन्दवद्वयं कृच्छ्राब्दमभ्यासविषयः॥ अथ
चांडालान्ने अंगिराः अन्त्यावसायिनामन्नमश्नीयाद्यस्तु कामतः स तु चांद्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा
अत्र कामतश्चांद्रायणमकामतस्तप्तकृच्छ्रं यत्तु कृच्छ्रपादोऽनुदीर्णो वसिष्ठः एतदेव चांडालभोजनेन ततः
पुनरुपनयनं तदपि चांद्रायणसमानविषयं विज्ञेयं चांडालान्नं भुक्त्वा त्रिरात्रमुपवसेत् सिद्धं भुक्त्वा प-
राक इति तदकामतोऽज्ञानविषयं यत्तु मनुः चांडालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च पतत्य-
ज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छतीति तत्र ज्ञानतोऽन्नाभ्यासे पातित्यमेकद्वित्र्यभ्यासे तु कामतस्तु चतुर्विंश-
त्यब्दं म्लेच्छादिभिर्बलाज्जोजितस्य कारितास्पृश्यकर्मणः प्रायश्चित्तमाह देवलः बलाद्दासीकृता ये तु म्ले-
च्छचांडालदस्युभिः अशुभं कारिताः कर्म गवादिप्राणिहिंसनं उच्छिष्टमार्जनं चैव तथा तस्यैव भोजनं खरो-
ष्ट्रविड्वराहाणामामिषस्य च भक्षणं तत्स्त्रीणां च तथा संगं ताभिश्च सहभोजनं मासोषिते द्विजातौ तु प्राजा-
पत्यं विशोधनं चांद्रायणं त्वाहिताग्नेः पराकस्त्वथवा भवेत् चांद्रायणं पराकं च चरेत्संवत्सरोषितः संवत्स-
रोषितः शूद्रो मासार्द्धं यावकं पिबेत् मासमात्रोषितः शूद्रः कृच्छ्रपादेन शुद्ध्यति ऊर्ध्वं संवत्सरात्कल्प्यं प्रायश्चि-
त्तं द्विजोत्तमैः संवत्सरैश्चतुर्भिश्च तद्भावमधिगच्छति शूलपाणिस्तु संवत्सरैश्चतुर्भिस्तु तद्भावसो

पिगच्छति कृच्छ्रसांतपनं विद्यते तस्य प्रायश्चित्तमैंद्रं सान्तपनं कृच्छ्रं तेषु पद्म प्राजापत्यं चांद्रायणादि मासं चाहमात्रेण वादि हिंसा
मांसाशित्वकं तत्प्रायश्चित्तमेवाकामतो द्विगुणं ज्ञेयं अपरीक्षितैकादशलेपः प्राणायामशतं कृत्वा शुध्यते शूद्रसू
तकेः वैश्यपक्षिभिर्भवेद्रात्रिर्विप्रातिक्रान्ताः स्वल्पोदशा एकाहं क्षत्रस्य ह्येकपंच सप्तरात्रमभोजनं इदमकामतः यत्तु मार्कंडे(
यः भुक्त्वान्नं ब्राह्मणाशौचे चरेत्सांतपनं द्विजः यत्तु संवर्तः ब्राह्मणोप्यन्यथा भुक्त्वा शौचे मासं व्रती भवेदिति त
दभ्यासविषयं अत्र सर्वत्र सूतकसंस्पृष्टान्नस्याप्युपलक्षणं अंगिराः सूतकेत्र यदा विप्रो ब्रह्मचारी विशेषतः
पिबेत्पानीयमज्ञानात्समश्नीयात्स्पृशेदपि पानीयपाने कुर्वीत पंचगव्यस्य भक्षणं त्रिरात्रं भोजने प्रोक्तं स्पृष्ट्वा
स्नानं विधीयते ब्राह्मे योगोपयोगात्सोदकं जरत्कायसंतकः भवेन्मयायां संस्थितो हंसश्चैव वक्रेस्थितः (
सूतके मृतके चापि पिसकायोः प्राशितर्विष्योः कापायां अजस्रापः भुक्त्वान्नं नयकं व्रजेत् भुक्त्वा प्रमादाद्विप्र
स्तुसप्तकृच्छ्रं चांद्रायणं चरेत् एतच्च प्रायश्चित्तं यज्ञात्मीयस्याशौचिनो न्नं भुक्तं तज्ज्ञात्वा चिन्नमाशौचं ज्ञात्वा तदंते (
कार्यं तथा च विष्णुः ब्राह्मणादीनामशौचे यः सकृदन्नमश्नाति तस्य तावदाशौचं यावत्तेषां आशौचव्यप
गमे प्रायश्चित्तं कुर्यादिति ब्राह्मे कलोत्कलावदाणं च कुर्याद्वावावर्धाचरेत् यथा तद्गृहे नान्नमश्नीयात्प्रवस(
त्यग्निहोत्रिणि एतेषां तु गृहे भुक्त्वा द्विजश्चांद्रायणं चरेदिति अग्र्यापस्तंबो म्लेच्छादीनां पयः पीत्वा पुष्करि
एपां कृदपिवा जात्तु दत्तं प्राश्य चित्तेयमथ यत्तादप्सु चित्सृतं ततः पयः पिबेद्विप्रः कामतो कामतोपि वा अकामात्त

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

क्रमोजीस्यादहोरात्रंतुकामतइति तत्रानुवक्ष्योनं अतएवशातातपः अंत्यैरपि कृते कूपे सेतौ वाप्यादिकेपि
वा तत्रस्नात्वाचपीत्वाचप्रायश्चित्तंनविद्यते ॥ अथांत्यजभांडजले पराशरः भांडस्थमंत्यजानांतुजलंद
धिपयः पिबेत् ब्राह्मणः क्षत्रियोवैश्यः शूद्रश्चैवप्रमादतः ब्रह्मकूर्चोपवासेनद्विजातीनांतुनिष्कृतिः शूद्र
स्यचोपवासेनतथादानेनशक्तितइति तत्कामतः कामतस्तु आपस्तंबः सदाधर्मेच्छभांडेभ्योयस्त्वापः
पिबतिद्विजः कृच्छ्रपादेनशुद्ध्येतपुनः संस्कारमर्हति शूद्रोदकपाने शातातपः यदिविप्रः प्रमादेनशूद्रतो
यंपिबेत्स्वयमित्युपक्रम्य उपोष्यबिल्वपत्राणांपलाशस्यकुशस्यच पत्रैरुदकंपीत्वातेनशुद्धिमवाप्नुयात्
अपवादमाह जाबालः नवभांडेतुपानीयंशूद्रविश्रुतकर्मणां पेयंतदपिविप्राणांपयोदधितथैवच संभवः
घृतदधिपयस्तक्राणामाकमस्भांडस्थितानामदोषइति शातातपः घृतंतैलंदधिक्षीरंतथैवेक्षुरसोगुडः
शूद्रभांडस्थितंतक्रंतथामधुनदुष्यतीति प्रपादिजलपाने लघुहारीतः प्रपाजलंक्षीरघटस्यचैवद्रोणी
जलंकोशविनिर्गतंच पीत्वाचमाहेतुजलं सवासा उपोषितः शुद्धिमवाप्नुतेच क्षीरघटः क्षीरहद्रुनिर्यासा
धारपात्रं कोशो विनिर्गतं कूपादेश्चर्मपुटकनिःसारितं एतत्कामतः सकृत् आपदितुनदोषइत्याह संव
द्रोणपामायसकुंभायांछन्नेमवर्तकेतथा ग्रामप्रपाजलंचैवपीत्वापतनदुष्यति छन्नेमवर्तकेसवकेऽत्र
इतिमूलपाणिः यमः प्रपामरण्येघटकेचकूपेद्रोणीजलंकोशगतास्तथापः ऋतेपिशूद्रात्तदपेयमाहुरा

63

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पङ्क्तौ भुञ्जानाः पिबेत् आपदि तु देवं जलं भूमिष्ठं कृत्वा पाणौ तेषां तोयं तु पेयमित्यर्थः ॥ अथ पर्युषितगृहे विलु:
महाविक्रमस्मार्तदीक्षफलं देवलः भूलकान् विण्मूत्रस्पृष्टमन्नाद्याघ्राय परदेवस्य कृच्छ्रं चपादतः संनिकृष्टे स्मृत्यैवस्मात्कृच्छ्रो
पयस्त्रिभोजने संनिकृष्टत्वं महात्म्यसर्गः इद्वाननन्तः सकृद्गतोत्साहान्नपवनयोवा तानननस्तु हिरण्यं अ
भ्यासेन्नाद्विः रसोपवनथोषकामनोद्यासः संसर्गादुपपन्नान्न किमादुप हवकामतः भक्ताभावमादुपचनः
सक्रूस्तमाचरेत् भक्षानानो रत्नोपलथोवृद्धं संपर्कः केशकीटाद्युपन्नं चनीललाक्षोपघातिनं स्नायुस्थिचर्म
संस्पृष्टं भक्तान्नं पवसेदहर्निशं प्राणातपोपि केशकीटाद्युपन्नं हृदिधर्मामासाङ्गस्पृष्टं भ्रागाघ्रावेदितपनस्पवली
ढस्यमत्रकावगावाघ्रातं शुष्कपर्युषितं तथा पृष्ठदेवाचरं विप्राभोजने उपवासः पंचगव्यप्राशनं चेति एतदभ
यमापद्यकामतः फलभावः दूषितं केशकीटैश्चर्मार्जारैर्मूषकैस्तथा मक्षिकामशकैश्चैव त्रिरात्रं तु व्रतं
चरेदिति नवनापरिकामतः रजस्वलादिसंस्पर्शनेन पावः अमेध्यपतितचण्डालपुक्कसरजस्वलावधू
तकृमिकृष्टिकृतविसंस्पर्शाभिभुक्त्वान्नकृच्छ्रं चरेदिति कृमिर्हत्याविकल: एतत्कामतः अकामतोर्द्धं स्वादि
स्पृष्टभोजनेन लघुविष्णुः अदृष्टं स्पृशुनावापि संस्पृष्टं प्राश्यभोजनं नमहकृच्छ्रात्र्यज्ञोतप्राजापत्येनकाशु
नः प्रायश्चित्ताकोटान्तर्व्यसनिधर्मस्यनिष्क्रयः तेनैवेश्पादिकैर्उक्ष्णार्दभैःसकृदेकया पादहीनं चरेत्कृच्छ्रं
प्रायसर्वं चरेद्द्विजः पाकान्तरं केशकीटादिपातेन प्रचेताः अन्नं भोजनकाले तु मक्षिकाकेशदूषितं अ

64

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नं तं संस्पृष्टो वा पक्वमन्नं भक्ष्यनाशं स्पृशेत् तेन सह पक्वं नत्याज्यं विण्मूत्रमपि वा यदि हंसमक्षिकाकृमिजंतुभिः केशाद्यो(
मत्कुणैर्वापि दूषितं परिवर्जयेदिति हारीतोक्तेः चंडालादिस्पृष्टेऽन्ने ब्रह्मपुराणे चंडालपतितामेध्यैः ऊनखैः कुष्ठिना
तथा ब्रह्मघ्नसूतिकोदक्याकौलेयककर्दुविभिः इर्षकीटकैः माकं मत्स्यकनकांबुभिः शुद्ध्यघ्रातस्पृष्टलेवं
मद्यस्पृष्टमेवचेति कौलेयकः श्वा कर्द्दुर्बीभत्सोगिविघोषः सहलेखविष्ठादिस्पर्शाच्छकं मुहुं पर्युषितं एतत्स्पृष्ट(
मद्यपेन ब्रह्मपुराणे चंडालपतितामेध्यैः ऊनखैः कुष्ठिना तथा उदक्या सूतिकास्पृष्टं भुक्त्वा मासं वनेवसे(
दिति क्लीबादिस्पृष्टेऽन्ने शातातपः क्लीबाभिशस्तपतितैः सूतिकोदक्यनास्तिकैः स्पृष्टं नाद्यात्तदन्नं तत्स्पर्शनिष्कृ
तिरुच्यते तज्जलोपवसेद्रात्रिं नास्पृष्टेन च तद्दिने उच्छिष्टे पञ्चगव्यांशं प्राश्य शुद्धं भवेदिति काकादिस्पृष्ट
मपवदति प्रायश्चित्तविवेके यमः देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च काकैः श्वभिश्च संस्पृष्टमन्नं तन्न वि
वर्जयेत् अन्नं तन्मात्रमुद्धृत्य शेषं संस्कारमर्हति द्रुतानां प्रोक्षणाच्छुद्धिर्द्रवाणामतिपातनात् संस्पर्शाच्च
भवेच्छुद्धिः पाममेर्ह्यनस्य च छागेन मुखसंस्पृष्टं शुचि चैव च तद्भवेत् यमः गवादिदुष्टमसंयुक्तं वर्ज्यं पर्युषि(
तं दधि तथैव यावकादीनि भक्ष्यादिविचितान्यपि अत्र प्रायश्चित्तं ब्रह्मपुराणे सगुडानि विष्ठादिदूषितानि तथा प
र्युषितं दधि शीर्णं तत्क्रमपेयं च नष्टस्वादं च फेनवत् प्रमादाद्भक्षितैरेभिर्वनेपरव्रतं चरेदिति भुक्त्वा तद्दाव
लवणं त्रिरात्रं तु कोऽवसेत् सगुडं मरिचाक्तं च वर्ज्यं पर्युषितं दध्नीनिमदनः पपाठ अस्पृश्यादिदूषितान्नाशने (

65

उ
प्रा०म०
५७

ब्रह्मपुराणे अस्नात्वा दूषितं चान्नं भुञ्जानस्तु यदा भवेत् स्नात्वार्कमर्चयित्वा तु घृतं प्राश्य विशुद्ध्यतीति शवदूषि
तजलपाने पराशरः कूपे च पतितं दृष्ट्वा श्वसृगालौ च मर्कटं अस्थिचर्मादि पतितं पीत्वामेध्या अपो द्विजः ना
रं तु कुणपं काकं विड्वराहं खरोष्ट्रकं गावयं सौप्रतीकं च मायूरं खड्गिनं तथा वैयाघ्रमार्क्षं सैंहं वा कूपे यदि निम
ज्जति तडागस्याथ दुष्टस्य पीतं स्यादुदकं यदि प्रायश्चित्तं भवेत्पुंसां क्रमेणोत्तेन सर्वशः विप्रः शुद्ध्येत्त्रिरात्रेण
क्षत्रियस्तु दिनद्वयात् एकाहेन तु वैश्यस्तु शूद्रो नक्तेन शुद्ध्यति सुप्रतीको गजः आर्क्षो भाल्लूकः हारीतः।
क्लिन्नं भिन्नं शवं चैव तत्रस्थं यदि तत्पिबेत् शुद्ध्यै चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वेति तत्कामतोऽभ्यासे
कामतो मानुषशवोपहतजलपानाभ्यासे वा चान्द्रायणतप्तकृच्छ्रयोः प्राज्ञाव्यवस्था शवदूषितस्नानमात्रेऽपि
हारीतः यदि कश्चित्ततः स्नायात्प्रमादेन द्विजोत्तमः जपंस्त्रिषवणस्नानादहोरात्रेण शुद्ध्यतीति कामतो द्विगुणा
दिकल्प्यं वृद्धविष्णुः जलाशयेष्वथाल्पेषु स्थावरेषु महीतले कूपवत्कथिता शुद्धिर्महत्सु न तु दूषणं वापी
कूपतडागेषु दूषितेषु विशोधनं घटानां शतमुद्धृत्य पंचगव्यं ततः क्षिपेदिति अंगिराः कूपे विण्मूत्रसंसृष्टेऽपी
त्वा नीयं द्विजोत्तमः त्रिरात्रेण विशुद्ध्येत कुम्भे सान्तपनं स्मृतं ॥ अथ चाण्डालादिजलपाने तत्र मनुः शुक्तानि च कषा
याणि पीत्वामेध्यान्यपि द्विजः तावद्भवत्यप्रयतो यावत्तन्न व्रजत्यधः शुक्तं कालपरिवासमात्रेणाम्लीभूतं संस
र्गकालपरिवासाभ्यां वा यदम्लीभवति अत्राकामतः शोधेदुपवसेदहरिति मनूक्त उपवासः विज्ञैरपि यवागू

५७

भूसजंपयोविकारंस्नेहाक्तंचुक्रंचाभक्ष्यंवर्जनेमितापर्युषितंमाघ्रणोपवसेत् चुक्रंचाभक्ष्यंस्वरूपशास्त्रोक्तोव्यंजनविशे
षः कामनस्तुपंचाख्यः लोहितान्वृक्षनिर्यासान्वृश्चनप्रभवांस्तथा केवलानि च शुक्लानि तथापर्युषितंच
यत् ऋजीषपक्वंभुक्त्वाचत्रिरात्रंतुव्रतीभवेदिति ऋजीषंदिवसपर्युषितं एतच्चामलकादिफलयुक्तकांजि
कादिव्यतिरेकेण कंडिकासफलायेषुमत्स्येषुस्यापिताभवेत् तस्मात्कांजिकाद्यादानेतरस्याः कदा
चनेतिमितास्तरामांसमवणात् मनुः दधिभक्ष्यंतुशुक्तेषुसर्वंचदधिसंभवं यानिचैवाभिषूयंतेपुष्पमू
लफलैःशुभैरिति उद्धृतस्नेहादिषु गौतमः उद्धृतस्नेहविलपाकमथितप्रभृतीनिच चित्रवीर्याणिनाश्नी
यादित्युक्त्वाप्याकूपंचनखेभ्यःछर्दनंघृतप्राशनंचेति पर्युषितापवादमाह याज्ञवल्क्यः अन्नंपर्युषितंभोज्यं
स्नेहाक्तंचिरसंभृतं अस्नेहाअपिगोधूमयवगोरसविक्रियाः अकृतान्नभोजने तु लिखितश्चाह यस्यचा
ग्नौनक्रियतेयस्यचाग्रंनदीयते नतद्भोज्यंद्विजातिभिर्भुक्त्वातूपवसेदहः संवर्त्तः शूद्राणांभाजनेभुक्त्वा
भुक्त्वावाभिन्नभाजने अहोरात्रोषितोभूत्वापंचगव्येनशुद्ध्यति भिन्नापवादमाहदेवलः ताम्ररजतसुवर्णा
श्मरत्नप्रवालस्फाटिकानांभिन्नमभिन्नमिति भिन्नभाजनंचकांस्यमेव भिन्नकांस्येतुयोश्नीयात्तद्योस्त्वा
जपेद्द्विजः गायत्र्यष्टसहस्रंतुएकभक्तस्तदाशुचिरितिबोधायनोक्तेः एतच्चज्ञानतः अज्ञानतस्तु पराशरः
भिन्नभांडेतुभुंजानोह्यज्ञानेनद्विजोत्तमः सुवर्णोदकसंस्पृष्टंघृतंप्राश्यविशुध्यति मिताक्षरायांस्मृतंपतरे व

67

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
प्रा॰म॰
५८

एकाश्वत्थपत्रेषु कुंभीतिंदुकपत्रयोः कोविदारकदंबेषु भुक्त्वा चांद्रायणं चरेत् तथा पलाशपद्मपत्रेषु गृही भुक्त्वै
दवं चरेत् वानप्रस्थो यतिश्चैव लभते चांद्रकं फलं पुनाश्रोवल्लीपलाशादिनिस्सरत्पत्रे हेमाद्रौ च अथ कालरु
साग्राने असमर्थो स्नानकेनाभावादिपत्तियोग्यं सूर्यस्यैः छायायां कुंजरस्याथ भुक्त्वा ततः कुंभजेत्।
भुक्त्वा प्रमादाद्विप्रस्तु सम्यक् चांद्रायणं चरेत् षट्त्रिंशन्मते चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुद्ध्यतीति तदः
कामतः वृद्धवाक्यदीपे अर्कद्विपर्वरात्रौ च चतुर्दश्यष्टमीदिने एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेत्
ग्रहणसन्निहितनिषिद्धकाले अज्ञानतो भोजने तु चंद्रसूर्यग्रहं प्रकृत्य षट्त्रिंशन्मते तस्मिन्नेव दिने भुक्त्वा।
त्रिरात्रेणैव शुद्ध्यतीति प्रायश्चित्तविवेके संवर्तः अपोशानमकृत्वा तु यो भुंक्ते नापदि द्विजः भुंजानस्तु य
दा ब्रूयाद्गायत्र्यष्टशतं जपेत् अष्टशतमष्टोत्तरशतं स एव अनाचांतः पिबेद्यस्तु भक्षयेद्वापि किंचन गायत्र्य
ष्टसहस्रं तु जपं कृत्वा विशुद्ध्यतीति लघुहारीतः विना यज्ञोपवीतेन भुंक्ते च ब्राह्मणो यदि स्नानं कृत्वा जपं
चैवोपवासेन शुद्ध्यति हारीतः ब्रह्मपुराणे देवोपवीतपरीधानाद्युत्सर्गं कुर्यात्प्रमादतः तदाहो तत्कर्त्तव्याते
न शुद्धिः सर्वदेवैर्भिः पश्चादाचम्य तु जले जप्त्वा अघमर्षणं एतद्विनिर्णीयग्रासे सकृन्निर्गीर्णग्रासे तु आपस्तं
बः भुंजानस्य तु विप्रस्य कदाचित्स्रवते गुदं उच्छिष्टमशुचित्वं च प्रायश्चित्तं कथं भवेत् आदौ कृत्वा तु वै शौचं त
तः पश्चादुपस्पृशेत् अहोरात्रोषितो भूत्वा पंचगव्येन शुद्ध्यति यत्तु शातातपः मूत्रोच्चारसमुत्सर्गं मोहाद्भुंक्ते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दिजीवतिसत्स्तेनस्तनस्तेयाद्विमुच्यतइति सांवर्त्तोक्तं एतेनस्तेनयोष्पाणांबहूनांहननिसंभावनायामप्र।
हृतेपिजीवनम्भुट्टरनिमाधवोक्तिस्पाल्लामान्नाभावाश्च भविष्ये महत्स्वपहृतेष्वन्नत्याल्पेचहृतेगुरु हृत।

द्रव्यविशेषाद्देस्वामिनस्तस्करस्यच प्रयोजनविशेषाच्चविशेषाद्देशकालयोः अनुबंधविशेषाच्चप्रायश्चि
त्तंप्रकल्पयेत् तत्रैव यद्यस्यापहृतंद्रव्यंतत्तस्यैवविनिर्दिशेत् प्रायश्चित्तंततःकुर्यादेवंशुद्धिमवाप्नुया।
त् विस्तुः दत्त्वैवापहृतंद्रव्यंधनिकस्याभ्युपायतः प्रायश्चित्तंततःकुर्यात्कल्मषस्यापनुत्तये अत्रविशेष
माह मनुः चरेत्सांतपनंकृच्छ्रंतन्निर्यात्यात्मशुद्धये इति तत्द्रव्यंनिर्यात्यस्वामिनेदत्वा शुद्ध्येप्रायश्चि
त्तयोग्यत्वमित्यर्थः अतएवभविष्ये तन्निर्यात्येतिवाक्यंतत्प्रवदंतिमनीषिणः तत्सर्वंचैवयोग्यस्यसूच
कंनाचसंशयः तत्सर्वप्रातिस्विकप्रायश्चित्तात्सर्वयोग्यस्येतिभावप्रदानोनिर्देशः योग्यत्वस्येत्यर्थः।
केचित्तु सुवर्णापरिमाणाहृतंचोरितंधनंस्वामिनेदत्वास्वशुद्धयेसांतपनंकृच्छ्रंकुर्यादितिमानवीयार्थः
तच्छ्रेहेनसुवर्णमितिसर्वंततोन्यूनंयोग्यस्यशुद्धेःकामकमितितुभविष्यस्यार्थस्स्यात् सुवर्णस्तेयेनैका
दशांशाधिकंचोरितधनंस्वामिनेदेयं तथाचमिताक्षरायां स्तेयेब्रह्मस्वम्भृतस्य सुवर्णादिःकृतेपुनः।
स्वामिनेपहृतंदेयंहर्त्राचैकादशाधिकं लघुविस्तुः स्तेयेब्रह्मस्वम्भृतेनसुवर्णाहरणेकृते पश्चात्तेनैव
दातव्यंतस्मैचैकादशाधिकं गणांसंशुद्धिभावायततश्चांद्रायणत्रयं संवत्सरेणादातव्यंनिष्कर्णाग्रशुद्धि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मिश्रता अभावे कांचनस्याहृतमेतच्चतुर्गुणं चरेद्यज्ञमानानि:शंकः पूर्णं वर्षचतुष्टयं समानेकांचनं गाश्चर
जतं चापि धर्मवित् इयमन्नं द्विजादिभ्यः शुभं पापापनुत्तये इति आर्षहिरण्यभूड्डि चान्द्रायणत्रयमि
ति यवमध्यादीनि त्रीणि चान्द्रायणानि वत्सरमभ्यसेदित्यर्थः इदं च दोषप्रायश्चित्तमादिकं सर्वेषां पापा
दितस्सवर्णसाहस्रेपेता ग्राह्येन भवति सुवर्णान्तु जातिसम्बन्धाभावात् ॥ अथ सुवर्णस्तेयसमेषु मनुः
निक्षेपस्यापहरणं नराश्वरजतस्य वा भूमिवज्रमणीनां च रुक्मस्तेनसमं स्मृतं स्मृत्यन्तरे पुरुषाणां
कुलीनानां नारीणां च विशेषतः मुख्यानां चैव रत्नानां हरणे वधमर्हति याज्ञवल्क्यः अश्वरत्नमनु
ष्यस्त्रीभूधेनुहरणं तथा निक्षेपस्य च सर्वस्य सुवर्णस्तेयसंमितं मनुष्यहरणे नैव सिद्धेः स्त्रीपदं षष्ठ्या
त्मर्थं विस्तुः ब्राह्मणभूहरणं सुवर्णस्तेयसममिति अत्र षड्ढमिश्रेत्कृपरिभाषायां अमूल्यरत्नादौ
तु चतुर्विंशतिमते रत्नानां हरणे विप्राश्चरेच्चान्द्रायणत्रयमिति मनुरपि मणिमुक्ताप्रवालानां ता
म्रस्य रजतस्य च अयःकांस्योपलानां च द्वादशाहं कणान्नता सएव मनुष्याणां तु हरणे स्त्रीणां क्षेत्र
गृहस्य च वापीकूपतडागानां शुद्धिश्चान्द्रायणं स्मृतमिति मनुष्यो दासः स्त्री दासी स्मृत्यन्तरे हृत्वा हृ
त्वा द्विजो मोहाच्चरेच्चान्द्रायणव्रतं गणपाणकाहर्द्धं माषानाद्धिगुणं भवेत् आसहस्राच्च त्रिगुणा
ऊर्ध्वं हेमविधिः स्मृत इति गणपाणाग्रजे रत्नेशोपमसिद्धः रत्नताम्रायःकांस्यमनुष्यापहारेषु पि प्रायश्चित्ते

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यत्नार्थमियमेव मूल्यस्य यत्र ज्ञेया मनुः धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः सजातीयगृहादेव कृ
च्छ्राब्देन विशुध्यतीति स्मृत्यन्तरे अष्टापद्यं स्तेयकिल्बिषं शूद्रस्य द्विगुणोत्तराणीतरेषामिति किल्बिषं दं।
डः सम्बद्धस्यापक्रियमाणाद्द्रव्याद्दशगुणः विद्वत्त्वविशेषेणाति षोडशद्वात्रिंशच्चतुःषष्टिगुणा इत्यर्थः।
अत एव मनुः अष्टापद्यं हि शूद्रस्य स्तेये भवति किल्बिषं षोडशैव तु वैश्यस्य द्वात्रिंशत्क्षत्रियस्य वा।
ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतं भवेत् शंखः नष्टधनस्यापहरे मणीनां रजतस्य च धान्याप।
हरणे चैव कुर्यात्संवत्सरं व्रतमिति इदं च दशकुम्भाधिकधान्ये तन्मूल्ये च धनादावपहृते ज्ञेयं धान्यं दशभ्यः कुम्भे
भ्यो हरतोऽभ्यधिकं वध इति मनूक्तेः कुम्भमाह कात्यायनः दशद्रोणा भवेत्खारी कुम्भो द्रोणास्तु विंश।
तिरिति द्रोणस्तु पलं च कुडवः प्रस्थ आढको द्रोण एव च धान्यमानेषु विज्ञेयाः क्रमशोऽमी चतुर्गु
णास्त्विति क्रमाज्ज्ञेयः यत्तु जाबालः पक्वान्नमाज्यं तैलप्राण्यन्नवासउपानहो कांस्यायस्ताम्रसीसं
वा त्रपुं [illegible] वच उदके फलमूलेषु दुग्धपर्णीसुगंधिषु मृद्भांडमधुमांसेषु संनोपस्वामि
नं ततः पादं निवेद्य विप्रेभ्यः प्रायश्चित्तेन शुध्यत इति कृच्छ्रार्धपादमित्यर्थः तदधिकपरि।
माणापहारादिविषयं जाबालः मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च अयःकांस्योपला।
नां च द्वादशाहं कणान्नतेति द्वादशाहं प्रायश्चित्तदर्शनात् तन्मूल्याद्द्वादशगुणमूल्यमणिमु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ई
प्रा॰म॰
५२

72

द्यपहारस्तद्विषयं यत्तु विष्णुः रजताब्जकांस्योर्णामकन्यानां मनुष्यहरणे चांद्रायणमिति तत्किंचिदधिकविषयं मन्तः ।
कार्पासकीटजीर्णानां द्विशफैकशफस्य च पक्षिगंधौषधीनां च रज्ज्वाश्चैव त्र्यहं पयः इति कीटजाः पट्टादयः ।
देवद्रव्यापहारे सुमंतुः देवद्विजद्रव्यहर्ताऽष्टानि मंत्रोऽघमर्षणमावर्तयेदिति अत्र संवत्सरप्रक्रमात्तावत्
कालीनावृत्तिर्ज्ञेया स्तेनप्रसंगाद्वृत्तिच्छेदे प्रायश्चित्तमाह शंखः यस्य यस्य तु वर्णस्य वृत्तिच्छेदं समाचरे
त् तस्य तस्य वधे प्रोक्तं प्रायश्चित्तं समाचरेत् अपहृत्य तु वर्णानां विप्रो भूमिं प्रमादतः प्रायश्चित्तं वधे ।
प्रोक्तं ब्राह्मणानुमते चरेदिति एतच्च वृत्त्यर्हभूम्यपहारे ज्ञेयं अत्र चापहारः प्रागुक्तस्वबलाज्ञानपूर्वं परस्वादान
वाचित्वात् प्रमादत इति शास्त्रार्थापरिज्ञानपरं अतो भयत्र वधनिमित्तकप्रायश्चित्तातिदेशः आदानं तच्च
कामकामात्कस्येति स्तेयापवादमाह शंखः अलाभे मनस्येकाहमलाभे पंचत्रणांगवे कन्याहरणमस्तेयं योढ़
त्वमनलंकृतामिति कन्याहरणं राक्षसविवाहपरं मनुरपि द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके आ
ददानः परक्षेत्रान्न दंडं दातुमर्हति तथा चणकव्रीहिगोधूमयवानां मुद्गमाषयोः अनिषिद्धैर्ग्रहीतव्यो मुष्टि
रेकः पथि स्थितैः तथैव सप्तमे भक्ते भक्तानि षड् अनश्नता अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः इति ॥
इति भट्टनीलकंठकृते प्रायश्चित्तमयूखे स्तेयप्रायश्चित्तानि ॥ अथागम्यागमनप्रायश्चित्तानि ॥ तत्र गु
रुतल्पे शंखः अधःशायी जटाधारी पर्णमूलफलाशनः एककालं समश्नंश्चैव वर्षे तु द्वादशे गते रुक्मस्तेयी

42

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सुरापश्च ब्रह्महा गुरुतल्पगः अनेनैतेन मुक्तानि महापातकिनस्त्विमइति गुरुतल्पगो गुरुभार्यागामी गुरुः
पिता अतएव संवर्त्तः पितृदारान्समारुह्य मातृवर्ज्जं नराधमः भगिनीं च निजां गत्वा निष्कृतिर्नैव विधीय
तइति निष्कृतिर्व्रतरूपा मरणान्तरूपा त्वस्त्येव पितृभार्यां तु वित्ताय मातृवर्ज्जं नराधमः जननीं वाप्यविज्ञा
यमतः शुद्धिमवाप्नुयात् इति मङ्क्षिप्रमतात् अत्र जननीगमनं न पातकं किंत्वतिपातकं मातृगमनं
दुहितृगमनं स्नुषागमनमित्यतिपातकानीति विष्णूक्तेः मातृदुहितृभगिनीस्नुषागमनान्यतिपातका
नीति भवदेवीये वृहद्धारीतोक्तेश्च एतेन गुरुश्चासावङ्गना चेति कर्मधारयेण जननीगमनं महापापमिति भ
वदेवोक्तिरपास्ता यत्तु शूलपाणिः आचार्यस्तु पिता ज्येष्ठो भ्राता चैव महीपतिः मातुलः श्वशुरस्त्राता
मातामहपितामहौ वर्णश्रेष्ठः पितृव्यश्च पुंस्येते गुरवो मता इति देवोक्तेः आचार्यः श्रेष्ठो गुरूणामिति
गौतमोक्तेः त्रयः पुरुषस्य गुरवो भवन्ति माता पिता आचार्यश्चेति विष्णूक्तेश्च आचार्यादिपत्नीगमनमपि म
हापापमित्याह तत्र आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पग इति आचार्यादिपत्नीषु गुरुतल्पातिदेश
विरोधात् न चातिदेशो हीनवर्णपत्नीपरो मानाभावात् देवलादिवचनसिद्धाचार्यादीनां पूज्यत्वपरा
णि कथं गुरोरलीकनिर्बन्ध इत्यत्र गुरुपदं केवलपितृपरमत्र त्वाचार्यादिपरमिति विरुद्धं शूलपाणि
वचोऽस्य इदं प्रायश्चित्तान्तरमाह हारीतः महाव्रतं चरेद्वापि पिबेद्वा सर्वसमेव चेति व्यभिचारिणा योऽसव

73

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

र्ण्यां मातरि स्वसृगमने तु योगी चांद्रायणं त्रीन्मासानभ्यसेद्वेदसंहितामिति गर्भोत्पत्तौ त्वेतान्येव प्रायश्चित्तानि
द्विगुणानि गमनेयत्कृतं प्रोक्तं गर्भे तु द्विगुणं भवेदित्युक्तत्वात् अभ्यासात् गमनावृत्तावपि प्रायश्चित्तावृत्तिः कामतोऽज्ञा
नतः पतिरिक्तं गुरुभार्यागमने तु याज्ञवल्क्यः तप्तेऽयःशयने सार्द्धमायस्या योषिता स्वपेत् गृहीत्वोत्कृत्य वृषणौ नैरृत्यां चोत्सृजेत्तनुम्।
मनुरपि स्वयं वा शिश्नवृषणावुत्कृत्याधाय चांजलौ नैरृतीं दिशमातिष्ठेदानिपातादजिह्मग इति आ
निपातेनेत्यत्र निपातो मरणं अयमेव च दंडः आसामन्यतमां गच्छन् गुरुतल्पग उच्यते शिश्नस्योत्कर्तना
त्तत्र नान्यो दंडो विधीयत इति देवलोक्तेः जनन्या अकामतोऽभिगमने एतदेव मरणांतप्रायश्चित्तद्वयं बोध्यं।
जनन्यां कामतस्तु वसिष्ठः निष्कालको घृताक्तो गोमयाग्निना पादप्रभृत्यात्मानमवदाहयेदिति शिरस
वस्थिता अलकाः केशाः कालकाः निर्गताः कालका यस्मात्सो निष्कालकः मुंडितशिरा इत्यर्थः अभ्यासे
गर्भोत्पत्तौ चेदमेवाभ्यासानुक्तेः एतानि तु प्रायश्चित्तानि औरसपुत्रस्यैव क्षेत्रजादीनां तु नैकल्प्यमिति निबंध
कृतः जनन्यां कामतः प्रवृत्तस्य रेतःसेकाद्वीजे हनौ द्वादशाब्दं अकामतः षडब्दं तत्सपत्न्यां कामतः षड
ब्दं अकामतस्तदर्धमिति कल्प्यं शूद्रस्य विप्रागमने तु प्रचेताः शूद्रस्य वा ब्राह्मणीं गच्छतः मुञ्जिमिक्ष
तः शूलमेवकृतं देयं मानायसाहितस्यसेति गुरुतल्पेऽस्मावपि साधारणस्त्रीगमने गुरुतल्पदोषो नास्ती
त्याह याज्ञपादः जाम्यकं परदार्यं च कन्यादूषणमेव च साधारणस्त्रियो नास्ति गुरुतल्पत्वमेव चेति साधार

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऊर्ध्वंकामतोऽत्यंताभ्यासपरमिदं अस्मिन्नेवविषये मनुः चंडालांत्यस्त्रियोगत्वाभुक्त्वाचप्रतिगृह्यच पतत्य
ज्ञानतोविप्रोज्ञानात्साम्यंतुगच्छतीति अत्राज्ञानात्ववाहं ज्ञानतोमरणं जनन्यांचभगिन्यांचस्वसुतायां
तथैवच स्नुषायांगमनंचैवविज्ञेयमतिपातकं अतिपातकिनस्त्वेतेप्रविशेयुर्हुताशनं नह्यन्यानिष्कृतिस्ते(
षांविद्यतेहिकथंचनेतिकात्यायनोक्तेः हृद्द्वारीतोपि मातृदुहितृभगिनीस्नुषागमनान्यतिपातकानिस
द्योग्निप्रवेशोतिपातकिनामिति यत्तुसंवर्तः पितृव्यभार्यागमनेभ्रातृभार्यागमेतथा गुरुतल्पव्रतंकु
र्यान्नान्यानिष्कृतिरुच्यतइति एतच्चाकामतोबहुकालाभ्यासविषयं कामतस्तुमरणांतिकमेव यत्तुयाज्ञ
वल्क्यः अनियुक्तभ्रातृजायांगच्छंश्चांद्रायणंचरेदिति तदसवर्णाव्यभिचारितभ्रातृजायाविषयमिति (
कनिष्ठभ्रातृभार्यागमनेचतुर्विंशतिमते भ्रातुश्चैवकनिष्ठस्यभार्यांगत्वातुकामतः कृच्छ्रद्वयंसांतपनं
प्रकुर्वीताथवापिबेदिति आचार्यभार्यागमने जातूकर्ण्यः आचार्यादेस्तुभार्यासुगुरुतल्पव्रतंचरेत् आ
दिपदादुपाध्यायादीनांग्रहणं यत्तुचतुर्विंशतिमते चरेच्चांद्रायणंविप्रोगत्वोपाध्याययोषितं आचार्य(
स्यपराकंतुबौधायनवचोयथेति तदभिचरितोपाध्यायादिपत्नीपरं यत्तुबृहद्यमः चांडालींपुक्कसींम्ले
च्छींस्नुषांचभगिनींसखीं मातापित्रोःस्वसारंचनिक्षिप्तांशरणागतां मातुलानींप्रव्रजितांसगोत्रांनृपयो
षितं शिष्यभार्यांगुरोर्भार्यांगत्वाचांद्रायणंचरेदिति यत्तुसमंतुः मातृष्वसृस्नुषाभगिनीभागिनेयीगो

75

चांडालीगमने व्रतमेतत्कृच्छ्रत्रयं सांतपनं चेति यमांगिरसः पतितान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च मासोपवा
सं कुर्वीत चांद्रायणमथापि वेति यमसंवर्तौ चांडालीं पुल्कसीं म्लेच्छीं श्वपाकीं पतितां तथा एता गत्वा द्विजो
मोहाच्चरेच्चांद्रायणव्रतं यमहारीतः गुरुतल्पगोऽमर्षयीत्स्त्रीप्रतिकृतिमग्निवर्णां कृत्वा तामालिंग्य मृ
त्युना पूतो भवति एवमेव पितृव्यस्त्रीगमने स्वसृमातृपितृष्वसृगमने कन्यासगोत्रा स्वस्त्रीया भगिनी
गमने चांद्रायणं चेति तत्र चांद्रायणं रेतःसेकादर्वाक् द्विःसकृज्ज्ञेयं यदपि संवर्तः भगिनीं मातुराप्तां च स्व
सारं चान्यमातृजां एता गत्वा द्विजो मोहात्तप्तकृच्छ्रं समाचरेत् कुमारीगमने चैव व्रतमेतद्धि निर्दिशेत् त
था गुरोर्दुहितरं गत्वा स्वसारं पितुरेव च तस्याः दुहितरं चैव चरेच्चांद्रायणव्रतं मातुलस्य सुतां गत्वा मातु
लानीं सनाभिनीं एता गत्वा स्त्रियो मोहात्पराकेणाविशुध्यतीति तद्वद्धि तत्पतितभगिन्यादिगमनविष
यं यमविष्णुः चंडालीगमने तत्साम्यं प्राप्नुयात् अज्ञानाच्चांद्रायणं यमगौतमः चांडालीगमने कृच्छ्रा
ब्दोऽमत्या द्वादशरात्र इति तत्र साम्यं कृच्छ्राब्दयोर्विषय उक्तः चांद्रायणस्यापि अज्ञानतः सकृद्दारोहण
मात्रे तद्द्वादशरात्रः बौधायनः मातृष्वसा पितृष्वसा भागिनेयी स्नुषा मातुलानीत्यगम्याः अगम्याग
मने कृच्छ्रातिकृच्छ्रौ चांद्रायणमिति संवर्तः सखिभार्यां समारुह्य श्वश्रूं चैव हिमानवः अहोरात्रोषितो भू
त्वा ततः कृच्छ्रद्वयं चरेत् चतुर्विंशतिमते मातृष्वसृस्वस्रीयां गत्वा पितृव्यतनयां तथा तप्तकृच्छ्रं प्रकुर्वीत प

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द्वतं तत्सुतासु च गुरोर्दुहितरं गत्वा पराकं च समाचरेत् भगिनेयीं द्विजो गत्वा चरेच्चांद्रायणव्रतं मातुलस्य सुतां गत्वा
पितृष्वसृसुतां तथा प्राजापत्यं प्रकुर्वीत हारीतवचनं यथा मातृष्वसृसुतां गत्वा भार्यां गत्वा तु कामतः पितृव्यत
नयां चैव सपादं कृच्छ्रमाचरेत् दौहित्रीं तत्तनयां चैव चांद्रायणव्रतं तत्सुतां तत्सुतां गत्वा पराकं समाचरेत्
संबंधिनः स्त्रियं गत्वा पादकृच्छ्रं समाचरेत् विधवागमने कृच्छ्रमहोरात्रं समन्वितं आचार्यस्य पराकं तु बोधायन
वचो यथा सखिभार्यां समारुह्य ज्ञातिस्वजनयोषितं सकृत्वा माकृतं कृच्छ्रपादं कुर्यात्ततः पुनः कुमारीगम
ने विप्रश्चरेच्चांद्रायणव्रतं पतितां च द्विजो गत्वा तदेव व्रतमाचरेत् बृहन्मनुः मातृमातृगमने पितृमातृ
गमने तथा एतासु कामतो गत्वा द्विजश्चांद्रायणं चरेत् संवर्तः असंगीमातुलानी च स्वसारं चान्यमातृजां
एताः स्त्रियो द्विजो गत्वा तप्तकृच्छ्रं समाचरेत् इत्याद्यनेकस्मृतिवचनानि संबंधसन्निकर्षविप्रकर्षापेक्षया यो
जनीयानि वर्णानामनुलोमतो गौतमः द्वेपरदारेष्वीरिणि श्रोत्रियस्य पश्वप्रलाभे चोत्सर्गो यथास्थानं वा गमये
दिति तथा यदद्गतं धनं तत्तु तस्य स्वयं तदीयं तत्रैव वा प्रत्यर्पयेत्तीयमित्यर्थः वार्षिकं प्राकृतं व्रतमुक्त्वा स एव उ
पपातकेषु चैवमिति यमः द्वे वर्षे परभार्यासु त्रीणि श्रोत्रियपत्नीष्विति तत्रेयं व्यवस्था ऋतुकाले काम
तो जातिमात्रब्राह्मणीगमने वार्षिकं तत्रैव गुणविशेषशालिन्यां द्वे वर्षे तादृश्यामेव श्रोत्रियभार्यायाम
गमने त्रीणि वर्षाणीति अथवा श्रोत्रियगुणवद्ब्राह्मणक्षत्रियादिभार्याविषयत्वेनैतानि व्यवस्थापनीया।

77

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नि अतएव शंखः वैश्यायामवकीर्णः संवत्सरं ब्रह्मचर्यं त्रिषवणं चानुतिष्ठेत् क्षत्रियायां द्वे वर्षे त्रीणि ब्राह्मण्यां
वैश्यावच्च शूद्रायामिति वैश्याद्वेति ब्राह्मणापविणीनार्यां शूद्रपरिणीतायां तु षाण्मासिकमेव शूलपाणिस्तु
सकृद्गम्यां वैश्यावत् असकृद्गम्यां तु षाण्मासिकमिमाह तेन क्षत्रियस्यापि क्षत्रियागमने द्विवार्षिकमेव तदा
ह प्रजापतिः विप्रोन्यस्य भार्यायां यः करोति समागमे तदेव क्षत्रियस्यापि कुर्यात्तत्रैव संगमे इति एवं क्षत्रि
यस्य वैश्यादिस्त्रीषु क्रमेण वार्षिकं षाण्मासिकं च एवं वैश्यस्यापि वैश्यायां शूद्रायां वार्षिकषाण्मासिके शूद्रस्य शू
द्रायां षाण्मासिकमेव अत्र पञ्चकागमनमापस्तंबः सवर्णायामनन्यपूर्वायां सकृत्संनिपाते पादः पतत्येव (
मभ्यासे पादः पादश्चतुर्थे सर्वमिति अत्र पञ्चकायामेकस्यां श्रोत्रियपत्न्यां गमने पादस्तत्रैव वार्षिकं ताह
र्षं द्वितीयायां षड्वर्षं तृतीयायां नववर्षं चतुर्थ्यां द्वादशाब्दं अनन्यपूर्वायामित्युक्तेः एकस्यामेव चतुरभ्यासेन
दं प्रायश्चित्तं किंतु पादपादन्यूनं कल्प्यमिति शूलपाणिविज्ञानेश्वरौ अभिचरितक्षत्रियावैश्यागमने (
स एव क्षत्रियां वाथ वैश्यां वा गत्वा शूद्रयः काममोहितः तस्य सांतपनं कृच्छ्रं भवेत्तत्पापमोचकं तत्सवर्णानुलो
मविषयं यत्तु स एव विप्रामस्वजनां गत्वा प्राजापत्यं समाचरेदिति तदभिचरितब्राह्मणीविषये ब्राह्मणस्य (
यत्तु वसिष्ठः ब्राह्मणश्चेदप्रेक्षापूर्वकं ब्राह्मणदारानभिगच्छेदनिवृत्तधर्मकर्मणः कृच्छ्रो निवृत्तकर्मणोतिकृच्छ्र
इति अप्रेक्षाज्ञानं निवृत्तधर्मकर्मणो दासानि एव वयः ब्राह्मणस्य स्वैरिणीप्रायश्चित्तमाह यमः ब्राह्मणी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मित्यर्थः अल्पाणीत्तु स्वैरिणां तल्पामवकीर्णी इति पठित्वा प्रकृतत्प्रमनेन स्वैरिण्यां अपत्योत्पादनेप्येतदेव प्रायश्चित्तं ॥ ६

ब्राह्मणीं गत्वा द्विजे दद्यान्मृगाजिनं क्षत्रियायां धनुर्दद्याद्वैश्यायामायसीं शिलां शूद्रां गत्वा तथा विप्र उदकुंभं द्वि
जातये त्रिरात्रोपोषितः स्नात्वा दद्यात्संमार्जनीं तथेति अत्र त्रिरात्रोपोषितः स्नात्वेति प्रत्येकं संबध्यते एतच्च बं
धकीविषयमित्यन्ये स्वैरिणां प्रायश्चित्तान्तरमाह हारीतः शंखलिखितौ स्वैरिणां तु तल्पामवकीर्णः सचैलस्ना
त उदकुंभं ब्राह्मणाय दद्याद्वैश्यायां चतुर्थकालाहारो ब्राह्मणान्भोजयेत् क्षत्रियायां त्रिरात्रोपोषितो यवाढकं
दद्याद्ब्राह्मण्यां षड्रात्रमुपोषितो घृतपात्रं दद्यादिति कल्पतरुकारस्तु अकीर्णां स्वैवमस्वतंत्रा स्वितिवाक्यशेषं
पपाठ प्रकीर्णा केनचिदवरुद्धा अस्वतंत्रा च न वरुद्धा तदेवं द्विविधस्वैरिणीगमने प्यजदेव प्रायश्चित्तमित्याह
तत्र ताद्दशपाठस्य कल्पतरुप्रभृतिषु दृष्टत्वात् गर्भोत्पादने द्विगुणप्रायश्चित्तस्य वक्ष्यमाणत्वाच्च बंधकीग
मने तु षड्विंशन्मते ब्राह्मणीं बंधकीं गत्वा किंचिद्दद्याद्द्विजातये राजन्यां च धनुर्दद्याद्वैश्यां गत्वा तु चैलकं शू
द्रां गत्वा तु वै विप्र उदकुंभं द्विजातये दिवसोपोषितो वा स्याद्दद्याद्विप्राय भोजनमिति किंचिद्दृष्टमुद्ध्यात्मकं।
धान्यं अष्टमुष्टि भवेत्किंचिदिति स्मृतेः प्रायश्चित्तान्तरमाह प्रचेताः बंधकीगमने उपस्पृश्य प्राणायामं कु
र्यात् ब्राह्मणीं बंधकीं गत्वा कमंडलुं दद्यात् क्षत्रियबंधकीमायुधं वैश्यबंधकी प्रतोदमिति अत्र त्रिषु वर्णोत्र
योपादानात् प्रथमं शूद्रबंधकीपरं स्वैरिणी बंधकी लक्षणमुक्तं स्मृत्यंतरे चतुर्थे स्वैरिणी प्रोक्ता पंचमे बंध
कीमतेति महाभारतेपि अतः परं स्वैरिणी स्यात्पंचमे बंधकी तथेति चतुर्थपंचमावत्र व्यभिचारौ विवक्षितौ।

79

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शु
प्रा॰म॰
५७

पुरुषावित्यन्ये यत्तु मनुः शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिं जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते इति त
त्पापगौरवपरं पातित्यप्रायश्चित्तानि गर्भोत्पत्तिविषयाणि तदुक्तं यद्विशेषेण प्रायश्चित्तमुक्तं तदेव तद्विगु
णं कर्तव्यं तथा चोशना गमने तु व्रतं यत्स्यात्कुर्भे तद्विगुणं चरेदिति आपस्तंबः चांडालमेदश्वपचकपालव्रत
धारिणां अकामतः स्त्रियं गत्वा पराकव्रतमाचरेत् कामतस्तु प्रसूतो वा तत्समो भवत्यसंशयः स एव पुरुषस्त
स्यां गर्भो भूत्वाभिजायत इति कामतः प्रसूतो वेति यथाकामतो द्विगुणमुक्तं तथा गर्भेपीत्यर्थः चतुर्विंश
तिमते तु जातिभेदेन गर्भे प्रायश्चित्तविशेष उक्तः ब्राह्मणीगमने कृच्छ्रं गर्भे सांतपनं स्मृतं क्षत्त्रिगर्भे पराकः
स्याद्विड्गर्भे तु महाधिकं शूद्रागर्भे द्विजः कुर्यात्तप्तकृच्छ्रं समाप्य पापं स्मृतं चांडालीगर्भमारोप्य गुरुतल्पव्रतं चरेदि
ति तत्रैव वृषल्याममिजातस्य त्रीणि वर्षाणि चतुर्थकालसमये नं भुंजीतेति एतच्च कामतोत्पन्नाभ्या
सेन गर्भोत्पत्तौ अभिजात उत्पादितगर्भः यत्तु हारीतः ब्राह्मणो वृषलीं गत्वा त्र्यहं भवति सूतकी अथास्यां
गर्भमाधत्ते ब्राह्मण्यादेव हीयत इति तथा ब्राह्मणो वृषलीं गत्वा सद्यो गच्छेदधोगतिं अथास्यां गर्भमाधत्ते
पतत्याशु न संशय इति तदेतानि पापगौरवव्याख्यानपराणि कण्वः प्रसूतो यस्तु वैश्यायां भेद्यस्य क्षत्त्रियतः
स्त्रियः शतसहस्रमभ्यस्य गायत्रीमतिशुद्धतामिति अत्र कैवर्ती रजकी चैव वेणुपावापिगतो नरः प्राजाप
त्यविधानेन कृच्छ्रेणैकेन शुध्यतीति शातातपवाक्ये देशपासममितिव्याख्या ह्यत्र कैवर्त्यादिषु गर्भोत्पादनेपी द

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मेवप्रायश्चित्तमिति प्रातिलोम्येनुवाद्येन शंखः प्रातिलोम्येवधः पुंसो नार्याः कर्णादिकर्त्तनमिति वधः प्रायश्चि
त्तं दंडश्च नार्याः कर्णादिकर्त्तनं तु यथोक्तप्रायश्चित्तमनिच्छन्त्याः वधप्रकारविशेषमाह वसिष्ठः शूद्रश्चेद्ब्रा
ह्मणीमभिगच्छेद्वीरणैर्वेष्टयित्वा शूद्रमग्नौ प्रास्येद्ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां खरमारोप्य महा
पथमनुसंव्राजयेत्पूता भवतीति विज्ञायते वैश्यश्चेद्ब्राह्मणीमभिगच्छेल्लोहितदर्भैर्वेष्टयित्वा वैश्यमग्नौ प्रास्ये
द्ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां गौरखरमारोप्य महापथमनुसंव्राजयेत्पूता भवतीति वि
ज्ञायते राजन्यश्चेद्ब्राह्मणीमभिगच्छेच्छरपत्रैर्वेष्टयित्वा क्षत्रियमग्नौ प्रास्येद्ब्राह्मण्याः शिरसि वपनं कारयित्वा
सर्पिषाभ्यज्य नग्नां खरमारोप्य महापथमनुसंव्राजयेत्पूता भवतीति विज्ञायते एवं वैश्यो राजन्यायां शूद्रश्च
राजन्यवैश्ययोरिति महापथव्रजनं दंडः प्रायश्चित्तं च पूता भवेदिति निमित्ताद्दारायां अपरार्के तु पूताप्राय
श्चित्तयोग्येति व्याख्यातं एतच्च कामतः अकामतस्तु शूद्रस्य मरणावैकल्पिकचतुर्विंशत्यब्दं द्वादशाब्दं
शूद्रस्यैव क्षत्रियावैश्ययोर्नववार्षिकषड्वार्षिके यथाह प्रचेताः शूद्रस्य ब्राह्मणीगमने ह्यज्ञानतः शुद्धि
मिच्छतः पूर्णमेतद्व्रतं देयमानायस्माद्धितस्य सा पादहान्यान्यवर्णासु गोघ्नवत्सार्ववर्णिकं प्रायश्चित्तमि
ष्टं यमगम्यागमने क्रमात् एतद्विप्रावैश्यास्यान्ततो विप्रागमनेन वाब्दं क्षत्रियस्य तु षडब्दं एवमेव शूल
पाणिरपि एतन्माधवीये संवर्त्तः कथंचिद्ब्राह्मणीं गच्छेत्क्षत्रियो वैश्य एव वा गोमूत्रयावकाहारो मासेनैव

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

82

केनशुद्ध्यतीति तदेतत्तपश्चिचरितायामकामतो गमने ज्ञेयं मिताक्षरायां तु ज्ञात्वा चैवं कृच्छ्रं सांतपनं वा स्यात्प्रा
यश्चित्तं विशुद्धये इति रजस्वलागमने प्रायश्चित्तमाह योगी निरात्रं ते घृतं प्राश्य पराकोदक्यां विशुद्ध्यतीति त्रि
रात्रोपवासांते घृतपानार्थः इदमकामतः सकृद्गमने अत्रैव कल्पतरौ षट्कालिखितौ रजस्वलां वधूतां वा गमने त्रि
रात्रोपवासो घृतप्राशनं च कामतः सकृद्गमने शातातपः रजस्वलागमने सप्तरात्रमिति यत्तु वसिष्ठः
रजस्वलाशवायेत्तलाम्रषभं दद्यात् सर्पिंगलमिति यदुक्तापस्तंबः उदक्यां यदि गच्छेत् ब्राह्मणो म
दमोहितः प्राजापत्येन शुद्ध्येत ब्राह्मणानां च भोजनादिति तदकामतोऽभ्यासे कामतः सकृद्गमने च का
मतोऽभ्यंतानवछिन्नाभ्यासे तु शंखः पादं नश्च्चकृच्छ्रपायामुदक्यागमने तथेति कामतोऽभ्यासमात्रे तु
संवर्तः रजस्वलां तु यो गच्छेद्गर्भिणीं पतितां तथा तस्य पापस्य शुद्ध्यर्थमतिकृच्छ्रं विशोधनमिति द्विजस्ये
दाप्रायश्चित्तविशेषश्च चतुर्विंशतिमते रजस्वलां तु यो गच्छेत्पराकं तु समाचरेत् सांतपनं द्वितीये त्वाप्रा
जापत्यं परे हनीति सांतापने महासांतपनं ज्ञातिमदनपारिजाते यत्तु माधवीये शातातपः अनुदकमू
त्रपुरीषकर्मणोश्वपाकस्पर्शे सचैलस्नाने महाव्याहृतिहोमश्च रजस्वलागमने चैतदेवेति तदकामतः
प्रहृत्तस्वेतः सेकादर्वाङ् निवृत्तौ बोध्यं कामतस्त्वेतदेव द्विगुणं यत्तु विष्णुना स्वसुः सख्याः सगोत्राया
उत्तमवर्णाया रजस्वलायाः शरणागतायाः प्रव्रजितायाः निक्षिप्तायाश्च गमनमित्येतान्यनुपातका

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नीत्यनेन रजस्वलागमनेऽनुपातकप्रायश्चित्तमुक्तं तच्छ्रोत्रियपत्न्याः कामतोऽभ्यन्तानवच्छिन्नाभ्यासविषयं एतानि रजस्वला।
तर्वेत्यादिगमनप्रायश्चित्तानि स्वपत्न्यामेव परपत्न्यां तु तादृश्यां पारदार्यप्रायश्चित्तैर्विजातीयैः समुच्चीयन्ते सा
जात्येतु अधिकेनमृतस्य प्रसंगसिद्धिः साम्येतु तत्रमिति एवं विधवादिगमनेपि योज्यं तत्र प्रायश्चित्तं चतुर्वि
शतिमते विधवागमने कृच्छ्रमहोरात्रसमन्वितं व्रतस्थागमने कृच्छ्रं सपदं तु समाचरेत् ॥ अथान्त्यजाग
मनप्रायश्चित्तं आपस्तंबः रजकश्चर्मकारश्च नटो बुरुड एव च कैवर्तमेदभिल्लाश्च सप्तैते चांत्यजाः स्मृताः
बृहत्संवर्तः रजकव्याधशैलूषवेणुचर्मोपजीविनीः एतास्तु ब्राह्मणो गत्वा चरेच्चांद्रायणद्वयमिति।
आपस्तंबः म्लेच्छी नटी चर्मकारी रजकी बुरुडी तथा एतासु गमनं कृत्वा चरेच्चांद्रायणद्वयमिति आपस्तंबः
एतच्च विप्रस्य कामतः सकृद्गमने क्षत्रियादेस्तु पादहीनं कल्प्यं संवर्तः रजकव्याधशैलूषवेणुचर्मोपजी
विनां स्त्रियो विप्रो यदा गच्छेत्कृच्छ्रं चांद्रायणं चरेत् तदकामतः अत्र चाहापस्तंबः चंडालमेदश्वपचकपा।
लव्रतचारिणां अकामतः स्त्रियो गत्वा पराकव्रतमाचरेदिति यत्तु यमः कापालिकान्नभोक्तॄणां तन्नारीगा।
मिनां तथा ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञानादैंदवद्वयं तदकामतोऽभ्यासे यत्तु शातातपः कैवर्तीरजकीचैव वे
णुचर्मोपजीविनां प्राजापत्यविधानेन कृच्छ्रेणैकेन शुद्ध्यतीति तच्छूद्रपरं अस्मिन्नेव विषये हि स्त्रीगमनाभ्या
से हारीतः कैवर्तीध्वजिनी चैव वयाश्चान्याश्चांत्यसंभवाः कामतस्तु व्रजन्विप्रो एतास्त्वेवं समाचरेत् द्वौमासौ भक्ष्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ॐ प्रा.म. ५९

84

मद्यपाद्द्वौमासौयवयावकैः द्वौमासौपंचगव्येनषण्मासांश्चरितव्रतः एवंशुद्धिमवाप्नोतिप्रायश्चित्तानुरोधतइ
ति येचान्त्यावसायिनश्चांडालादयस्तेषांस्त्रीगमनेगुरुप्रायश्चित्तमुक्तं गुरुतल्पातिदेशः एतासांरजकाद्यंत्यजस्त्री
णांमध्येयदेकस्याव्यवायेप्रायश्चित्तमुक्तंतत्सदृशात्सर्वासुभवति तथाचोशनाः बहूनामेकधर्मिणामेक
स्यापियद्युच्यते सर्वेषांतद्भवेत्कार्यमेकरूपाहितेस्मृताइति एतासुगर्भोत्पत्तौतुविशेषउक्तः उशनसा चांडाल्यां
गर्भमारोप्यगुरुतल्पव्रतमाचरेदिति एतच्चव्रतातिदेशान्नवाद्द्ध तच्चाकामतः कामतः पुनरापस्तंबः अंत्यजा
यांप्रसूतस्यनिष्कृतिर्नविधीयते निर्वासनंकृतांकस्यतस्यकार्यमसंशयमिति ॥ अथस्त्रीणांव्यभिचारेप्राय
श्चित्तं मनुः यत्पुंसःपरदारेषुतच्चैनांचारयेद्व्रतमिति एतच्चवाचनिकातिदेशात्पादोनमितिकेचित् पूर्णमे
वयुक्तं तथाचबृहस्पतिः यत्पुंसःपरदारेषुसमानेषुविधीयते व्यभिचारेपिभर्तुःस्त्रीतद्दोषंसमापयेदिति
समानेष्वित्यनुलोमानामप्युपलक्षणं तच्चप्रतिलोमव्यवायव्यावृत्त्यर्थं तत्रगुरुप्रायश्चित्तोक्तेः भर्तुःपुंसः अ
व्यवस्थितकल्पनात्पुन्पाद्येवेति अतश्चसवर्णानुलोमव्यवायेस्त्रीपुंसयोर्नैसर्गिकं तुल्यंप्रायश्चित्तं तस्यक्व
चिदपवादः तथाचसंवर्तः बलात्कारमथभुक्ताचेदस्यमानेनचेतसा प्राजापत्येनशुद्धिःस्यात्तस्याःपावनंप
रमिति पराशरोपि सकृद्भुक्तातुयानारीनेच्छंतीपापकर्मभिः प्राजापत्येनशुध्येतऋतुप्रस्रवणेनवेति बृहस्पति
रपि अनिच्छंतीतुयाभुक्तागुप्तांतांकारयेद्गृहे मलिनांगीमधःशय्यांपिंडमात्रोपजीविनीं कारयेन्निष्कृतिंकृच्छ्र

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

85

पराकवासमंगतां हीनवर्णोपभुक्तायाप्याञ्चाव्यापिवानवेदिति समंसमानजातीयं अत्रसकृदुपगमेकृच्छ्रंहि
रभ्यासेपराकः अभ्यासेतुचांद्रायणं नयदाहोशना व्यभिचारिणींभार्यांकृच्छ्रेणपिंडगुप्तां निवृत्ताधिकारांचांद्रायणं
पराकंप्राजापत्यंवाकारयेदिति मनुः साचेत्पुनःप्रदुष्येत्तुसदृशेनोपयंत्रिता कृच्छ्रंचांद्रायणंचैवतदास्याःपापशो
धनमिति वृद्धवाकामतः कामतस्तुद्विगुणं यत्तत्रयमभंगः बलेनकामितानारीसवर्णेनकथंचन प्रायश्चि
त्तंत्रिरात्रंवैतस्याःशुद्ध्यर्थमादिशेदिति तद्वेतःसेकात्प्राङ्-कृतोद्रष्टव्यं पराशरोपि बंदिग्राहेणवाभुक्ताहृत्वाब(
द्धाबलाद्भयात् कृत्वासांतपनंकृच्छ्रंशुद्ध्येत्पाराशरोब्रवीत् सकृद्भुक्ताप्रहृष्टेनैवतस्याःप्रत्यल्पमेवप्रायश्चित्तं तदाह
तुः शंखलिखितौ सकृद्याव्यभिचारिणीपरदारेषुपुंसोविहितंतच्चारयेदिति अंगिराः व्रतंयच्चोदितंपुंसांपतित
स्त्रीनिषेवणात् तच्चापिकारयेन्मूढांपतितासेवनात्स्त्रियमिति आसेवनादितिपदच्छेदः तच्चकामतः अकाम
मतस्त्वाह संवर्त्तः ब्राह्मणीकामाद्गच्छेच्चेत्क्षत्रियंवैश्यमेववा गोमूत्रयावकैर्मासात्तदर्धाच्चविशुद्ध्यति ब्राह्म(
णीशूद्रसंपर्केकथंचित्समुपागते चांद्रायणेनशुद्धिःस्यात्तस्याःपावनंस्मृतमिति शूलपाणिस्त्वनिर्वृत्तीविष
यमेतदिति मासादितिवैश्ये क्षत्रियेत्वर्द्धमिति षट्त्रिंशन्मतेपि ब्राह्मणीक्षत्रियवैश्यसेवयातिकृच्छ्रंकृच्छ्रंकृच्छ्रौ
चरेत् क्षत्रिययोषितोब्राह्मणवैश्यसेवायांकृच्छ्रार्द्धंप्राजापत्यमतिकृच्छ्रंच वैश्ययोषितोब्राह्मणराजन्यवैश्यसे(
वायांकृच्छ्रपादंकृच्छ्रार्द्धंप्राजापत्यंच शूद्रायाःशूद्रसेवनेप्राजापत्यं ब्राह्मणराजन्यसेवायांत्वहोरात्रंकृच्छ्रार्द्धमिति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्रह्मचेताः विप्राश्शूद्रेणासंयुक्ता न चेत्तस्मात्प्रसूयते प्रायश्चित्तं स्मृतं तस्याः कृच्छ्रं चान्द्रायणत्रयं चान्द्रायणे द्वे कृच्छ्रञ्च
विप्रायां वैश्यसंगमे कृच्छ्रं चान्द्रायणोस्यात्तां तस्याः क्षत्रियसंगमे क्षत्रियाः शूद्रसंपर्के कृच्छ्रं चान्द्रायणद्वयं चान्द्रायणं
सकृच्छ्रं तु चरेद्वैश्येन संगता शूद्रं गत्वा चरेद्वैश्या कृच्छ्रं चान्द्रायणोत्तरं आनुलोम्येन उर्वी तत्कृच्छ्रपादावरोपितमिति
न चेत्तस्मात्प्रसूयेत इति सर्वत्र संबध्यते ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण संगताः अप्रजाता विशुध्यन्ति प्रायश्चि
त्तेन नेतरा इति वसिष्ठोक्तेः पादावरोपितं पादहान्याः श्लोकः शूद्रगमने यत्प्रायश्चित्तं तद्विट्क्षत्रियविप्रगमने पादार्ध
त्रिपादोनं भवति एवं वैश्यायाः वैश्यगमने उक्तं तत्क्षत्रियगमने यद्विप्रगमने पादोनमर्धं च भवति क्षत्रियायाः क्षत्रि
यगमने तद्विप्रगमने पादोनमित्यर्थः गर्भे त्वसौ तु वर्ज्यं विशुद्ध्यतिमते विप्रगर्भे पराकः स्यात्क्षत्रियस्य तथैन्दवं ऐन्दवं च
पराकं च वैश्यस्याकामकारतः शूद्रगर्भे भविष्या गम्या चाण्डालो जायते यतः गर्भस्रावे धातुदोषे स्त्रैवं चान्द्रायणत्रयम्
एतच्चाकामकारत इति विशेषणात् अकामतः कामतः पुनः पराकादि द्विगुणं कुर्यात् गर्भस्रावतः शूद्रगर्भस्रावे यदा
तु संपूर्णो शूद्रगर्भस्य प्रसवस्तदा प्रायश्चित्ताभाव एव अप्रजाता विशुध्यन्ति प्रायश्चित्तेन नेतरा इति वसिष्ठोक्तेः यदा
त्वाहितगर्भे व्यभिचरति तदा गर्भपातशंकया प्रसवोत्तरकालमेव प्रायश्चित्तं कार्यं तदुक्तं मिताक्षरायां स्मृत्यन्तरे अन्तर्वे
त्नी तु या नारी समेतोत्क्रम्य कामिता प्रायश्चित्तं न कुर्यात्तस्या यावद्गर्भो न निःसृतः जाते गर्भे व्रतं कुर्यात्पश्चान्मासं तु
यावकं न गर्भदोषस्तत्रास्ति संस्कार्यः स यथाविधिरिति अंत्यजगमने पित्रीणां प्रायश्चित्तमुक्तं स्मृत्यन्तरे चण्डालपु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कसंम्लेछंश्वपाकंपतितंतथा ब्राह्मणःकामतोगत्वाचांद्रायणंचरेत् तथा रजकव्याधशैलूषवेणुचर्मोपजीवि
नः ब्राह्मणैतान्यदागच्छेदकामात्कृच्छ्रमिति पराशरः चंडालेनतुसंपर्कंयदिगच्छेत्कथंचन सशिखंवप
नंकुर्याद्भुंजीयाद्यावकौदनं त्रिरात्रमुपवासःस्यादेकरात्रंजलेवसेत् आत्मनासमितेकूपेगोमयोदककर्द
मे तत्रस्थित्वानिराहारास्त्रिरात्रंततःक्षिपेत् शंखपुष्पीलतामूलंपत्रंवाकुसुमंफलं क्षीरंसुवर्णसं
मिश्रंक्वाथयित्वाततःपिबेत् एकभक्तंचरेत्पश्चाद्यावत्पुष्पवतीभवेत् बहिस्तावत्तुनिवसेद्यावत्त्वृति।
तद्व्रतं प्रायश्चित्तेतथाचीर्णेकुर्याद्ब्राह्मणभोजनं गोद्वयंदक्षिणांदद्यात्शुद्धिंस्वायंभुवोब्रवीदिति एतच्चा
ज्ञानविषयं कामतःसकृद्गमनेतु ऋष्यशृंगः संवत्सरंस्यादभ्यासेपर्यासाकृच्छ्राब्दसमाचरेदिति कामतोऽत्यंत
संपर्केतूशना अंत्यजेनतुसंपर्केभोजनेमैथुनेकृते प्रविशेत्संप्रदीप्तेग्नौमृत्युनासाविशुध्यतीति यच्छा
तातपः म्लेच्छेनाधिगताश्शूद्राअकामाद्वाकथंचन कृच्छ्रत्रयंप्रकुर्वीतस्नानेनशुद्धिमृणांभवेदिति अत्रचम्लेच्छ
ग्रहणमेकवाक्योपात्तानांचंडालानामप्युपलक्षणं बहूनामेकधर्माणामितिवचनेवावक्ष्यात् यदपिसंवर्तः।
चांडालंपुक्कसंम्लेच्छंश्वपाकंपतितंततः एतान्गत्वास्त्रियोमोहात् कुर्याच्चांद्रायणंपरमिति तदकामतःप्रवृत्त
स्यरेतःसेकात्प्राक्निवृत्तौद्रष्टव्यं आहितगर्भायाश्चंडालादिव्यवायेतु ऋष्यशृंगः अंतर्वत्नीतुयुवतिःसंगच्छा
चांत्ययोनिना प्रायश्चित्तंनसाकुर्याद्यावद्गर्भोननिःसृतः नप्रचारंगृहेकुर्यान्नचांगेषुचमाधनं नशयीतस

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दं
प्रा. म.
६१

संभर्त्तानवाभुंजीतबांधवैः प्रायश्चित्तंगर्भेविधिंकृत्वाद्विकंचरेत् द्विजःप्रस्थवार्थेन्दुदद्याद्विमायदक्षिणामिति ।
मानसिकवाचिकव्यभिचारयोःप्रायश्चित्तमाह वसिष्ठः मनसाभर्त्तुरभिचारेत्रिरात्रंयावकंक्षीरौदनंवाभुंजा ।
नाऽधःशयीत ऊर्ध्वंत्रिरात्रादप्सुनिमग्नायाःसावित्र्याचतुर्भिरष्टशतैःशिरोभिर्जुहुयात्पूताभवतीतिविज्ञा
यते वाक्संबंधेप्येतदेवमासंचरित्वाऊर्ध्वंमासादप्सुनिमग्नायाःसावित्र्याचतुर्भिरष्टशतैःशिरोभिर्जुहुया
दिति अष्टाधिकंशतंमष्टशतंतैश्चतुर्भिःशिरोभिःशिरःसहितैरित्यर्थः इदंचमानसिकव्यभिचारेप्रायश्चित्तं
रजोदर्शनादर्वाग्व्यवहार्यत्वसिद्धये रजोदर्शनेतुसतितेनैवशुद्धिः तथाचमनुः मलिनोयैःशोध्यतेशोध्यनदी
वेगेनशुध्यति रजसास्त्रीमनोदुष्टासन्यासेनद्विजोत्तमइति अपजातिव्यवायेतु पराशरः हीनवर्णोपभुक्तायाः
सांकारावध्यापिवाभवेदिति सार्वकत्रयप्रत्येपगएव चतस्रस्तुपरित्याज्याःशिष्यगागुरुगाचया पतिघ्नीचवि
शेषेणजुंगितोपगताचयेतिवसिष्ठोक्तेः जुंगितःप्रतिलोमजः अत्रचविशेषविधानात्परित्यागोगृहान्निर्वास
नमेव अन्यत्रतु विप्रदुष्टांस्त्रियंभर्त्तानिरुंध्यादेकवेश्मनीतिमनूक्तोनिरोधः याज्ञवल्क्योपि हृताधिका
रांमलिनांपिंडमात्रोपजीविनीं परिभूतामधःशय्यांवासयेद्व्यभिचारिणीमिति अत्रचवासनंवैराग्यजन
नार्थमेव यत्तुचतुर्विंशतिमते स्त्रीणांनास्तिपरित्यागोब्रह्महत्यादिभिर्विना तत्रापिगृहमध्येतुप्रायश्चित्तं ।
निकारयेत् परित्यक्ताचरेत्पापंबहुलंस्वल्पंवापिकिंचन तत्पापंशतधाभूत्वावांधवानपिगच्छतीति तत्कर्मानुरूप

४४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्यर्थं तद्युक्तायास्तु परित्यागमाह पराशरः जारेण जनयेद्गर्भं मृते त्यक्ते गते पतौ तां त्यजेत्परे राष्ट्रे पतितां पापका
रिणीमिति अपरे राष्ट्रे उक्ते गर्भे हत्ये निष्कासनं गम्यते अत एव चतुर्विंशतिमते चतस्र एव संत्याज्याः पतने सत्यपि
स्त्रियः श्वपाकोपहतायास्तु भर्तृघ्नी पतितोपगेति अत्र शिष्यगादीनां त्यागो गर्भविषय एव व्यभिचारादौ

शुद्धिर्गर्भे त्यागो विधीयते गर्भभर्तृवधादौ च तथा महति पातक इति याज्ञवल्क्योक्तेः गर्भः शूद्रादिकृतः
ब्राह्मणात्क्षत्रियविशां भार्याः शूद्रेण संगताः अप्रजाता विशुद्ध्यन्ति प्रायश्चित्तेन नेतरा इति वसिष्ठस्मरणात्
शूद्रग्रहणं प्रतिलोमजोपलक्षणार्थं तत्त्रैवर्णिकव्यावृत्त्यर्थं तेन शिष्यगा गुरुगा यो वा पित्रैवर्णिकयोः प्रस
वेन त्यागः अयं च त्यागो न गर्भमात्रे किंतु प्रसवमात्र इतिप्राग्व्यातं अयमेवाभिप्रायो माधवाचार्याणां मिता
क्षरायां तु व्यवहारनिरोध एव त्यागशब्देनोक्तो न तु गृहान्निर्वासनमपीति ॥ इति स्त्रीप्रायश्चित्तं ॥ अथ प
श्वगमने शंखलिखितौ तिर्यग्योनिषु गोवर्जं सचैलः स्नातो यवसभारं दद्यात् पराशरः महिषीुष्ट्रीखरी
गामी त्वहोरात्रेण शुध्यतीति इदमकामतः कामतस्तु जाबालः एतदेवाश्वपशूनां तु कृच्छ्रपादो विशोधन
मिति कामतोऽभ्यासे संवर्तः पशुवेश्याभिगमने प्राजापत्यं विधीयते शुनीगमने विप्राणां चतुर्विंशति
मृते शुनीं चैव द्विजो गत्वा प्रतिकृच्छ्रं समाचरेदिति यत्तु गौतमः अमानुषीषु गोवर्जं स्त्रीगमने कूष्माण्डै
र्घृतहोम इति तत्कामाकामसकृदभ्यासे षड्विंशत्यष्टोत्तरशताष्टोत्तरसहस्रादिसंख्यायोज्यं अथगो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गमने पराशरः गोगामी च त्रिरात्रेण गामेकां ब्राह्मणेभ्यो दद्यात् इदमकामतः सकृद्गमने कामतो विष्णुः गोव्रतं
गोगमने च कामतोऽभ्यासे तु शंखलिखितौ गोष्ववकीर्णः संवत्सरं प्राजापत्यं चरेदिति यत्तु गौतमः गवि
गुरुतल्पसमं तदितत्क्षानाज्ञानाभ्यासे ॥ अथ व्रतलोपे योगीश्वरः अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु यो
षितं गर्दभं पशुमालभ्य नैरृतं स विशुध्यति मनुः अवकीर्णी तु काणेन गर्दभेन चतुष्पथे पाकयज्ञ
विधानेन यजेत निरृतिं निशि हुत्वाग्नौ विधिवद्धोमानन्ततश्च समित्यृचा वा चेन्द्रगुरुवह्नीनां जुहुयात्सर्
पिषाहुतीः एतस्मिन्नेनसि प्राप्ते वसित्वा गर्दभाजिनं सप्तागारं चरेद्भैक्षं स्वकर्म परिकीर्तयन् तेभ्यो लब्धे
न भैक्षेण वर्तयन्नेककालिकं उपस्पृशंस्त्रिषवणमब्देन स विशुध्यति पाकयज्ञविधानं च अथ पशुक
ल्पसूत्रमाश्वलायनाद्युक्तं अत्राहुतीरिति बहुवचनात्कपिंजलन्यायेन आहुतित्रयमेव ज्ञेयं वसिष्ठोऽपि ब्रह्म
चारी चेत्स्त्रियमुपेयादरण्ये चतुष्पथे लौकिकेऽग्नौ रक्षोदैवतं गर्दभं पशुमालभेत् नैरृतं वा चरुं निर्वपे
त् तत्र तस्य जुहुयात् कामाय स्वाहा रक्षोदेवताभ्यः स्वाहेति अत्र गर्दभयागास्तु सर्वे वायवे स्वाहेत्यादि च
तुर्भिराज्यहोमः गर्दभयागे तत्तु संभारासिंचं विरच्य होममुपमार्के अत्र पशोरसंभवे चरुमिति विज्ञाने
श्वरः श्रोत्रियस्य पशुरश्रोत्रियस्य चरुरिति माधवः अयं चामावास्यायां कार्यः तथा च तैत्तिरीयश्रुतिः
यो ब्रह्मचार्यवकिरेदमावास्यायां रात्र्यामग्निं प्रणीयोपसमाधायेत्यादि एतच्च कामत एव अकामतो रेतः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सेकमितिनिमित्तवाक्येमन्त्रतो: अत्राशक्तस्यतयास्तोमःहिंसवायोगीश्वरोन्नोगर्दभयागएव शक्तस्यतमनू
क्तमाह्निकतपसो:समुच्चय: तच्चरूपमेवाह गौतम: गर्दभेनवकीर्णीनिर्ऋतिंचतुष्पथेयजेत् तस्याजिन
मूर्ध्वबालपरिधायलोहितपात्र:सप्तगृहान्भैक्षंचरेत्कर्माचक्षाण:संवत्सरेणशुद्ध्यतीति इदंवार्षिकंव्रत
मश्रोत्रियविप्रपत्न्यांश्रोत्रियक्षत्रियवैश्यपत्न्यां यत्तुशंखलिखितौ वृषभार्यांवैश्यायामवकीर्णः:संवत्सरंत्रिषव
णमनुतिष्ठेत् क्षत्रियायांद्वेवर्षे ब्राह्मण्यांत्रीणिवर्षाणीति तद्ब्राह्मणीक्षत्रियस्योःश्रोत्रियभार्ययोर्वाकि
रणोत्तेयं यत्तुपैठीनसि: अवकीर्णीगर्दभाजिनंवसित्संवासरंप्राजापत्यंचरेदिति तत्सान्यशूद्रभार्याविष
षयं स्वैरिण्यादिविषयंवाकिरणोव्याहृत: शंखलिखितौ स्वैरिण्यांवृषल्यामवकीर्णः:सचैलंस्नातउदकुंभंद
द्यात् ब्राह्मण्यांवैश्यायांचचतुर्थकालाहारोब्राह्मणान्भोजयेत्यवसभारंचगोभ्योदद्यात् क्षत्रियायांत्रि
रात्रमुपोषितोघृतपात्रंदद्यात् ब्राह्मण्यांषड्रात्रमुपोषितोगांदद्यात् गोष्ववकीर्णः:प्राजापत्यंचरेत् षंढा
यामवकीर्णः:पलालभारंसीसमाषकंचदद्यात् कल्पतरौहारीत: तस्मात्स्त्रीष्ववकीर्णीनिऋत्यापश्वच
तुष्पथेगर्दभंपशुमालभेत नैर्ऋतोपशुपुरोडाशश्च्रयणमवदानै:प्रचर्यप्राक्स्विष्टकृतआज्यस्यजुहोति
कामावकीर्णोस्म्यवकीर्णोस्मिकामकामायस्वाहा कामावपन्नोस्म्यवपन्नोस्मिकामकामायस्वाहा (
कामाभिद्रुग्धोस्म्यभिद्रुग्धोस्मिकामकामायस्वाहा कामाभिद्रुग्धोस्म्यभिद्रुग्धोस्मिकामकामायस्वाहा (

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ॐ
प्रा०म०
६२

92

समासिंचन्तु मरुतः समिन्द्रः संबृहस्पतिः समायमग्निः सिंचतु प्रजया ब्रह्मवर्चसेनेति तां छवीं मूर्धवालां परिधाय मृ
न्मयं पात्रमादाय सप्तागाराणि भैक्षं चरेत् स्वकर्म परिकीर्तयन् त्रयोदशमासे पूतो भवतीति छवी चर्म विशेषमाह
बोधायनः यो ब्रह्मचारी स्त्रियमुपेयात् सोऽवकीर्णी गर्दभं पशुमालभेत नैर्ऋतः पशुः पुरोडाशो रक्षोदैवतो य
मदैवतो वा शिश्नात् प्राशित्रमप्स्ववदानैश्चरन्तीति विज्ञायते अथावकीर्णिप्रायश्चित्तम् अमावास्यायामग्निमुपसमाधाय
सम्यक्परिस्तीर्य दर्वीं हैमिकीं परिच्छेदेन कृत्वाऽऽज्याहुतीर्जुहोति कामावकीर्णोऽस्म्यवकीर्णोऽस्मि काम कामाय
स्वाहा कामाभिद्रुग्धोऽस्म्यभिद्रुग्धोऽस्मि काम कामाय स्वाहा इति हुत्वा कृताञ्जलिरग्निमभिमंत्रयेत् समा
सिंचन्त्विति पश्चिमेतिकर्तव्यता एव अथ ब्रह्मचर्यव्रतमध्ये किं [illegible] मांसं वाश्नीयात् स्त्रियो वोपेयात् सर्वास्वा
त्रिष्वंतरागारेऽग्निमुपसमाधाय संपरिस्तीर्याज्यप्रायश्चित्तमाज्याहुतीर्जुहोति कामेन कृतं कामः करोति कामायैवे
दं सर्वं नान्यो मां कारयति तस्मै स्वाहा मनसा कृतं मनस्तु एवेदं सर्वं नान्यो मां कारयति तस्मै स्वाहा जयाप्रभृति सिद्ध
माधेनुवरप्रदानात् अपरेणाग्निं कृष्णाजिनेन प्राचीनग्रीवेणोत्तरलोम्ना भूमावास्य वसति सुप्त्वा [illegible] जघना
दात्मानमपकृष्य तीर्थं गत्वा स्नात्वाऽऽचम्याभिमन्त्र्य आलिंगाभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिरिति
मार्जयित्वान्तर्जलगतोऽघमर्षणेन षोडश प्राणायामान् धारयित्वा तीर्थवासः पीडयित्वाऽन्यदहतं वासः परिधा
याचम्य प्रसिद्धमादित्योपस्थानं कृत्वा आचार्यस्य [illegible] नेति जयापदेन जयाहोमाः प्रभृतिना अग्निर्भूता
नामधिपतिरित्यादि साध्याहोमाः [illegible] जयाहोमादेः [illegible] अपरेणाग्निं [illegible] दसतीत्यस्या

६२

होत्रसंयोगेन दोषः परिवेदने परनारीसुताः क्षेत्रजदत्तकाद्याः पुत्रदानेन प्रतिगृहीतकुले पितृव्यत्वादिप्रयुक्तकार्यप्रवृत्तिर्जनककुले
च तन्निवृत्तिः सप्रमाणमुक्ता व्यवहारमयूखे तेन दत्तकसोदरस्यापि कनिष्ठस्य दत्तकमुख्योद्वाहे न दोषः शातातपः क्लीवे देशांत
रस्थे च पतिते भिक्षुकेपि वा योगशास्त्राभियुक्ते च न दोषः परिवेदने भिक्षुको यतिः योगशास्त्राभियुक्तो विरक्तः कात्यायनोपि देशांत
रस्थक्लीवैकवृषणान्न सहोदरान् वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः जडमूकांधबधिरकुब्जवामनखोडकान् अतिवृद्धानभा
र्यांश्च कृषिसक्तान्नृपस्य च धनवृद्धिप्रसक्तांश्च कामतोकारिणस्तथा कुहकोन्मत्तचौरांश्च परिविंदन्न दुष्यति खोडकः भग्नचरणः वृ
यः अभार्यो मृतभार्यः कामतोकारिणः स्वेच्छयैव नित्यविवाहमकुर्वाणाः अत्रेयं सर्वात्मना विवाहानधिकारिणः क्लीवाद्यस्तेषु
सत्सु कालविशेषमंतरेण परिवेदनेन दोषः ये तु कालांतरेपि संभावितविवाहाधिकाराश्चिरं वेश्यातिसक्तशूद्रतुल्यकृषिसक्त
राजपरतंत्रधनवृद्धिप्रसक्तकामतोकारिकुहकतस्कराः तेषु तत्स्वभावस्यावधारणे न दोषः देशांतरस्थे विशेषमाह वसिष्ठः
अष्टौ दश द्वादश वर्षाणि ज्येष्ठं भ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्ती भवतीति धर्मार्थमर्थार्थं विद्यार्थं च देशांतरस्थे यदा
दशवर्षप्रतीक्षा कार्यांतरार्थं दश द्वादश वेति तथा च स एव द्वादशैव तु वर्षाणि ज्यायान्धर्मार्थयोगतः न्याय्यः प्रतीक्षितुं भ्राता
श्रूयमाणः पुनः पुनरिति हेमाद्रिः ब्राह्मणस्तु द्वादश वर्षाणि ब्राह्मणस्य विद्यासंबंधेनेति गौतमवाक्ये ब्राह्मणग्रहणात् सप
वद्वादशवर्षाणि प्रतीक्ष्यः क्षत्रियवैश्यशूद्रास्तु दशाष्टौ षडिति तन्न अश्रुतप्रकल्पनायां प्रमाणाभावात् धर्मार्थयोश्च तत्क्रिया
द्वावपि संभवादिति विवाहे तु ज्येष्ठानुज्ञायामपि दोषमाह हारीतः सोदर्याणां तु सर्वेषां परिवेत्ता कथं भवेत् दारैस्तु परिविद्यंते ना
ग्निहोत्रेण नेज्ययेति अथ प्रायश्चित्तं वसिष्ठः परिविविदानः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्वा पुनर्निविशेत् अत्रापरार्के कनिष्ठेनोढां

93

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ज्येष्ठ उद्वहेत् अग्न्याधेयविवाहेन कनिष्ठ निरूपित आर्यात्ता उत्पत्ते ज्येष्ठो ह्यविवाहयोग्यत्वात् कनिष्ठस्त्वस्या मुद्वहेदिति तत्र तां वैवोपय
च्छेदिति विज्ञानेश्वरोक्तवाक्यशेषात् आर्यात्वा उत्पत्तिस्तु कनिष्ठोद्वहेदपि सापिका स्पष्टं च हारीतेन ज्येष्ठस्याहं व्रतमुक्त्वान्योद्वाहए
वोक्तः समाप्ते ह्येतां कन्यां ज्येष्ठायोपपादयेत्तु: सतामनुमान्यान्यया निविश्येतैवं धर्मो न लुप्यत इति तस्मात्परिवेत्ता कृच्छ्रातिकृच्छ्रौ
तरं स्वोढां ज्येष्ठाय परत्वच्चार्या हृतमैतत्व कृत्वा पुनि भव परिहाराय निवेशं तां नानुज्ञातां तामेवोद्वहेत वासिष्ठार्थः यत्तु स्मृत्यन्तरे कनी
यसं प्रत्याह नभूयष्ठे नाम भिगच्छेदिति तत्तु न विवाहात्प्राग्वेदितव्यं तत्रैवं व्यवस्था संनिपाव कामतः कृच्छ्रातिकृच्छ्रौ याज्ञवल्की
यं वक्ष्यमाणमुपपातक सामान्यव्रतं च तद्द्वयं च वर्णशक्त्याद्यपेक्षया योजनीयं कामतः संनिपाते कन्याप्रदानाय अनुज्ञाया संवत्सर
मिति अत्रैव शंखः परिवित्तिः परिवेत्ता च संवत्सरं द्वादशरात्रं भैक्ष्यं च रेयातामिति कामतः पित्राद्यनुज्ञातोद्वाहे तमानवं त्रैमासिकं
यत्तु विष्णुः परिवित्तिः परिवेत्ता यया च परिविद्यते तद्दाता याजकश्चान्द्रायणं कुर्युरिति तत्कृच्छ्रातिकृच्छ्रपरं यत्तु यमः कृच्छ्रौ द्वयोः
परिवेत्रे कन्यायाः कृच्छ्र एव च अतिकृच्छ्रं चरेद्दाता होता चान्द्रायणं चरेदिति तदज्ञाततः स्त्रियविषयं द्वयोः परिवेत्तृपरिवित्तयोः
प्रत्येकं द्वौ कृच्छ्रौ यत्तु स्मृत्यन्तरे परिवित्तिपरिवेत्तृकन्यादातृयाजकानां द्वादशरात्रसक्तुप्राशनं ब्राह्मणतर्पणं च तां पुनर्भूवमा
चरतेन भूयष्ठे नाम भिगच्छेदिति तत् उपरं प्रसंगाद् उच्यते देवलः ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा पासाग्रेदिधिषू
र्ज्ञेया पूर्वा तु दिधिषूः स्मृतेति प्रायश्चित्तमाह वसिष्ठः अग्रेदिधिषूपतिः कृच्छ्रं द्वादशरात्रं चरित्वा निविशेत तां चैवोपयच्छेदि
दिधिषूपतिः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्वा पुनर्निविशेतेति अग्रेदिधिषूपतिः प्राजापत्यं चरित्वा तामेव ज्येष्ठापश्चाद्दन्ये
नोढामुद्वहेत दिधिषूपतिस्तु कृच्छ्रातिकृच्छ्रौ कृत्वा स्वोढां ज्येष्ठां कनीयस्याः पूर्वं विवोढव्यामुद्वहेदिति मिताक्षरायां के

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्यतवौच आव्यांतरमपि स्त्र त्वर्थस्मारे कनिष्ठापतिः द्वादशवार्षं कन्यानां श्रोढामेवृज्ये ष्ठोढा हे जाते उद्वहेत ज्येष्ठापतिस्तत्कृत्क्रातिक्र
क्रौहत्वा सोढां कनिष्ठायतये ब्रह्मचारी भार्तृतमैन्यवक्षिवे यतदनुज्ञातां ज्येष्ठामेवोद्वहेदिति अपरार्केत अग्रेदिधिषूपतिस्स्याने दि
धिषूपतिरिति पठितं दिधिषूपतिस्थाने अग्रेदिधिषूपतिरिति तयोश्च प्रायश्चित्तविकल्पइति यत्तगोतमः परिवित्तिपरिवेत्तृपर्याहि
तपयोषाग्रेदधिषूपतिदिधीषूपतीनां संवत्सरं प्राकृतं ब्रह्मचर्यमिति तत्सरिवेत्तृसंवत्सरसमानुविषयपर्याहितप
र्याधात्रोः स्वरूपमुक्तं मेधातिथिना अनाहिताग्नौ ज्येष्ठे तत्कनीयानादधीत चेत् पर्याधाताग्निष्टः स्याज्ज्येष्ठः पर्याहितः स्मृत
इति इति गुरुतल्पप्रसक्तानुप्रसक्तप्रायश्चित्तानि अथ संसर्गप्रायश्चित्तम् तत्र संसर्गभेदानाह बृहस्पतिः एकशय्या
सनं पंक्तिर्भाण्डपक्वान्नमिश्रणं याजनाध्यापने योनिस्तथा च सहभोजनं नवधासंकरः प्रोक्तो न कर्तव्योऽधमैः सहेति योनिः पा
तकिने कन्यादानं ततः कन्यापरिणयनं चेति विज्ञानेश्वरकल्पतरुकारादयः पातकिस्त्रीगमनमित्यपरार्कः स्मृतिपाली या गा
परिसमागाविदमेवयुक्तं कात्यायनः आलापगात्रसंस्पर्शनिःश्वासात्सहभोजनात् सहशय्यासनायानात् पापं संक्रमते नृणा
मिति वसिष्ठः पतितसंप्रयोगेन ब्राह्मेण वा यौनेन वा याः स्तेभ्यः सकाशान्मात्रा उपलब्धास्तासां परित्यागस्तैश्च न संविशेदिति
मात्राद्रव्यं एतेषां कर्मणां मध्ये केन कर्मणा कियता कालेन पातित्यं तदाह बृहस्पतिः संवत्सरेण पतति पतितेन सदा संचर
न्नेकपानभोजनयाजनासनशयनैः यौनस्त्रौवमुख्यैस्तु सद्य एवेति मुख्यो स्रुव्यमुखो वाध्ययनमध्यापनं च एकपात्रे
भोजनेऽपि सद्यः पातित्यं याजने यौनिसंबंधः स्वाध्यायसहभोजनं कृत्वा सद्यः पतत्येव पतितेन न संशय इति देवलोऽपि यौनस्त्रौ
वमुख्यैरिति सत्यपि द्वंद्वनिर्देशो प्रत्येकमेवैषां पातित्यहेतुत्वं यः पतितैः सह यौनं स्रौवं मौखं वा एणं अन्यतमं संबंधं कुर्यात् तस्याप्येतदे

95

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वप्रायश्चित्तमिति स्मृत्यन्तरे: कल्पतरौ तु यश्चैतै र्यौनस्रुवैर्वा एणं अन्यतमं संबंधं उपयातस्य व्येत देवप्रायश्चित्तमिति पाठ: त
त्रात्यंतायमुक्तानंत: पंचमहायज्ञादियाजनं तथैवांगाद्यध्यापनं तथैव यौनिसंबंधो व्यवहितो विवाहसंबंधश्चेति त्रेधं एतेन संव
त्सरेण पततीति तेन सहाचरन् याजनाध्यापना यौनाद्वैकशय्यैकभोजनादिति हारितीयं षण्मासिके तु संसर्गे याजनाध्यापनादिभि:
एकग्रासनशय्याभि: प्रायश्चित्तार्द्धमाचरेत् इति संवत्सरेण संस्पृष्टो योनिमुक्ते विशेषत: एवौकेन विधानेन पतितव्रतमाचरेदि
ति च वार्हस्पत्यं व्याख्यातं नि कल्पतरु समुच्चितानामेव याजनादीनां समुच्चय: पतनहेतुत्व प्रत्येकहेतुत्वं तु संवत्सरं संसर्गेण इति स्मृत
न्त्ये परं तत्तद्भूयिष्ठविरुद्धं कौर्मे याजनं योनिसंबंधं तथैवाध्यापनं द्विज: ज्ञात्वा संवत्सरात्पतत्यज्ञानेन्नाद्भोजनमेव च अज्ञानाद
पवामोहात्कुर्यादध्यापनं द्विज: संवत्सरेण पतति सहाध्यापनमेव चेति द्वितीयवचनमंगाद्यध्यापनपरं बौधायन: संवत्सरेण
पतति पतितेन सहाचरन् याजनाध्यापनाद्यौनात्सद्योनशयनासनादिति शयनासनात्सद्योन किंतु संवत्सरेणेति संबंध: एतेन
संवत्सरेण पतति पतितेन सहाचरन् याजनाध्यापनाद्यौनान्न तु यानाशनासनादिति मानवमपि व्याख्यातं पैठीनसिस्तु नवैक
शयनासनादित्यंतपाठं पपाठ अत्र ज्ञानकृते एवं संसर्गे पातित्यं नाज्ञानकृते संवत्सरं तु पतितै: संसर्गं कुर्वतेर्य: यानशय्या
सनैर्नित्यं जानन्वै पतितो भवेदिति कौर्मोक्ते: पतितेन सहोषित्वा जानन्संवत्सरं द्विज: मिश्रितस्तेन सोब्दांते स्वयं च पतितो भ
वेदिति देवलोक्तेश्च अत्र संवत्सरमित्यंतसंयोगावाचि द्वितीयाश्रुतेस्तु षष्ट्यधिकशतत्रय दिन व्याप्तिन्येव संसर्गे पातित्यं भवति न त
तन्न्यूनत्वे इति विज्ञानेश्वरादय: अतएव संवत्सरेण पतति पतितेन सहाचरन् भोजनासनशय्यादिकुर्वाण: सार्वकालिकमिति
देवलीये सार्वकालिकपदमपि संगच्छते ब्रह्महत्यास्वेतत्प्रयतं संसर्ग एव च महापातकं न तत्संसर्गिसंसर्गोपि ब्रह्महामद्यपस्तेन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्तेयैवगुरुतल्पगः एते महापातकिनो यश्च तैः सह संवसेदिति याज्ञवल्क्यीयादिषु तैरिति सर्वनाम्ना ब्रह्महादिचतुर्णामेव पराम
र्षात् संवत्सरेण पतति पतितेन सहाचरन्नित्यादिषु पतितपदमपि ब्रह्महादिषु तैरिति सर्वनाम्ना ब्रह्महादिषु तुर्णामेव परा
मर्शात् संवत्सरेण पतति पतितेन सहाचरन्नित्यादिषु पतितपदमपि ब्रह्महादिचतुःपरमेव दोषवत्सु संसर्गिसंसर्गिण्यप्येव
पन्नस्त्रिभिरन्निर्णिक्तेनार्थं किंचित्समाचरेदिति मनूक्तेः अयं च संसर्गस्त्रिविधः उत्तमो मध्यमः कनीयांश्च तत्राद्यस्तद्धि येन
सैव मैत्र्यैकपात्रभोजनभेदात् मध्योप्येकयानासनशय्यैकपंक्तिभोजनभेदाच्च तद्धि अन्त्यस्तु सहायस्पर्शनिष्ठासैकपंक्ति
भोऽपंक्तितदीयान्नभोजनत्वतल्लिङ्गरत्नस्पृष्टान्नभोजनादिभेदादनेकविध इति निबंधकृतः क्वचित्संसर्गदोषमपवदति व
सिष्ठः पतितोत्पन्नः पतितो भवत्यन्यत्र स्त्रियाः सा हि परगामिनी भवति तामरिक्थामुपयच्छेतेति याज्ञवल्क्योपि कन्यां समुद्वहेदे
तां सोपवासामकिंचनीमिति सोपवासां कृतसंसर्गजनुरूपप्रायश्चित्तामिति विज्ञानेश्वरः तत्र अकृतसंसर्गायाः प्रायश्चित्ता
भावेन नित्यवत्कृत्रविरोधात् अतस्तस्या नित्यं सर्वदिने उपवासो नेन विधीयते अकिंचनां अगृहीतपितृधनादिकां हृद
हारीतः पतितस्य कुमारीं विवस्त्रामहोरात्रोपोषितां प्रातः शुक्लेनाहतेन वाससाच्छादितां नाहमेतेषां न ममैते इति त्रिरुच्चैरभिद
धानां तीर्थे स्वगृहे वोद्वहेदिति उद्वहेदित्यनेन स्वयमेवेत्युक्ते पतितसंसर्गो मुद्वहे तत्पुनः पतितास्त्विति गृह्णीयादिति लभ्यते पात
कान्यत्रयोः स्त्रीपुमपत्ययोः प्रायश्चित्तमाह बौधायनः अत्र शुद्धिशक्तौ सद्यजातानां तेषां शुद्धिमिच्छतां प्राप्तपतनीयानां तृतीयां
शः स्त्रीणामंशस्तृतीयमिति प्राप्तस्य प्रायश्चित्तस्य पतनीयानां नरकेपतंतीति पतनीयाः कृच्छ्रैककमलप्रोवकृच्छ्रमिति स्मृतेः कर्म
प्रवचनीयवत् तेन पतितोत्पन्नस्य पुत्रस्य तृतीयोंशः कन्यायास्तु तत्तृतीयांशो मौलिकनवमांश इत्यायात् यत्तु पराशरः समे देशे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कृतयुगे त्रेतायां ग्राममुत्सृजेत् द्वापरे कुलमेकं तु कर्तारं तु कलौ युगे कृते संभाषणादेव त्रेतायां स्पर्शनेन च द्वापरे त्वन्नमाद
य कलौ पतति कर्मणेति तत्राद्यपक्षे कर्त्तारमिति तुशब्दैनैवकारार्थेन इदं प्रत्यहा युगभेदेन व्यवस्थयोक्तं देशग्रामकुलसंस
र्गत्रयमेव वार्यते न त्वप्रकृतो याजनादिसंसर्गो वार्यत इति द्वितीयपक्षे पि कृते संभाषणादेवेत्येवकारेण त्रेतायां चकारद्वयेन च तत्तद्यु
गे कृते संभाषणमात्रात्स्पर्शनेन त्रेतायां स्पर्शमात्राद्द्वापरे तु तत्स्वामिकान्नप्रतिग्रहमात्रात्कलौ तत्कृतेन निषिद्धकर्मणा याजना
दिभिरित्यर्थः अन्यथा एवं वा केवकारैस्तु कलौ युगे ऽपि त्रितयेन साक्षाद्द्रव्यादेः संसर्गो निषिद्धः द्वितीयवाक्ये तु कुलं पतति कर्मणेत्य
नेन साक्षात्कर्त्तुरेव दोषेण संसर्गकर्त्तुरिति परस्परविरोधः स्यात् एवं च साधवस्य कर्त्तुः संसर्गदोषाभावोक्तेरन्नेव तात्पर्यं तथा
च कलिनिषिद्धेषु संसर्गदोषइत्युक्तिः योदेशादिमात्रसंसर्गः कृतयुगादौ दोषजनकत्वेनोक्तः पाराशरस्यैव श्लोके पश्चात्तस्य श्लो
के कृतयुगादौ संभाषणमात्रादेवोक्तं तद्दिशया अथ प्रायश्चित्तं याज्ञवल्क्यः योयेन पतितेनैषां संसर्गं याति मानवः सतस्यैव
व्रतं कुर्यात्तत्संसर्गविशुद्धय इति पतितस्य परं प्रायश्चित्तं तत्संसर्गी येन संसर्गं कुर्यात्तद्व्रतमाचरेदिति जाबालोक्तेः मतिरपि
संसर्गेन मरणान्तिदेशः किंतद्द्वादशाहस्यैवान्नपदात् अन्यच्च सत्यप्यतिदेशे पूर्णमेव द्वादशाहं भवति द्वादशभिर्वर्षैर्महापातकि
नः एवं तत्रेतिहारीतोक्तेः नन्वेवं संसर्गिभिन्नमहापातकिपरं ब्रह्महा स्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः व्रतेनैतेन शुध्यन्तीति महापा
तकिनस्त्विमइति शंखवाक्ये नाम संहारादिति वाच्यं महापातकसंज्ञाया आनर्थक्यापत्तेः शंखवाक्यं तु संसर्गिणाप्युपलक्ष
णार्थं कामकृते ब्रह्मवधे तत्संसर्गेपि च कामकृते मरणान्तिकं त्वचतुर्विंशत्यहं अकामतस्तद्द्वादशाहमिति केचित् विज्ञा
नेश्वरास्तु यस्तु चतुर्विंशत्यहस्य मरणान्तिकत्वे मानाभावात् कामकृते वधे संसर्गे च द्वादशाहमेव अकामकृतेन षडहमित्याहुः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अकामतः सद्यः पतनहेतुसंसर्गे तु वसिष्ठः पतितसंप्रयोगे तु ब्राह्मेण वा यौनेन वा यास्तेभ्यः सकाशान्मात्रा उपलब्धा
स्तासां परित्यागस्तैश्च न संवसेदुदीचीं दिशं गत्वानश्नन् संहितामधीयानः शुद्धो भवति पराशरः संसर्गमाचरन्विप्रः पतिता
दिष्वकामतः पंचाहं वा दशाहं वा द्वादशाहमथापि वा मासार्द्धं मासमेकं वा मासत्रयमथापि वा अब्दार्द्धमब्दमेकं वा भवेदूर्ध्व
न्तत्समः त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरेत् चरेत्सांतपनं कृच्छ्रं तृतीये पक्ष एव च चतुर्थे दशरात्रं तु पराकः पंचमे
मतः षष्ठे चान्द्रायणं कुर्यात्सप्तमे त्वैन्दवद्वयं अष्टमे वा यथा पक्षे षण्मासान्कृच्छ्रमाचरेत् इति ऊर्ध्वमित्यनेन वर्षद्वयपापी
संसर्गो गृह्यते अज्ञानतः कृतस्य तादृशस्यैव पातित्यापादकत्वात् कामकृते तु मिताक्षरायां संवत्सरे पंचाहं तु चरेत्कृच्छ्रं
दशाहं तप्तकृच्छ्रकं पराकस्त्वर्द्धमासे स्यान्मासे चान्द्रायणं चरेत् मासत्रये तु कुर्वीत कृच्छ्रं चान्द्रायणोत्तरं षाण्मासिके तु संसर्गे
कृच्छ्रं त्वब्दार्द्धमाचरेत् संसर्गे त्वाब्दिके कुर्याद्द्व्यं चान्द्रायणं नर इति आब्दिक इति किंचिन्न्यूनेऽब्दे पूर्णे तु द्वादशाब्दविधानात्
उशना कृतलक्षणैर्दर्शनस्पर्शनसंभाषणादि वर्जयेत् दर्शने ज्योतिषां दर्शनं स्पर्शने हस्त्यालंभनं संभाषणे ब्राह्मणसं
भाषणं पुनरपस्पर्शनं चेति कृतलक्षणैः अपराद्भिर्लौकिकैः पतितैरिति यावत् स्पर्शनं च परंपरया विवक्षितं साक्षात्पतित
स्पर्शने स्नानविधानात् यथा मनुः दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुद्ध्यति संभा
षणेऽपि च तत्रायाह तेनैव सह संभाषणे पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेदिति तत्तु प्रायश्चित्तं श्रवणात् बृहस्पतिः पति
तानां गृहं गत्वा भुक्त्वा च प्रतिगृह्य च मासोपवासं कुर्वीत चान्द्रायणमथापि वा अत्र चान्द्रायणं महत्तानाभ्यासे मासोपवा
सस्तु तानाभ्यासे भोजनं तत्र त्र स्येति केचित् एकपंक्त्यादिरूपपरे भोजने वर्षस्य पातित्यापादकत्वात् गमन प्रतिग्रहयो

शान्ते बौद्धान्पाशुपताञ्जैनलोकायतिकनास्तिकान् विकर्मस्थान्द्विजान्स्पृष्ट्वा सचैलो जलमाविशेत् मनुः दिवाकीर्त्तिमुदक्यां च
पतितं सूतिकां तथा शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानं समाचरेत् दिवाकीर्त्तिश्चण्डालः एतदकामतः तथा च बृहस्पतिः दिवाकीर्त्तिं चि
तिं यूपं पतितं च रजस्वलां स्पृष्ट्वा प्रमादतो विप्रः स्नानं कृत्वा विशुद्ध्यति कामतोपि स एव पतितसूतिकामृतं शवस्पृष्टं च कामतः
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुद्ध्यति स्नानविशेषमाह शातातपः चण्डालपतितव्यंगमुन्मत्तं शवमन्त्यजं सूतिकां सूतिका
नारीं रजसा च परिप्लुतां श्वकुक्कुटवराहांश्च ग्राम्यान्संस्पृश्य मानवः सचैलं सशिरः स्नात्वा तदानीमेव शुद्ध्यति छागलेयोपि चाण्डा
लं पतितं स्पृष्ट्वा सचैलो जलमाविशेत् सर्वं तत्स्पृष्टिनं चैव चैत्यं यूपं रजस्वलां अनभ्यासस्पर्शे स्नानं तत्र शिरोदेशस्पर्शे अन्यत्र त्वाचम
नं तदाह शातातपः रजकश्चर्मकारश्च व्याधजालोपजीविनौ निर्णेजकः सौचिकश्च वकः शैलूषकस्तथा मुखेभगस्तथा श्वा च वनिता
सर्ववर्णगा चक्री ध्वजी वध्यघाती ग्राम्यसूकरकुक्कुटौ एभिर्यदंगं संस्पृष्टं शिरोवर्जं द्विजातिषु तोयेन क्षालनं कृत्वा आचान्तः शु
चितामियात् कामतः शिरःस्पर्शे तु वायुपुराणे उदक्यां सूतिकां चैव श्वानमन्त्यावसायिनं नग्नादीन्मृतहारांश्च स्पृष्ट्वा स्नानं विधी
यते स्नात्वा सचैलं मृद्भिश्च शुद्धो द्वादशभिर्नरः नग्ना बौद्धादयः तथा च विष्णुपुराणे सर्वेषामेव वर्णानां त्रयी संवरणं नृप
तां समुज्झति यो मोहात्स नग्नः पापकृन्नरः इति गार्ग्यः कुर्यात्स्वल्पेरोहेषु स्पर्शे व्यवहिते द्विजः अचैलं वा सचैलं वा स्नानं कृ
त्वा विशुद्ध्यति मतिपूर्वं सचैलं अन्यदचैलं तथा षडूं स्पृष्ट्वा निघारं च शुद्धो दाचमनाद्द्विजः तद्दीनस्पर्शनादपत्नीत्वा स्नाण
यामेन्नापो वृत्नात् अत्राचमनं स्नानासामर्थ्ये सकृत्स्पर्शे च अत एवापरार्के स्मृत्यन्तरे षडंककुक्कुटकाकश्वपृष्ठं स्नाव
सायिनः स्पृष्ट्वा तानाचमेत्कर्म स्पृष्टे तान्स्नानमाचरेत् कर्म इति कर्मकाले इत्यर्थः वृद्धयाज्ञवल्क्यः चण्डालपुक्कसम्लेच्छमलका

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

102

प्रा॰ म॰

पालिपारदान् उपपातकिनां चैव स्पृष्ट्वा स्नानं समाचरेत् संवर्त्तः कैवर्त्तमृगयुव्याधशौनशाकुनिकानपि रजकं च तथा स्पृष्ट्वा
स्नात्वैवाशनमाचरेत् यथापस्तम्बः चर्मकारं च रजकं धीवरं नटमेव च एतान् स्पृष्ट्वा द्विजो मोहादाचामेत् प्रयतोपि सन् यतेः स्पृष्ट
स्त्र उच्छिष्ट एकरात्रं पयः पिबेत् नैतच्छिष्टः स्त्रिरात्रं स्यात् हुतप्राशश्च विशुध्यतीति तत्राचमनमशक्तस्य अकामतो वा प्राणायाम
नि: कापालिकानां संस्पर्शे स्नानं कृत्वा विशुध्यति प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति शातातपः यस्तु छायां श्वपा
कस्य ब्राह्मणो ह्यधिगच्छति तत्र स्नानं तु तत्रैव घृतप्राशो विधीयते एतच्चिरकालाधिष्ठानपरमिति भवदेवः सर्वाङ्गीणेतरं चण्डा
लस्पर्शे प्रचेताः स्वकायेन चण्डालकायाभिस्पर्शनो द्विरात्रं शुद्धिरिति यथापस्तम्बः सर्वेषामन्त्यजादीनां स्पर्शे नाचमनं विदुरि
ति तदानुवस्य मदिरास्पर्शे तु मनुः जात्वयः स्नानमात्रं स्यादनाभेरेकरात्रकं नाभेरूर्द्ध्वं त्रिरात्रं स्यात् मदिरास्पर्शने विधिः यत्तु
भवदेवीयम् स्पृश्यन्नरे मद्येन स्पृशते यस्तु ब्राह्मणः शंसितव्रतः उपोष्य रजनीमेकां पञ्चगव्येन शुध्यतीति तद्धुतस्य स्पृष्टजात्वयः
स्पर्शे मार्कण्डेयपुराणे अभोज्यसूतिकाषण्डमार्जाराखुश्वकुक्कुटान् पतितापविद्धचाण्डालमृतहारांश्च धर्मवित् संस्पृश्य शुध्य
ति स्नानादुदक्याग्रामसूकरौ अभोज्याः रजकाद्यः अपविद्धो बहिष्कृतः मृतहारो मल्येन शवहारकः अंगिराः भास्वायस
मार्जारखरोष्ट्रं च श्वशूकरान् अमेध्यानि च संस्पृश्य सचेलो जलमाविशेत् इति अत्र मार्जारो वनमार्जारः गृहमार्जारस्य शुचित्वा
त् यथाह मनुः स्त्रीबालमशकमक्षिकामार्जारमूषिकाच्छाया शयनाशयनोद्भवमुच्छिष्टोनित्यं मेध्याः वृद्धस्मृतिरपि स्त्रियो वृद्धाश्च
बालाश्च न दुष्यन्ति कथंचन मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः मशकमक्षिकासाहचर्यात् मार्जारेण गृहस्य एव तिशूलपा
णिः मिताक्षरायां तु मार्जारस्पर्शे स्नानमुच्छिष्टस्य समये प्रत्युष्टानस्य मये चेति आपस्तम्बः एकशाखां समारूढश्चाण्डालो वा रजन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वला ब्राह्मणस्तु निवसनस्य वासानं समाविशेत् स्नातो ग्रहणमेकाद्यमुपवसत्वणमिति तेनैकपात्राणां देरपि ग्रहणं एतदका
मतः कामतस्तु द्विगुणं अभ्यासे तु स एव एकहृतसमाहृत् चंडालो यदि नस्पृष्टा अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति एत
च स्नानानंतरं कार्यं यमः चांडालैः श्वपचैः स्पृष्टे निशि स्नानं विधीयते न वसेत्तत्र रात्रौ यो सद्यः स्नानेन शुध्यति अयं तत्र च से
द्राजावज्ञानादि विचक्षणः तदानस्य तु तत्या पंचगव्यपरिवर्तते पराशरः अंत्यजातेयदा स्पृष्टा चांडालपतितैः स्त्रियः सूतिका
स्पृशत स्वैवकच्छ्रं हि विधीयते जातवेदः सुवर्णं तु सोमं मार्गमेव च ब्राह्मणानुगतं चैव स्नानं कृत्वा विशुद्ध्यतीति रात्रौ
स्नाने विशेषमाह देवलः देवाहुतैर्जलैः स्नानं निशि कुर्याद्विमिश्रितः प्रतिमासवर्णं च संनिधाय च पावकं शातातपः आर्तिस्य
स्नपितेरात्रौ च स्पृशं स्पृशति यदि भगवन्ते न शुद्धिः स्नानं कृत्वा विनिश्चिते अनुत्पत्तिमितस्यादित्ये संगृहीते तु यज्जले तेन सर्वा
त्मना शुद्धिः शवस्पृष्टं तु वर्जयेत् पराशरः स्नानमाचरणं प्रोक्तं दिवोद्धृतजलेन तु शिशोर्विशेषमाह वृद्धशातातपः शि
शोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतं रजस्वलादिसंस्पर्शे स्नातव्यं तु कुमारकैः स एव प्राक् चूडाकरणाद्बालः प्रागन्न
प्राशनाच्छिशुः कुमारस्तु स विज्ञेयो यावन्मौंजीनिबंधनं चंडालशवसंस्पर्शे यद्यज्ञानाद्भवेत् चंडालशवसंस्पर्शे कृच्छ्रं कुर्यात्
यानमारोप्यासने तु त्रिरात्रं जीवचंडालेन सह पानादिषु त्रिरात्रमित्यर्थः तथा व्रणं वमथनाभ्यंजनकृमिरोगादिषु कृच्छ्रं द्वादश
रात्रं चरेत् व्रणवमथनादीनां चंडालप्रतिकरणे चंडालेन चात्मनि तत्करणे आपस्तंबः येन केनचिदंभस्तत्स्पृष्टं चंडालपति
तस्पृशेत् उपवासेन चैकेन पंचगव्येन शुध्यति आपस्तंबः एतज्ज्ञाभ्यासे अनभ्यासे तु पराके प्रचेताः चंडालो यदि कायस्य
रक्तमुत्पादयेत्किंचित् त्रिरात्रेण विशुद्धिः स्यादेकमासेन चोत्तरे उत्तरे तु त्रियात्रौ त्रिरात्रादेकैकस्य मासः क्रतुः चंडालस्पृष्टि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राम०

104

ष्टादानेचंडालक्षत्रदर्शनेगीतवादित्रश्रवणेभैषज्यक्रियायांचदिवाभोजनेनशुद्धिः अशुचिं दृष्ट्वा दित्यमीक्षेत प्राणायामं कृत्वा
पंचदशमात्रकं सुमंतुः चंडालदर्शनेसूर्यदर्शनंआचमनेब्राह्मणोभिहारः स्पर्शनेसचेलस्नानमिति ब्रह्मगायत्री क्वचिद
शुचिदर्शनेपिगायत्रीजपस्तथाचवृशंखलिखितौ अशुचिदर्शनेगायत्रीमेवजपेदिति गौतमः नम्लेच्छाशुच्यधार्मिकैः स
हसंभाषेत संभाष्यपुण्यकृतोमनसाध्यायेद्ब्राह्मणेनवा सहसंभाषेत तत्स्याद्वयनस्याभवयेएयगवलांनिनत्स्वभार्याः ए
घ्यकृप्रत्येकं हृद्दपराशरः दाराद्वयनलोभानांतु विप्रसमाचरेत प्रत्येकंप्राकृतंतज्ज्यांकृच्छ्रंचयंतद्वार्षिकमिति मनुः आचम्य
प्रयतोनित्यंजपेदशुचिदर्शने सौरान्मंत्रान्यथोत्साहं पावमानीश्चशक्तितः देवलः चंडालयमैर्योगेप्राजापत्यंसमाचरेत
चरेत्त्रिरात्रंचंडालस्पृष्टकूपतीर्थंनिषेवणात धर्मसंयोगउपदेशः पराशरः चंडालैःसहसंपर्कात्रिरात्रमुपवसेत चांडालेकाप
र्यंगत्वा गायत्रीस्मरणाच्छुचिः एतच्चाल्पकालसांध्ये अन्यत्रप्रायश्चित्ताधिक्यस्यवक्ष्यमाणत्वात अपरार्केवसिष्ठः चंडालेनतस
स्पृष्टंकांस्यभांडंसमस्पृश्यं अज्ञानात्कांस्यभोजीतमन्यद्भोजलपानकृत कांस्येभुक्त्वाचरेत्कृच्छ्रं जलपानेतु कृच्छ्रकं हेकृच्छ्रकं
पादकृच्छ्रः अथचांडालसंकरे पराशरः अविज्ञातस्तुचंडालोयत्रवेश्मनितिष्ठति सपक्वम्यद्भासर्पिषयोभ्यांचुत्तमंगो
मूत्रयावकं भुंजीतसहस्रंत्येष्टत्रिसंध्यमवगाहनं त्र्यहंभुंजीतदध्नाचत्र्यहंभुंजीतसर्पिषा त्र्यहंक्षीरेणभुंजीतएकैकेनदिन
त्रये भावदुष्टंनभुंजीतनोच्छिष्टंकृमिदूषितं त्रिपलंक्षीरदध्नोश्चपलमेकंतुसर्पिषः आकरेषुभवेच्छुद्धिरारकूटेस्यकांस्य
के जलशौचेनब्राह्मणंपरित्यागस्तुमृन्मये ॐकुंभगुडकार्पाससंलवणंतैलसर्पिषी द्वारेकृत्वाचधान्यानिदद्याद्वेश्मनिया
वकं एवंशुद्धस्ततःपश्चात्कुर्याद्ब्राह्मणतर्पणं त्रिंशांतगाश्चवृषंचैकंदद्याद्विप्रेषुदक्षिणां पुनर्लेपनखातेनहोमजप्येनशुद्ध्य

७०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ति प्रायश्चित्तेन चाविप्राणां भूमिर्दोषो न विद्यते स्वल्पकालसंपर्के एतत् यत्तु संवर्तः अन्त्यजः पतितो वापि निर्गच्छेद्यत्र तिष्ठति
सम्यक् ज्ञातात्तु कालेन ततः कुर्याद्विशोधनं चान्द्रायणं पराकं वा द्विजातीनां विशोधनं प्राजापत्यं तु शूद्राणां शेषाणामिदमुच्य
ते यैस्तत्र भुक्तं पक्वान्नं तेषामुक्तो विधिक्रमः शेषाणां प्राजापत्यमस्पृश्यैः तेषामपि तदर्धं तु कृच्छ्रपादो विधीयते कूपैकपा
नदुष्टा ये तथा संसर्गदूषिताः सर्वाने तोयवासेन पंचगव्येन शोधयेत् बालवृद्धास्तथा रोगी गर्भिणी वृद्ध एव च तेषां नक्तं प्रदा
तव्यं बालानां प्रहरद्वयं वृद्धकालाभ्यासं एतत् अत्र विशोधनप्रकारं प्रायश्चित्तान्तरं चाह च्यवनः चण्डालसंकरे भवनूरहं तस
र्वेमृद्भाण्डभेदनं दारवाणां तक्षणं शंखशुक्तिस्वर्णरजतचेलानामद्भिः प्रक्षालनं कांस्यताम्राणामाकरे शुद्धिः सौवीरदधितं
क्राणां परित्यागः शेषरसं दृष्ट्वा वस्त्राणां गोमूत्रयावकाहारो मासं भक्षयेत् बालवृद्धस्त्रीणामर्धं प्रायश्चित्तं आपोऽशनाल्लाः सप्त
रूपे वृद्धाः चीर्णप्रायश्चित्ते ब्राह्मणभोजनं गोदानं दद्यात् द्भावं सर्वमिति एतदपि चिरकालसंकरे पाराशरः चण्डालैः सह सं
पर्के मासं मासार्धमेव वा गोमूत्रयावकाहारो मासार्धेन विशुद्ध्यति इति लिङ्गतो इति शेषः मासार्धेन मासस्यार्धं च मासमर्धं मास
संपर्के मासेन तदर्धं संपर्के तदर्धेन चण्डालशब्दे नेतस्समाः पुल्कसादयोऽप्युपलक्ष्यन्ते अत एव संवर्तः चाण्डालैः संकरे विप्रः श्व
पाकैः पुल्कसैरपि गोमूत्रयावकाहारो मासार्धेन विशुद्ध्यति मासादर्वाक् किंचित्कालसंकरे तु हारीतः चाण्डालैः सह सं
योगे प्राजापत्येन शुद्ध्यति विप्रान्द्यावरात्रं तु आत्ते रज्जुत्याग्यपासनाते प्राकंठस्यप्रमाणं तु कुर्याद्धोमं यज्ञकर्दम तत्रापि
त्वा च अहोरात्रं वाऽभुक्तः समाहितः बालवृद्धकृततः कुर्याद्धोमे एवं सति सर्वथा सकेशवपनं कुर्यात् परं मासशुद्धिमनक्ति इति वा
लवृद्धस्त्रीणामर्धं यत्तु हारीतः चण्डालश्वपचानां च संकरे समुपस्थिते अहोरात्रं द्विरात्रं वा त्रिरात्रं षड्हस्त्यते अविज्ञातकं च

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

डालः सप्ताहं निवसेद्यदि तस्य ज्ञातोपपन्नस्य विप्राः कुर्युरनुग्रहं दद्यात्तीरहुतैर्युक्तं हव्यं गोमूत्रयावकं प्राशयेत्तत्र यत्नेन तत्र मा
समेकं निरंतरमिति तदूर्ध्वं राज्ञा यातिसंकरे पराशरः रजकी चर्मकारी च लुब्धकी वेणुजीविनी चातुर्वर्ण्यस्य गेहेषु अज्ञाना चाधि
तिष्ठति ज्ञात्वा तु निष्कृतिं कुर्यात् पूर्वोक्तस्यार्द्धमेव तु गृहदाहं न कुर्वीत शेषं सर्वं च कारयेदिति अत्र याह श्वचाण्डालसंसर्गे यत्कृ
कादिता दृशा संसर्गे तदर्द्धं रजकादिषु लिंगमविवक्षितं बृहस्पतिः अकामतस्त्वापदि वा यदा जायेत संकरः तदा कार्यं स्निलेर्हे
मः गायत्र्याजपेन तथा स्नात्वाघमर्षणं कुर्यात् प्राणायामांश्च सकरी गायत्रीं च जपेदिति होमं च शक्तितः अकामतः कृ
ते स्वल्पे शुद्धिरेषा प्रचोदितेति अथोच्छिष्टादिस्पर्शे आपस्तम्बः येन केनचिदुच्छिष्टः संस्पृष्टः परैः सह गच्छेत्स्पृष्टः समाः स्नात्वा प्राय
श्चित्तेन शुध्यतेऽति शातातपः चण्डालैः श्वपचैः स्पृष्टो विण्मूत्रे च कृते द्विजः त्रिरात्रं तत्र कुर्वीत भुक्तोच्छिष्टः षडाचरेत् अत्र षडुपवा
सः प्राजापत्यतुल्यता अत्र तूच्छिष्टस्य तस्य स्पर्शे स्नानं न तत्स्पृष्टोच्छिष्टस्य कामतस्तत्स्पर्शे षडुपवास तत्स्यात् प्राजापत्यं तथा हारीतः अ
नुच्छिष्टस्य संस्पर्शे स्नानं येन विधीयते उच्छिष्टस्तेन संस्पृष्टः प्राजापत्यं समाचरेदिति तथा सम्वर्तः चण्डालं पतितं चापि तथा नारीं र
जस्वलां उच्छिष्टस्तु द्विजः स्पृष्ट्वा प्राजापत्येन शुध्यतीति एतत्कामतः यत्तु आपस्तम्बः भुक्तोच्छिष्टस्त्वजैः स्पृष्टः प्राजापत्यं समाचरेत्
अर्द्धोच्छिष्टस्ततः पादः पादमाचमने तथेति अत्रार्द्धोच्छिष्टत्वं ग्रासग्रहणमात्रं कृते न तु निःशेषे अकामतः स एव भुक्तो
च्छिष्टस्त्वनाचान्तः चाण्डालैः श्वपचेन वा प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्याद्विशोधनं गायत्र्यष्टसहस्रं तु द्रुपदां वा शतं तथा त्रि
रात्रोपोषितो भूत्वा पंचगव्येन शुध्यतीति यत्तु स एव चण्डालेन तु संस्पृष्टो विण्मूत्रं च कृते द्विजः तेन उपोष्य रजनीमेकां पंच
गव्येन शुध्यतीति तदापद्यकामतः काश्यपः श्वसृकरो श्वचाण्डालमद्यभाण्डरजस्वलाः यस्तूच्छिष्टः स्पृशेत्तत्र कृच्छ्रं सांतपनं

106

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चरेत् एतत्कामतोऽभ्यासे अयं स्वदा अन्यत्राल्पप्रायश्चित्तस्योक्तत्वात् तथा च वृद्धहारीतः उच्छिष्टः संस्पृशेद्विप्रो मद्यं मूत्रं
शुनोऽशुचीन् अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति एतदुच्छिष्टादेः श्वादिस्पर्शे संवर्तः कृतमूत्रपुरीषो वा भुक्तोच्छिष्टोऽपवा
द्विजः श्वादिस्पर्शे जपेद्देव्याः सहस्रं स्नानपूर्वकमिति तदाकामतः यत्त्वपरार्के आपस्तंबः उदक्यास्पृष्ट उच्छिष्टो विड्वराहैश्च कुक्कु
टैः काकमार्जारकश्वाग्निस्पर्शवान् स्नानेन शुध्यतीति तदाप्यकामतः यत्तु व्याघ्रः चंडालोदक्यसंस्पृष्टः स्नानं कृत्वा विशुध्यति उच्छि
ष्टस्तेन संस्पृष्टस्त्रिरात्रेण विशुध्यतीति तदप्यकामत एव यत्तु दत्तः यानमैथुनसंसर्गे तथा मूत्रपुरीषयोः संस्पर्शे यदि गच्छेत्तु श
वोदक्यांत्यजैः सह दिनमेकं चरेन्मूत्रपुरीषे तद्दिनद्वयं दिनत्रयं मैथुने स्यात्पाने तु स्याच्चतुष्टयमिति तत्कामतः संवर्तः चर्मारं र
जकं वेणं धीवरं नटमेव च एतैः स्पृष्टस्तथोच्छिष्ट एकरात्रं पयः पिबेत् नेत्रोच्छिष्टः त्रिरात्रं स्यात्कृतं प्राश्य विशुध्यति अथोच्छिष्टविषयं वे
दं ऊर्ध्वोच्छिष्टत्रिरात्रं तथा च वृद्धहारीतः उच्छिष्टः संस्पृशेद्यस्तु नटरजकमोचकान् अधोच्छिष्टो यदा तस्य स्यादेकरात्रमभोजनं ऊर्ध्वो
च्छिष्टो यदा तस्य प्रायश्चित्तं भवेदिदं उपवासस्त्रिरात्रं स्यात्कृतं प्राश्य विशुध्यतीति अतश्च ऊर्ध्वोच्छिष्टस्य तेनोच्छिष्टैः स्पर्शे षड्रात्रमे
वमेव यत्रोर्ध्वोच्छिष्टस्य चाण्डालादिस्पर्शे षड्रात्रं तत्राधोच्छिष्टस्य तदर्धं त्रिरात्रं अत एव शातातपः उच्छिष्टस्तु स्पृशेद्विप्रश्चंडाल
तकं यं च न ऊर्ध्वोच्छिष्टस्तु संस्पर्शे हि नः सान्तपनं चरेत् अधोच्छिष्टस्त्रिरात्रेण ते पंचगव्येन शुध्यतीति सांतपनमिह सप्ताहसा
ध्यं यत्तु चंडालादीनुपक्रम्य वृद्धशातातपः अशुद्धान्स्वयमप्येतानशुद्धश्च यदा स्पृशेत् विशुद्धस्तूपवासेन त्रिरात्रेणा त
तः शुचिः तथा एतानेव प्रकृत्याह देवलः अशुद्धान्स्वयमप्येतानशुद्धो यदि संस्पृशेत् विशुध्यत्युपवासेन पुनः कृच्छ्रेण
वा पुनरिति अशुद्धानिति स्वकर्मकीर्तनेन मद्यादिकरणेन वा स्वयमशुद्धस्तस्योच्छिष्टादिना एकरात्रमाघ्रातानतः त्रि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राय॰

रात्रं ज्ञानतः उच्छिष्टस्त्वभ्यासे त्रिरात्रं चरेत् उच्छिष्टः श्वपाकादिविषयः स्यादित्युक्तमेवं स्मृति यत्तु शातातपः श्वानं सृजेद्धस्तकाष्ठेन
वा संस्पृष्टः एव वा प्रक्षाल्यांगं तदाचमेत् उच्छिष्टस्तु निशादिवेति तदप्युक्त एव विषये उच्छिष्टस्य शूद्रस्य स्पर्शे लघुहारीतः
श्वविष्ठां काकविष्ठां वा कंकगृध्रनरस्य च अथोच्छिष्टस्तु संस्पृष्टः सचेलो जलमाविशेत् ऊर्ध्वोच्छिष्टस्तु संस्पृश्य प्रायश्चित्त
मिदं चरेत् उपोष्य रजनीमेकां पंचगव्येन शुद्ध्यतीति उच्छिष्टस्य चांडालादिस्पर्शे विशेषमाह हारीतः उच्छिष्टस्तु स्पृशेदि
श्वचांडालान्त्र्यं कथंचन ऊर्ध्वोच्छिष्टस्तु संस्पृष्टो द्विजश्चांद्रायणं चरेत् अधोच्छिष्टो यदा स्पृष्टः प्रायश्चित्तं भवेदिदं त्रिरात्रमु
पवासः स्यात्पंचगव्येन शुद्ध्यतीति पराशरः उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा पुनः उपोष्य रजनीमेकां पंचगव्येन शु
ध्यति उच्छिष्टस्य सामोच्छिष्टसंस्पृष्ट इति विग्रहः सवर्णविषयमेतत् अत्रिः उच्छिष्टोच्छिष्टसंस्पृष्टो ब्राह्मणो ब्राह्मणेन तु
शतं पंजपेत्सूक्तमाप्राशीयन्नमेवेति बृहत्पुराणे उच्छिष्टेन तु विप्रेण द्विजः स्पृष्टस्तु तादृशः उभौ स्नात्वा प्रकुरुतः सयवे
वसमाहिताविति उच्छिष्टविप्रस्पृष्टस्याह पराशरः उच्छिष्टेन स्पृष्टेन स्पर्शे स्नानं विधीयते तेनोच्छिष्टेन संस्पृष्टः प्राजाप
त्यं समाचरेदिति यत्तु ब्राह्मे उच्छिष्टेनाथ शूद्रेण विप्रः स्पृष्टस्तु तादृशः उपवासेन शुद्धः स्याच्छुना संस्पृष्ट एव चेति तदापद
ग्रस्तस्य देवलोपि उच्छिष्टे मानवं स्पृष्ट्वा भोज्यं वापि समाहितः तथैव हस्तौ पादौ च प्रक्षाल्याचम्य शुद्ध्यतीति उच्छिष्टस्यो
च्छिष्टस्पर्शे मनुः उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन अनिधायैव तद्द्रव्यमाचांतः शुचितामियात् एतच्च पेयविष
यं भोज्यविषये तु वसिष्ठः प्रचरन्नन्नपानेषु उच्छिष्टमुपसंस्पृशेत् भूमौ निधाय तद्द्रव्यमाचांतः प्रचरेत्ततः तद्द्रव्यस्य
तु भुक्तः एकार्थमित्याह तु शंखलिखितौ द्रव्यहस्त उच्छिष्टोऽनिधायाचामेत् द्रव्यमिति उदिश्योच्छिष्टस्पृष्टः एतच्चान

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

च्छिष्टस्पर्शे नास्पर्शे स्नात्वा उच्छिष्टचाण्डालादिस्पर्शे त्वभोज्यमेव यथाह वसिष्ठः उच्छिष्टमगुरोरभोज्यं स्वमुच्छिष्टमुच्छिष्टोपहतं चे-
ति उच्छिष्टस्यापि तैलाभ्यक्तस्य चाण्डालादिकरणे प्रायश्चित्तं वः तैलाभ्यक्तस्य नीचान्तः प्रमत्तस्य कर्मणि मैथुने मूत्रोच्चारे यदा रूपा
दृष्टो रात्रेण शुद्ध्यति उच्छिष्टस्य सूर्यादिदर्शने दोष उक्तो मार्कण्डेयपुराणे सूर्येन्दुतारका दृष्टा येक्षद्भिष्टेः कदाचन नैवाशयाम्येनरैर-
न्यस्तो वह्निः सत्यमिष्यते अत्र च स्नानकव्रतलोपे च प्रायश्चित्तमभोजनमिति मन्त्रतोऽपि कर्म तस्यैव चाण्डालादिस्पर्शे बौधायनः
चाण्डालदर्शने ज्योतिषां दर्शनं संभाषणे ब्राह्मणसंभाषणं उच्छिष्टस्पर्शे त्वेकरात्रमुपवासः संभाषणे द्विरात्रं सहगमने
सचैलस्नानमिति चाण्डालदर्शने स्यात् उच्छिष्टस्य उच्छिष्टदर्शनेति उच्छिष्टस्य चाण्डालदर्शने इत्यर्थः एवमन्येऽपि उच्छिष्टस्य पला-
ण्ड्वादिस्पर्शे बृहस्पतिः सुरापलाण्डुलशुनस्पर्शे कामकृते द्विजः अहं पिबेत् कुशजलं सावित्रीं च जपेत्तथा इदमूर्ध्वोच्छिष्टस्येति स्मृल-
पाणिः यत्तु स एव पलाण्डुलशुनस्पर्शे स्नात्वानन्तं समाचरेत् कृताकृतं त्वहोरात्रं उच्छिष्टोऽर्द्धं समाचरेदिति तदयोच्छिष्टवि-
षयं ऊर्ध्वोच्छिष्टे त्वकामविषयं वा अथोच्छिष्टस्य नीलीवस्त्रपरिधाने भविष्यपुराणे स्नानं च्चेति महाबीद्री नीलवस्त्रस्य धा-
रणात् वासमो गणस्याङ्गलगदत्तो ममहासुरः पालना विक्रयाच्चैव तद्वृत्तेरुपजीवनात् पतितस्तु भवेद्विप्रस्त्रिभिर्वर्षै-
र्विशुध्यति नीलीरक्तेन वस्त्रेण यत्कर्म कुरुते द्विजः स्नानं दानं तपो होमः स्वाध्यायः पितृतर्पणं वृथा तस्य महायज्ञा नीलीव-
स्त्रस्य धारणात् नीलीवर्णं यदा रक्तं कश्चिद्विप्रस्तु धारयेत् अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति रोमकूपे यदा गच्छेद्रसो नीली।
स्यात्कः कश्चित् त्रिवर्णैश्चरेत् सामान्यतप्तकृच्छ्रं विशोधनं नीलीदारु यदा भिन्द्याद्ब्राह्मणस्य शरीरतः शोणितं दृश्यते यत्र द्विजश्चा-
न्द्रायणं चरेत् इदमज्ञाने ज्ञाने तु द्विगुणं अस्यापवादः नीलीमनुष्ठातावायस्तम्बः स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यतीति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवमेव केशान्निर्मितवस्त्रधारणे चोपवासः पंचगव्यं हन्तेद्रिरण्योदकं चाधिकमिति स्मृत्यर्थसारे अथ रुद्रनिर्माल्यस्पर्शे
कालिकापुराणे स्पृष्ट्वा रुद्रस्य निर्माल्यं सवासा आप्लुतः शुचिः अथ रजस्वलाया अस्पृश्यस्पर्शे तत्र रजस्वलयोः सपत्न्योरेक
गोत्रयोः स्पर्शे वसिष्ठः स्पृष्टे रजस्वले न्योन्यं समोत्रे त्वेकभर्तृके कामादकामतो वापि सद्यः स्नानेन शुध्यतः असपत्न्योस्तु
सवर्णयोः स्पर्शे मार्कण्डेयः उदक्या तु सवर्णा या स्पृष्ट्वा चेत्स्याद्रजस्वला तस्मिन्नेवाहनि स्नाता शुद्धिमाप्नोत्यसंशयं इदं चाका
मतः कामतस्तु काश्यपः रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि एकरात्रं निराहारा पंचगव्येन शुध्यतीति यत्तु पराशरः
स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी ब्राह्मणी तथा तावत्तिष्ठेन्निराहारा त्रिरात्रेणैव शुध्यतीति तत्कामतोभ्यासे सहशयनादिचिर
स्पर्शे वा असवर्णास्पर्शे तु उशनाः स्पृष्ट्वा रजस्वला तु संस्पृष्टा राजन्या ब्राह्मणी च या कृच्छ्रेण विशुद्धिः स्याद्राज्ञस्य चरणं यथा र
जस्वला तु संस्पृष्टा वैश्यया ब्राह्मणी च या पंचरात्रं निराहारा पंचगव्येन शुध्यति रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी च या
षड्रात्रेण विशुद्धिः स्याद्ब्राह्मण्याः कामकारतः अज्ञानतस्त्वरेदेवं ब्राह्मणी सर्वजातिषु अत्र यथा ब्राह्मण्योः रजस्वलयोः स्पर्शे
उपवासः पंचगव्याशनं च तथान्यासामपि सवर्णरजस्वलास्पर्शेन देव यथा ब्राह्मण्या क्षत्रियास्पर्शे त्रिरात्रं तथा क्षत्रियाया
वैश्यास्पर्शे वैश्यायाः शूद्रास्पर्शेपि तद्वत् तथा च भवदेवनिबंधे स्मृतिः रजस्वला तु या नारी अन्योन्यमुदकं स्पृशेत् सवर्णे पंचग
व्येन त्रिरात्रमसवर्णके पंचगव्येन उपवाससहितेनेति भवदेवः तथा शातातपः रजस्वले उभे नार्यौ त्वन्योन्यं स्पृशतो यदि
सवर्णे पंचगव्येन ब्रह्मकूर्चं मतः परमिति यत्तु वृद्धवसिष्ठः स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी शूद्रजातिवा कृच्छ्रेण शुध्यते
पूर्वा शूद्रा दानेन शुध्यतीति स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी वैश्यजातिवा पादहीनं चरेत्पूर्वार्धं कृच्छ्रं पादं तथोत्तरा स्पृष्ट्वा रजस्वला

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

योन्यं ब्राह्मणी क्षत्रिया तथा कृच्छ्रार्द्धं कुर्यात् पूर्वा उत्तरा तु तदर्द्धं जः स्पृष्ट्वा रजस्वलान्योन्यं क्षत्रिया शूद्रजापि वा उपवासैस्त्रिभिः पूर्वा च
होरात्रेणोत्तरा स्पृष्ट्वा रजस्वलान्योन्यं क्षत्रिया वैश्यजापि वा त्रिरात्रात् कृच्छ्रान्ते पूर्वा त्वहोरात्रेणोत्तरा स्पृष्ट्वा रजस्वलान्योन्यं वैश्यशू
द्रा तथैव च त्रिरात्रात् कृच्छ्रान्ते पूर्वा उत्तरा तद्दिनद्वयात् वर्णानामकामतः स्पर्शे शुद्धिरेषा उदाहृतेति एतच्चाकामतोऽभ्यासे दानेन पा
दकृच्छ्रप्रत्याम्नाये पतितचाण्डालादिस्पर्शे बृहस्पतिः उद्ध्व(?)स्पृष्टा स्पृशति पतितान्त्यश्वपाकेन संस्पृष्टा चेद्रजस्वला तान्यहानि व्यतिक्र
म्य प्रायश्चित्तं समाचरेत् प्रथमेऽह्नि त्रिरात्रं स्याद् द्वितीये द्व्यहमेव तु अहोरात्रं तृतीयेऽह्नि चतुर्थे नक्तमेव च षडुपोषिष्टया स्पृष्टा शु
नाव स्नानमाचरेत् तान्यवशिष्टानि दिनानि व्यतिक्रम्य अन्नाद्यकेन नीत्वे सर्वः अत्र सर्वत्र पञ्चगव्यप्राशनमपि कर्त्तव्यमिति भवदे
वः यत्तु बौधायनः रजस्वला तु संस्पृष्टा चाण्डालान्त्यश्ववायसैः तावत्तिष्ठेन्निराहारा यावत्कालेन शुद्ध्यतीति एतदशक्तायाः अकाम
तो यत्तु शातातपः उदक्या सूतिका वापि शवं संस्पृशेद्यदि त्रिरात्रेणैव शुद्ध्येत इति शातातपोऽब्रवीत् तथा चाण्डालैः श्वपचैर्वा
पि ग्राम्यैर्यो स्पृष्टा तु यदि त्रिरात्रोपोषिता भूत्वा पञ्चगव्येन शुद्ध्यति काश्यपः चाण्डालेन तु संस्पृष्टा कदाचित् स्त्री रजस्वला तान्यहा
नि व्यतिक्रम्य प्रायश्चित्तं समाचरेत् त्रिरात्रमुपवासः स्यात् पञ्चगव्येन शोधनं तानि अशक्तव्यतिक्रम्य अजाद्यान्तं करयेदिति त
देतत्प्रथमदिनविषयं शूलपाणिस्तु काश्यपवाक्ये प्रथमादिदिनव्यवस्थानाभिधानात् त्रिरात्रेणैव तिष्ठेदिति शातातपवाक्यात् तथा च काम
विषयमित्याह तत्र बार्हस्पत्ये तु प्रथमादिदिनव्यवस्थान्यपि स्थितत्वात् तद्विषयत्वमेव न्याय्यमिति अथवा सा समर्था यात्विगिराः
चण्डालः श्वपचो वापि यद्या ग्राम्यो स्पृशेद्यदि अफलकृच्छ्रं वर्त्ततयं चगव्येन शुद्ध्यति पञ्चगव्यपानं तत्स्नानानन्तरं कार्यं चण्डालेन
सहैकवृक्षशाखारोहणे पराशरः एकवृक्षसमारूढश्चाण्डालो यदि रजस्वला अहोरात्रोषिता भूत्वा पञ्चगव्येन शुद्ध्यति आदिस्पर्शे

या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विशेषमाह यमः रजस्वला तु संस्पृष्टा शुना जंबुकवायसैः निराहारो भवेत्तावद्यावत्कालेन शुध्यति एतदकामतः कामतस्तु रजस्व
लानुद्दिश्य बृहस्पतिः शुना वोच्छिष्टया स्पृष्टा स्पृष्टा शूद्र माचरेत् अहोरात्रं तत्र जाति परतो नक्तमाचरेत् प्रथमद्वितीयदिने श्वा
दिस्पर्शे त्र्यहं परतस्तु तृतीये ऽप्यतीत्य तावदहानि यावति क्रमेण भोज्यं यत्तु बौधायनः रजस्वला तु संस्पृष्टा ग्राम्यकुक्कुटसूकरैः श्वभिः
स्नात्वा पिबेत्तावद्यावच्चन्द्रस्य दर्शनमिति चन्द्रदर्शनं नक्तमित्यर्थः एतदपि त्वकामतः चतुर्थदिनविषयं वा रजकादिस्पर्शे तु स्पर्श
समानमेव तयोः समानत्वादिति शूलपाणिः यत्तु प्रचेताः रजस्वला तु संस्पृष्टा शुना चंडालराससभैः पंचरात्रं निराहारा पंच
गव्येन शुध्यतीति तत्कामतो भ्यासे भोजनकाले चांत्यजादिस्पर्शे तु बौधायनः रजस्वला तु चांडालान्त्यजादिस्पृशेद्यदि गोमू
त्रयावकाहारा षड्रात्रेण विशुध्यति अपात्रे कांचनं दद्याद् द्विजेभ्यो वापि भोजनमिति उच्छिष्टयोः परस्परं स्पर्शे त्वत्रिः उच्छिष्टोच्छिष्टसंस्
ष्टा कदाचित्स्त्री रजस्वला कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानेनोपोषिते तेति अत्र पूर्वा शब्देन ब्राह्मणक्षत्रियवैश्यस्त्रियोऽभिधीयंते ते
न रजस्वलयोः समानजातीययोरुच्छिष्टयोः ब्राह्मणक्षत्रियवैश्यानां परस्परस्पर्शे प्राजापत्यः स्वस्थानत्यस्पर्शे त्वेके कृच्छ्रवृद्धि
रूहनीया तादृशशूद्रयोः स्पर्शे परस्परं तत्पर्यवासमन्वितप्राजापत्यमात्रप्रायश्चित्तेन शुद्धिः एतच्चकामतः अकामतस्तु दृश्यशूल
पाणिस्तु उच्छिष्टेन तु संस्पृष्टा कदाचित्स्त्री रजस्वला कृच्छ्रेण तु विशुद्धो न शूद्रा दानेन शुध्यतीति पपाठ तत्रोच्छिष्टेन चांडालादिना
दानेन कृच्छ्रप्रत्याम्नायेन एषु रजस्वलात्वमेव निमित्तम् तो न हि रिपुश्चैषएयो ब्रीहल्पादिभ्यो विशेष इत्याह उच्छिष्टद्विजसंस्पर्शे तु
मार्कंडेयः द्विजान्कथंचिदुच्छिष्टान् रजः स्त्रीयादि संस्पृशेत् अधोच्छिष्टे त्वहोरात्रमूर्ध्वोच्छिष्टे त्र्यहं क्षिपेदिति अत्र यद्यपि विशेषः श्रूय
ते तथापि ब्राह्मणस्य तथा उच्छिष्टक्षत्रियादिस्पर्शे ब्राह्मण्याः प्रायश्चित्तं कल्प्यं एवं हीनाया अधिके च नमस्पर्शे न तु भोजनकाले रज

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वलांतरं स्पृष्ट्वा पुनर्भोजनेनापस्तंबः उदक्या यदि वंशे केशे दृष्टा स्यात्तु रजस्वला आस्नानकालं नाश्नीयात् कृच्छ्रं कृत्वा ततः पिबेत् पत
च्च कामतः चांडालदर्शने त्वत्रिः रजस्वला तु संजाता चांडालं यदि पश्यति उपवासत्रयं कुर्यात् ज्ञात्वा पन्नस्तु कामत इति रजस्व
लायाः श्वादिदर्शने व्यासः रजस्वला यदा स्पृष्टा शुना जंबुकरासभैः पंचरात्रं निराहारा पंचगव्येन शुध्यतीति रजस्वलाया
आशौचिस्पर्शे शातातपः आर्तवाभिप्लुता नारी स्पृष्ट्वा चेत् सूतकं वसेत् तस्या ऊर्ध्वं त्रिरात्रं स्नातां तां त्रिरात्रमुपवासयेत् स्पृष्ट्वा भोजना
दौ त्वत्रिः आर्तवाभिप्लुता नारी सूतकस्थं तकयोः स्पृशेत् अकामाय्लीला चरेत् कृच्छ्रं स्पृष्ट्वा नेत्रमहमेवविति आशौचिस्पर्शे स्नाना
स्नात्प्रजो दर्शने मार्कंडेयः मृतस्य मृतकां स्पर्शं कृतं दृष्ट्वा कथं भवेत् नास्नानं कालमश्नीयात् कृत्वा चांद्रायणं चरेदिति अस्नान
कालपर्यंतं चतुर्थदिनपर्यंतं मदनरत्ने स्मृत्यंतरे अप्राप्ते समुपस्नेमलवद्वाससी यदि अभिषेकेण शुद्धिः स्यादिनत्रयम
भोजनं अभिषेकेण शुद्धिः सद्यः स्नाने न भोजने इदं मरणे या बालास्त्रीविषयं वा अन्यस्यास्तु त्रिरात्रोपवासः बंधुमरण
श्रवणादौ व्यासः मलवद्वाससि नायास्तु अप्राप्ते संभवे यदि अभिषेकेण शुद्धिः स्नानादाने वा दिनत्रयमिति अनापि स्वं वद्धवस्था
दिनत्रयमित्यवशिष्ट कालोपलक्षणं अप्राप्ते बंधुमरणादिना स एव आर्तवाभिप्लुता नारी नावगाहेत् कदाचन इदं तेन
जले नैव मतान्शेषे समापयेत् एकंगांबं भवेदद्भिः सांगोपांगमलेष्टितो नव सपीउनेऊ यांन्ना मघासा भवेत्तु नरीति तथा
पराशरः स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला पात्रांतरितनतो येन स्नानं कृत्वा व्रतं चरेत् सिक्तगात्रा भवेदद्भिः सांगोपांगा क
घंचन नवस्पीउनजयांन्नास्नाना सप्तमभ्यारयेत् इति अयम्पूर्णस्पराम्पर्शे तन्नचेतमदंडादिना व्यवधाने याज्ञवल्क्यः उदक्याशुचि
भिः स्नायात् संस्पृष्टस्तैरुपस्पृशेत् अब्लिंगानि जपेच्चैव गायत्रीं मनसा सकृदिति नेहरकाशुचिसंस्पृष्टा उपस्पृष्टा दामेत र त्यर्थः

113

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ग्राम

114

चेतनव्यवधानेन तु मानवं स्पृष्टं तत्स्पृष्टिनं चैव स्पृष्ट्वान्येन न शुध्यतीति अशुचिरजस्वलादिस्पृष्टिस्पर्शने तु शातातपः अशुचिं संस्पृ
शेद्यस्तु एक एव स दुष्यति तत्स्पृष्टान्यो न दुष्येत सर्वद्रव्येषु यं विधिरिति तथा संहतानां तु पात्राणां यद्येकमुपहन्यते तस्यैव शो
धनं प्रोक्तं न तु तत्स्पृष्टिनामपि क्वचिद्व्यवधाने व्यवधानेपि वचनात्प्रायश्चित्ताधिक्यं यथाह आपस्तम्बः एकशाखां समारूढांश्चण्डा
लादिर्यथा भवेत् ब्राह्मणस्तत्र निवसन् स्नानेन शुचितामियात् आदिशब्दाद् उदक्यादीनां ग्रहणं शाखाग्रहणं शालाग्रहणमपि
पद्युपलक्षणमिति आपस्तम्बोऽप्यत्र यास एव एकवृक्षसमारूढौ चाण्डालब्राह्मणौ यदि फलभक्षयतस्तत्र प्रायश्चित्तं कथं भवेत्
ब्राह्मणो नाम नु उपवासं सवासा जले मा विशेत् अहोरात्रोपितो भूत्वा पंचगव्येन शुध्यतीति तथा स एव एकशाखां समारूढः फ
लान्यश्नात्यसौ यदि प्रायश्चित्तं निराहारं स्यात् पंचगव्यविशोधनमिति अत्र व्यवधाने संनिधाने वा एकरात्रत्रिरात्रे मतिपूर्वं चे
तत्र अमतिपूर्वे तु ब्रह्मपुराणे विप्रश्चण्डालसहितो यत्र कश्चिद्वनस्पतौ अज्ञानान्मुफलं भुंक्ते चरेत्तत्राघमर्षणं अत्रापवाद
माह पराशरः रथ्याकर्दमतोयानि नावः पंथास्तृणानि वा स्पर्शनान्न प्रदुष्येत पक्वेष्टकचितानि च अत्र परंपरास्पर्शेपि स्प
र्शशाह्वे गौणः तत्र च वचनात्प्रायश्चित्ते स्पर्शप्रायश्चित्तापवादमाह बृहस्पतिः तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे
नगरग्रामदाहेषु स्पृष्टास्पृष्टिर्न दुष्यतीति एवमन्यान्यपि उच्चावचनानि व्यवस्थापनीयानि ब्राह्मणस्य चेत्सूतकादिस्प
र्शे पराशरः चेत्सूतकी दीर्घयज्ञकः सोमविक्रयी एतान् स्पृष्ट्वा ब्राह्मणः स्नात्वा सवासा जले मा विशेत् इति तत्र त्रिकादीनां न्य
न कल्पनीयं उक्तस्पर्शास्पर्शप्रायश्चित्तानि अस्पृश्यादिदर्शने तत्र मनुः श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च नराश्वोष्ट्र
वराहैश्च प्राणायामेन शुध्यतीति प्राणायामे विशेषं उक्तं तथा स्नानेन चाह याज्ञवल्क्यः शुचलीवानरखरैर्दष्टश्चोष्ट्रादिवायसैः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राणायामं जले कृत्वा घृतं प्राश्य विशुध्यतीति एतच्च नाभेरधस्तादीषद्दष्टम् यत्र समंतः श्वसृगालखरगजमहिषाजाविश्वस्कर
मनकुलमार्जारमूषिकाश्वकाकशुकमयूरदष्टानां आपोहिष्ठीयाभिः स्नानं प्राणायामत्रयं चेति एतच्च पादयोः किंचिदधिकदेशे
एतत् देवलः विषालिदष्टैः श्वसृगालविड्वराहखरनरवानरवायसमंडूकश्चलीभिर्दष्टः स्रवंतीमासाद्य षट्प्राणायामं कुर्यादिति
एतदपि ततोधिकदेशे नाभेरूर्ध्वदंशे तु बौधायनः शुनादष्टस्तु यो विप्रो नदीं गत्वा समुद्रगां प्राणायामशतं कृत्वा घृतं प्राश्य विशु
ध्यतीति नाभेरधस्तादतिगाढदंशविषयं चैतत् एतस्मिन्नेव विषये देवलः श्वदष्टः सागरगायां नद्यां स्नात्वा नौ निराहारः प्राणायामश
तमावर्त्य पवित्राणां जपन् गतपापो भवतीति नाभेरूर्ध्वं गाढदंशे अत्रैव शांखः नीलकण्ठस्तु नो विप्रः शुनादष्टस्तथैव च त्रिरात्र
व्रतं कुर्यात्तं खलीढस्नानं तत इति यमोपि श्वसृगालसूकरखरैरप्यथ वानरकुक्कुटैः एतैश्च बालको दष्टो हिरण्यः सर्वपस्पर्शो
त् हविर्भोजयेद्ब्राह्मणान् सप्त पंच वेति ब्रह्मचार्यधिकारे हारीतः शुनादष्टस्त्वहमेकाहारः समुद्रगां नदीं गत्वा प्राणायामश
तं कृत्वा घृतं प्राश्य ततः शुचिरेवमेव गोमायुमार्जारनकुलमर्कटैर्दष्टानां ब्रह्मचार्यधिकारे षष्टीनस्तिरपि शुनादष्टस्त्रिरात्र
मुपवासोपि प्रगृह्य वा सद्य यत्र शातातपः गवाश्वं गोदकस्नानं शुनादष्टस्तु ब्राह्मणः समुद्रदर्शनाद्वापि शुनादष्टः शुचिर्भवेत्
वेदविद्याव्रतस्नातः शुनादष्टस्तु वै द्विजः हिरण्योदकमिश्रं च घृतं प्राश्य विशुध्यति तत्राभेरधस्तादीषद्दष्टविषयं वचनाद्दिशि
ष्टब्राह्मणमात्रविषयं वा समुद्रदर्शनं तत्तीरवासिनां व्रतस्थस्य विशेषमाह बौधायनः व्रतस्थस्तु शुनादष्टस्त्रिरात्रमुपवास
येत सघृतं यावकं पीत्वा व्रतशेषं समापयेत् यत्र शातातपः अव्रतः सव्रतो वापि शुनादष्टो भवेद्द्विजः हिरण्योदकमिश्रं तु घृ
तं प्राश्य विशुध्यतीति तदसंभवताशक्तविषयं ब्राह्मणरहितग्रामे तु पराशरः अब्राह्मणके ग्रामे शुनादष्टो द्विजोत्तमः वृषभद

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राय०

116

शिणीकृत्य सद्यः स्नात्वा शुचिर्भवेत् स्त्रीणां विशेषमाह पराशरः ब्राह्मणी तु शुना दष्टा जंबुकेन वृकेण वा उदितं ग्रहनक्षत्रं दृष्ट्वा स
द्यः शुचिर्भवेत् बौधायनोपि ब्राह्मणी तु शुना दष्टा सोमे दृष्टिं निपातयेत् नक्षत्रदर्शनाद्वापि शुना दष्टा शुचिर्भवेत् कृष्णपक्षे यदा सोमो
न दृश्येत कदाचन यां दिशं व्रजते सोमस्तां दिशं त्ववलोकयेदिति अंगिरसा त्वत्र पंचगव्यप्राशनमप्युक्तं ब्राह्मणी तु शुना दष्टा
सोमे दृष्टिं निपातयेत् यदा न दृश्यते सोमः प्रायश्चित्तं कथं भवेत् यां दिशं तु गतः सोमस्तां दिशं चावलोकयेत् सोममार्गेण सा
पूता पंचगव्येन शुध्यतीति ब्राह्मणीग्रहणमुपलक्षणं व्रतस्थस्त्रीविषये पराशरः त्रिरात्रमेवोपवसेच्छुना दष्टा तु सुव्रता
सघृतं यावकं भुक्त्वा व्रतशेषं समापयेत् रजस्वलायां विशेषमाह उशनाः रजस्वला यदा दष्टा शुना जंबुकरासभैः पंचरात्र
निराहारा पंचगव्येन शुध्यति ऊर्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु त्रिगुणं तथा चतुर्गुणं स्मृतं मूर्ध्नि दष्टे न्यत्राशुचिर्भवेदिति अन्यत्र र
जस्वलावस्थायाः इतिशेषः शुना घ्रातावलीढस्य नखैर्विलिखितस्य च अद्भिः प्रक्षालनं प्रोक्तमग्निना
चोपचूलनमिति उपचूलनं तापनं व्रणे कृम्युत्पत्तौ बौधायनः ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे कृमिरुत्पद्यते यस्य
प्रायश्चित्तं कथं भवेत् गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं त्र्यहं स्नात्वा च पीत्वा च कृमिदष्टः शुचिर्भवेत् इति एतच्च नाभे
रधस्तात् ज्ञेयं मनुरपि ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत् गवां मूत्रपुरीषे
ण त्रिसंध्यं स्नानमाचरेत् त्रिरात्रं पंचगव्याशी त्वधो नाभ्या विशुध्यति नाभिकंठांतरोद्भूते व्रणे चोत्पद्यते कृमिः षड्रात्रं तु तदा
प्रोक्तं प्राजापत्यं शिरोव्रणे इति यत्तु शातातपः ब्राह्मणस्य व्रणद्वारे यदा संपद्यते कृमिः प्रायश्चित्तं तदा कार्यमिति शातातपो
ऽब्रवीत् गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं स्नात्वा पीत्वा च हत्वा च कृमिदष्टः शुचिर्भवेदिति तदीषद्व्रणविषयं वर्णभे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नेयथाप्रथमेतिक्रमेक्रांतमेवं संवत्सरमथोनयनं ततउदकोपस्पर्शनंप्रतिग्रहणं संख्याय संवत्सरान्यावंतोनुपनीतास्युः स
प्तभिःपावमानीभिर्यदंतियजुःपवित्रकइत्येताभिर्यजुःपवित्रेणसामपवित्रेणांगिरसेनेत्यपिवाव्याहृतिभिरेववासोध्यायीत
यस्यप्रपितामहादीनांनस्मर्यतेउपनयनंतेश्मशानसंस्तुतास्तेषामभ्यागमनंभोजनंविवाहमिति वर्जयेत्तेषामिच्छतांप्राय
श्चित्तंद्वादशवर्षाणित्रैविद्यकंब्रह्मचर्यंचरेदथोपनयनंततउदकोपस्पर्शनंपावमान्यादिभिरथगृहमेधोपदेशनंताध्यायनंततो
योभिवर्ततेतस्यसंस्कारोयथाप्रथमेतिक्रमेततऊर्ध्वंप्रकृतिवदिति ब्रह्महसंस्तुताःब्रह्महशब्दवाच्याः यथाप्रथमेतिक्रमेक्रांतमे
वंसंवत्सरमिति प्रथमातिक्रमवदृतस्याप्येकंसंवत्सरंस्नेनप्रतिग्रहणमहंब्रह्मचर्यं उपनयनानंतरंयावंतोनुपनीताःपुरुषा
स्तावत्संख्याकवर्षपर्यंत प्रत्यहमेभिर्मंत्रैः प्रायश्चित्तार्थस्नानंकार्यं मंत्रास्तु यदंतियच्चेतिमस्मपावमान्योयेनदेवाःपवित्रेणेति
मंत्रपवित्रंकपानइतिसामपवित्रं हंसःशुचिषदितिगिरसंश्मशानसंस्तुताः श्मशानवन्निरसनीयाः द्वादशाहं ब्रह्मचर्यंका
र्यं उदकोपस्पर्शनंततग्रहणसंख्याहानियावत मंत्राश्चपूर्ववत गृहमेधोगार्हस्थ्यं तेषामध्यापनंनास्तिततऊर्ध्वंप्रकृतिवत्
यथाकालोपनयनमिति इतिव्रात्यता अथग्रहणनयाकरणं तच्चतुर्विधं परद्रव्यग्रहणत्वेनगृहीत्वातस्याप्रदानं तथाजाय
मानोवैब्राह्मणस्त्रिभिरृणवान्जायतेयज्ञेनदेवेभ्यःप्रजयापितृभ्योब्रह्मचर्येणऋषिभ्यइतियजनेनेतित्रयाणांअधिकारे मनुःइष्टिंवै
श्वानरीचैवनिर्वपेदब्दपर्यये क्लृप्तानांपशुयज्ञानांनिष्कृत्यर्थंसदाभवदिति अब्दपर्ययेसंवत्सरांते क्लृप्तानांप्रारब्धानामिति
केचित् नित्यतयाक्लृप्तानामिति तदुक्तं प्राजापतिः समाप्तेसोमयज्ञानांहानौचाग्रायणेचरेत इतितथाचाधिकारोतरेवर्षे
गणनयाकामाकाममयोस्त्रैमासिकंचांद्रायणादीनियोज्यानि अतश्च प्रतिसंवत्सरंसोमःपशुपत्ययनंतथा कर्तव्याग्रयणे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

118

प्राम·

इष्टश्चात्तर्मास्यानि चैव हि एषाम संभवे कुर्यात् दिष्टिं वैश्वानरीं हि जइति याज्ञवल्क्यीयमपि सोमादेर्द्वितीयादिवर्षेष्वनवुष्ठाने वेदि
तव्यं । अयानाहिताग्नितायां तत्र सत्यधिकारे आधानाभावे वेदितव्यम् तमानाहिताग्नेः संवत्सरादूर्ध्वं सामपदियाज्ञवल्क्यीयमु
पपातकसामान्यव्रतं च तदृष्टयं व्रतं च तदृष्टयं वर्णेशासायपेत्तया योज्यं अनापदि तत्रैवमानवं त्रैमासिकं अर्वाक्संवत्सरात्का
म्यानिग्निराह कालेत्वाधायकर्माणि कुर्याद्धि ग्रोविधानतः तदकुर्वंस्त्रिरात्रेण मासि मासि विशुद्ध्यतीति कालस्तत्यधिकारेण लक्षणं
तरायानं स एव अनाहिताग्नेपि नादेवत्समाणः स तोयत्दिसहित्रात्यनुयशुनायज्ञेन त्रिकृयायत यस्माणाधातायष्ठाचे
ति समर्थस्सारे व्रात्येन क्रियमाणो व्रात्येन निमित्तेन वा विहितः पशुरिति वैय्यधिकरण्येनान्वयः अत्र व्रात्योयथाकालानुपनीतो
नुगृह्यते तत्र व्रात्यस्तोमाख्यसोमयागविशेषस्यैव विधानात् किंतु यस्य पिता पितामहो वा सोमं न पिबेत्स व्रात्य इति वा कौको
गृह्यते तस्यैव व्रात्यपशोर्विधानात् तथा च श्रुतिः यस्य पिता पितामहः सोमं न पिबेद्यपिपासेत्स ऐन्द्राग्नं पुनरुत्सृष्टमालभे
तेति ज्येष्ठेविकलांगे सतिकनिष्ठस्याधिकारः कुरु अग्निकांडमंडले न दर्शादिष्टिपौर्णमासेष्टि सोमेन्यामग्निसग्रह अग्निहोत्रं विवाहं
च प्रयोगे त्र्यमेस्थितं न कुर्याज्जनके ज्येष्ठे सोदरे वाप्यकुर्वति सेवना दातरीज्ञानेविद्यमाने पिसोदरे नापिकारविया नोत्तिमित्रा
दर्शपिचौरसेयंयंयपरकवधिरपतितोन्मादइतिगणो अन्यस्तेभ्ल्यिकहृल्लादोयद्वावंटादिदूषणे जनके सोदरे ज्येष्ठे कुर्याद्देवेतरः
क्रियां तयोस्त्वनधिकारित्वात्तस्याधिक्रियाहृतिः ज्येष्ठश्रद्धाविहीने समाप्येयं तदनुज्ञया पितुः सत्यप्यनुज्ञानेनादधीत कथं
चन पितर्यनाहिताग्नावादधीता पृथग् सुतः अग्निहोत्रं च न कुर्यादिति लौगाक्षिकारिकाविदुरिति आवसथ्याधाने पि विशेषमाह
कात्यायनः क्षतदारोग्ने ज्येष्ठोयोनादधात्उपासनं चांद्रायणं चरेद्वर्षं प्रतिमासमहोपिबेदिति ज्येष्ठग्रहणात्तस्मिन्नकृताव

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ट्टेन प्रायश्चित्तविशेष उक्तः। ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत्। गवां मूत्रपुरीषेण दधि
क्षीरेण सर्पिषा। त्र्यहं स्नात्वा च पीत्वा च कृमिदष्टः शुचिर्भवेत्। क्षत्रियोपि सुवर्णस्य पंच माषान् प्रदापयेत्। गोदक्षिणां तु वैश्यस्याप्यु
पवासं विनिर्दिशेत्। शूद्राणां नोपवासः स्यात् शूद्रो दानेन शुध्यतीति। स्नानं पानं च त्र्यहं च गव्यैर्नैव दानं गोदानं। एतदपि नाभेरधस्ताज्ज्ञेयं
नाभेरुपरि विशेष उक्तो भविष्यत्पुराणे। ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे कृमिरुत्पद्यते यस्य निष्कृतिस्तस्य वच्मि ते। गवां मूत्र
पुरीषेण त्रिसंध्यं स्नानमाचरेत्। दधिक्षीरं घृतं प्राश्य त्रिरात्रेणाविशुध्यति। अधो नाभेः प्ररूढस्य प्रायपादादिनतात्मज एतद्विनिर्दि
शेत्। ऊर्ध्वं तु प्रायश्चित्तं कथं भवेत्। नाभिकंठांतरे वीर यदा चोत्पद्यते कृमिः। षड्रात्रं तु तदा प्रोक्तं प्रायश्चित्तं मनीषिभिरिति संसर्गप्रायश्चि
त्तं। अथोपपातकेषु प्रायश्चित्तानि तान्याह याज्ञवल्क्यः। गोवधो व्रात्यता स्तेयम् ऋणानां चानपक्रिया। अनाहिताग्निता पण्यविक्रयः परि
वेदनं। भृतादध्ययनादानं भृतकाध्यापनं तथा। पारदार्यं पारिवित्त्यं वार्धुष्यं लवणक्रिया। स्त्रीशूद्रविट्क्षत्रवधो निंदितार्थोपजीव
नं। नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः। धान्यकुप्यपशुस्तेयमयाज्यानां च याजनं। पितृमातृसुतत्यागस्तडागारामविक्रयः।
कन्यासंदूषणं चैव परिविंदकयाजनं। कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनं। आत्मनोर्थे क्रियारंभो मद्यपस्त्रीनिषेवणं। स्वाध्याया
ग्निसुतत्यागो बांधवत्याग एव च। इंधनार्थं द्रुमच्छेदः स्त्रीहिंसौषधिजीवनं। हिंस्रयंत्रविधानं च व्यसनान्यात्मविक्रयः। शूद्रप्रेष्यं ही
नसख्यं हीनयोनिनिषेवणं। तथैवानाश्रमे वासः परान्नपरिपुष्टता। असच्छास्त्राधिगमनमाकरेष्वधिकारिता। भार्याया विक्रय
श्चैषामेकैकमुपपातकमिति। तत्र गोवधे उक्तं व्रतप्रायश्चित्तप्रसंगेन। तत्र सान्त्वमानवानि त्रैमासिकादीनि याज्ञवल्क्यानि
वा चांद्रायणादीनि च वक्ष्यमाणेषु व्रात्यतादिष्वपि विशेषविहितैः प्रायश्चित्तैः सह तुल्यविकल्पतया अवस्थया यावा योज्यानि न

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चविशेषविहितैः सामान्यविहितानां बाधः उपपातकसंज्ञानर्थकापत्तेः सामान्यप्रायश्चित्तस्य हि सैव कि सार्थवत्ता नान्यथा प्रयो
जनांतराभावात् अतएव याज्ञवल्क्यः उपपातकशुद्धिः स्यादेवं चांद्रायणेन वा पयसा वापि मासेन पाराकेणाथवा पुनरिति मनु
श्च एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः अवकीर्णिवर्जं शुद्ध्यर्थं चांद्रायणमथापि वेति एतदेव त्रैमासिकं अवकीर्णिपर्युदा
सादेवोक्तं उक्तप्रायश्चित्तेषु तत्प्रासंगिकमाह अथ व्रात्यतायाः याज्ञवल्क्यः आषोडशाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात् ब्रह्मक्षत्रवि
शां काल औपनायनिकः परः इति अत्र सावित्रीपतितस्य दशवर्षाणि पयश्च सशिखं वपनं कृत्वा व्रतं कुर्यात्समाहितः एकविंशति
रात्रं च पिबेत्प्रसृति यावकं हविष्यं भोजयेच्चैव ब्राह्मणान्सप्त पंच च ततो यावकशुद्धस्य तस्योपनयनं स्मृतमिति आसोमोक्ते आषोडशा
दिसाड मर्यादायां नाभिव्याप्तौ द्वाविंशाच्चतुर्विंशाच्चेत्यत्रापि तदर्थकपरा तु स्मते तेन पंचदशैकविंशति त्रयोविंशतिवर्ष
समाप्त्युत्तरमेव विप्रक्षत्रियविशां क्रमात्कालात्ययमिति याज्ञवल्क्यः अतऊर्ध्वं पतंत्येते सर्वधर्मबहिष्कृताः सावित्रीपतिता व्रात्या
व्रात्यस्तोमादृते क्रतोरिति अपरार्कस्तु मनुः येषां द्विजानां सावित्री नानूच्येत यथाविधि तांश्चारयित्वा त्रीन्कृच्छ्रान्यथाविध्युपना
ययेदिति उपनेयाभावे हत व्रात्यता यां तु एवं कृते मेकविंशतिरात्रं उपनेतृसत्वे कामतः पंचदशवर्षातिक्रमे वसिष्ठ आह पति
तसावित्रीक उद्दालकव्रतं चरेत् द्वौ मासौ यावकेन वर्तयेत् मासं पयसार्द्धमासमामिक्षया अष्टरात्रं घृतेन षड्रात्रमयाचितं
त्रिरात्रमब्भक्षोऽहोरात्रमुपवसेदिति यत्वापस्तंबः अतिक्रांते सावित्र्याः कालकृते त्रैविद्यकं ब्रह्मचर्यं चरेदथोपनयनं ततः संवत्स
रमुदकोपस्पर्शी न मथ्याध्याय्यादिति कृते मासाह यं त्रैविद्यकं ब्रह्मवेदत्रयं भैक्ष्याशनगुरुशुश्रूषणादिकं एतदुद्दालकव्रतापाक
स्तस एव यस्य पिता पितामह इत्यनुपनीतौ स्यातां ते ब्रह्महसंस्तुता तेषां गमनं भोजनं विवाहमिति वर्जयेत्तेषामित्यंतो प्रायश्चि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सग्न्याधाने कनिष्ठस्यानधिकारः ज्येष्ठोपि पितर्यकृताग्न्याधाने सति नादध्यात् पितुः सत्यप्यनुज्ञानेत्यस्य स्मार्ताधानेपि सम
त्वविशेषात् तथा ज्येष्ठस्य दृष्टेण कनिष्ठः कृतदारोपि विघ्नदूषयति महारण्यं हि भागगाम गनधिकारित्वान्न प्रायश्चित्तेन पूतइति सिद्धं इद
च प्रायश्चित्तं त्राव सग्न्याधानं दारकाले दोषाय काले प्रेतवागग्रहूयमाविति कात्यायनोक्तकालत्रयातिक्रमद्रष्टव्यं अथ विक्रय
विक्रये प्रायश्चित्तानि शंखलिखितौ नविक्रीणीयादविक्रेयाणि तिलतैलदधिक्षौद्रलवणलाक्षामद्यमांसकृतान्नक्षीरगुडरस
स्म गंधरससोमकुसुमाजिनसोमोदकनीलीविक्रयात्सद्यः पतति ब्राह्मणः इत्युपक्रम्य ममैव तेन तप्तकृच्छ्रमाचरेदिति हारीतः
गुडतिलपुष्पमूलफलपक्वान्नविक्रये सोमायनं लाक्षालवणमधुमांसतैलक्षीरदधिघृतगंधचर्मवाससामन्यतमविक्रये चां
द्रायणं तथा पैष्टिकेशिकेसरिश्मश्रुवेश्माश्मशस्त्रविक्रयेच मत्स्यमांसस्यास्थिदंष्ट्रिंगनखपुंक्लिविक्रये तप्तकृच्छ्रं हिं
गुग्गुलहरितालमनःशिलांजनगैरिकक्षारलवणमणिमुक्ताप्रवालवैदूर्यवेणुक्रयेपुच आरामतडागोदपानपुष्क
रिणीसुकृतविक्रयेविषवर्णस्याष्टमः छायाचलवर्षकालाद्यारोदणासनसंजपन् गायत्र्यांसंवत्सरेण पूतो भवति हीनमा
नोन्मानसंकरव्याजद्रव्यसंकीर्णविक्रयेचेति पराशरः विक्रीय कन्यकां गां च कृच्छ्रं सांतपनं चरेदिति चतुर्विंशतिमते स
राया विक्रये कृत्वा चरेत्सौम्यं च तष्ठ्य लाक्षालवणमांसानां चरेच्चांद्रायणत्रयं मधात्मने तिलसोमानां चरेच्चांद्रायणद्वयं
पयःपायसरूपानां चरेच्चांद्रायणव्रतं दर्भकृष्णाजिनरससैवघृतगुडादिविक्रये सर्वेषां सेतुरूपकाणां पराकं तु समाचरेत्
कदलीनारिकेरं च नारिंगं बीजपूरकं एतेषां पादकृच्छ्रं स्यात् जंबीरादे तथैव च कस्तूरिकादिगंधानां विक्रये कृच्छ्रमाचरेत् क
र्पूरादेस्तथैस्याद् हिंग्वादिविक्रये तिलानां विक्रये कृत्वा प्राजापत्यं समाचरेत् धर्मार्थं कृमिजानां च यत्नार्थविक्रयेपनेयत

१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राय॰

रक्तपीतादिवस्त्राणि कुसुम्भानि तथापि च विक्रये ब्राह्मणस्तेषां गार्ग्यस्य वचनं यथा गोविक्रयं नरः कृत्वा लाभार्थं यन्मोहितः प्राजा
पत्यं प्रकुर्वीत गतानां मे इदं वस्तु ते एवंप्राप्तस्तरणं चकरभाणां च विक्रये पराकं तु प्रकुर्वीत सुतानां हि गुणं चरेत् नारीणां विक्रयं
कृत्वा च रेचान्द्रायणव्रतं द्विगुणं पुरुषस्येव व्रतमाहुर्मनीषिणः चान्द्रायणं प्रकुर्वीत पक्वान्नादेर्विक्रये अन्नानां तु पराकः स्यात् स्मृ
तीनां कृच्छ्रमाचरेत् इतिहासपुराणानां चरेत्सान्तपनं द्विजः रहस्यपंचराज्ञाणां कृच्छ्रमेव समाचरेत् गाथानां नीतिशास्त्राणां
प्राकृतानां तथैव च सर्वासामेव विद्यानां पादकृच्छ्रं समाचरेत् च्यवनः दधिमधुपिष्टसर्पिः पक्वान्नतैलतक्रक्षीररसविषशस्त्र
तिलाश्मनीलीकौशेयवासोलाक्षालवणविक्रये प्राजापत्यं चरेत् शातातपः आममांससुरासोमलाक्षालवणसर्पिषां वि
क्रये सर्वद्रव्याणां द्विजश्चान्द्रायणं चरेत् विष्णुः रक्तवस्त्ररंगरत्नगुडगंधमधुरसोर्णाविक्रयी त्रिरात्रमुपवसेत् प्राणिभूः द्रव्यसो
मविक्रयी तप्तकृच्छ्रं कुर्वीत तं चास्य यज्ञोपनयेत् शंखः धारयित्वा तु लोवक्त्रौ विषमाकारयत्वणिक् सरालवणमधानां कृत्वात्री
रसविक्रयं स्नात्वा याज्ञेव मांसमन्त्यकुर्यादेव महाव्रतं विक्रीतप्राणिनामर्हति रसस्य च तथा चरेदिति महाव्रतं द्वादशाहं भूयो
मासविषयमेतत् पैठीनसिः ब्राह्मणस्य लवणपक्वान्नमधुक्षीरदधिघृतमुदकं सर्वगंधास्तिलारक्तवासो गुडतैलयाम्य
पशूनामेकशफकेशानिश्च सर्वे चारण्याः पशवो विद्या गावः शंखश्चाण्वेति विक्रयणे नैकैकस्मिन्नाजापत्यं चरेदिति स एव
आरामतडागोदपानपुष्करिणीसुकृतसोमविक्रये त्रिषवणस्नायी चतुर्थकालाहारः संवत्सरेण पूतो भवतीति
सुमन्तुः देवर्षिसोमचैत्यानामायतनस्य पोदपानदानात्मनो विक्रये कृच्छ्रत्रयं चरेदिति देवर्षीति प्रतिमाभिप्रायेण भविष्यपुरा
णे गुडं तिलांस्तथा नीलीं केशान्गोमर्शल्यकाः विक्रयी ब्राह्मणो गां च कृच्छ्रं सान्तपनं चरेदिति गोविक्रये निदानार्थं वा स्माह यमः

122

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गवां विक्रयकारी न गविरोमाणि यानि तावद्वर्षसहस्राणि गवां गोष्ठे क्रिमिर्भवेदिति एतानि च लघुगुरुप्रायश्चित्तानि कामा
कामसकृदसकृदभ्यासापेक्षया योजनीयानि इदं च सर्वं प्रायश्चित्तजातं आपदि वैश्यवृत्त्या जीवतो ब्राह्मणस्यैव इतरेषामना
पदि न दोषः वैश्यवृत्त्या तु विक्रेयं ब्राह्मणस्य पयो दधीति नारदोक्तेरिति मिताक्षरायां यत्र च निषेधस्तत्रैव प्रायश्चित्तविध
य अत एव क्वचित् प्रायश्चित्तविधौ ब्राह्मणग्रहणं कृतं स्वल्पपाणिकृत्वा परि शूद्रस्यैव दोषाभावमाह तथा पराशरः लव
णं मधु मद्यं वा दधि तक्रं घृतं पयः न दुष्येच्छूद्रजातीनां कुर्यात्सर्वेषु विक्रयं कालिकापुराणेपि विक्रयं सर्ववस्तूनां कुर्वन्शू
द्रो न दोषभाक् मधु चर्म सुरां लाक्षां त्यक्त्वा मांसं च पंचममिति तत्र आनयोर्वाक्ययोरापद्विषयत्वे प्रमाणाभावात् न च निषे
धनामापदि ब्राह्मणमात्रविषयत्वात् शूद्रं प्रति प्रसक्त्यनुपपत्तिरिति वाच्यं शूद्रस्य द्विजशुश्रूषेति नियमेनोपायान्तराणां
व्यावर्तितत्वात् अतश्शूद्रस्य नामद्यादि मांसादि च अतिरिक्तानि विक्रेयाणि तन्नियमे वैश्यो न त्वनापदि शूद्रवत्प्रतिप्र
सवाभावात्सर्वाण्येव विक्रेयाणि आपदि तु न दोषः निषेधानां प्रायश्चित्तानां च ब्राह्मणमात्रविषयत्वोक्तेः ब्राह्मणानामेव
त्वापदि वैश्यवृत्त्या जीविनं दोष इति निष्कर्षः इदं तु प्रायश्चित्तजातमप्यल्पविक्रयार्जितधनपरित्यागपूर्वकं कार्यमित्याह
मनुः यत्कर्हिचित्तेनार्जयंति कर्मणा ब्राह्मणा धनं तस्योत्सर्गेण शुद्ध्यंति जप्येन तपसैव चेति अत्र जपतपसोर्विकल्पः उत्सर्ग
स्य तूभयत्र समुच्चय इति मनुः काममुत्पाद्य कृष्यां तु स्वयमेव कृषीवलः विक्रीणीत तिलाञ्शुद्धान्धर्मार्थमचिरस्थितान्
कृष्यादिग्रहणं नियमार्थं तेन क्रीतानां तिलानां विक्रये दोष एव अन्यथा प्रविक्रये भृतकाध्यापकव्यापितयोश्च सर्वोत्त
व्रतानि देशकालवयश्शक्त्यपेक्षया योज्यानि अथाक्रस्य विस्तर आह भृतकाध्यापनं कृत्वा भृतकाध्यापितस्तथा अनुयोगप्रदानेन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ग्रा म॰ मासान्नियतः पिबेदिति ब्राह्मीसुवर्चलामिति शेषः ; अथीयानस्य विप्रादेस्तिरस्कारोऽनुयोग इति मिताक्षरायां सुतानां विक्रये 124
पैठीनसिः सुतविक्रये त्रिषवणस्नायी पयःपायी च त्रैयंकालाहारः संवत्सरेण शुद्धो भवति इदमेकपुत्रस्य कामतो नापदि सुत
विक्रये कृते तप्तकृच्छ्रं चरेदिति शातातपोक्तं आपद्यनेकपुत्रस्याकामतो ज्ञेयं अनेनैवाकामतो देवार्थे सोमश्च त्यागान्नायत्त कृच्छ्रपादः
नदारात्मनो विक्रये कृच्छ्रं देयमिति सोमतवं कामतो नेकपुत्रस्यानापदि कन्यापुत्रादिविक्रये तु चतुर्विंशतिमते नार्यणवि
क्रयं कृत्वा चरेच्चान्द्रायणव्रतं द्विगुणं पुरुषस्यैव व्रतमाहुर्मनीषिण इति आपद्यकामतः कन्याविक्रये तु विक्रीय कन्यकां
गां च कृच्छ्रं सांतपनं चरेदिति हृद्यपराशरोक्तं इत्यपत्यविक्रये अथायाज्ययाजने मनुः ब्राह्मणानां याजनं कृत्वा परेषामसत्
कर्म च अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति परेषामशूद्रादीनां अंत्यकर्मौर्ध्वदेहिकं वा परेषामसपिंडानां स्वजातीयानामे
वास्मिन् पक्षे आहत्तावेतनमापस्त्रिं अत्र चैकस्यैव कृच्छ्रस्याभ्यासः सप्तव्याख्यातव्यः निवेशिनात् तेन भिन्नास्त्रयः कृच्छ्राः का
म्याः तेच प्राजापत्यसांतपनातिकृच्छ्राख्या इति शूलपाणिः तेषां च गुरुलघुभूतानां विहितं निमित्तगौरवलाघवापेक्षया योज्या अ
हीनो द्विरात्रादिद्वादशाहपर्यंतोहर्गणयागः एतच्च कामतउपपातकसामान्यप्रायश्चित्तप्राप्तवादार्थं ब्राह्मस्य कामतो याज
नेतु शातातपः पतितसावित्रीकाश्चोपनयेन्नाध्यापयेन्न याजयेद्य एतानुपयेद्वा सउद्दालकव्रतं चरेदिति उद्दालकव्रतं तु आपस्तम्बप्रा
यश्चित्ते उक्तं यत्तु पैठीनसिः शूद्रयाजकः सर्वद्रव्यत्यागात्पूतो भवति प्राणायामसहस्रेषु दशाहात्तोभ्यस्तेष्विति तदकाम
तोभ्यासविषयं अनेनैवकामतोभ्यासे तु शूद्रयाजकादीन् विहिता उशनानाऽऽह एते पंच तपसा वकाश जलशयनानुति ८०
ष्ठेयुः क्रमेण ग्रीष्मवर्षाहेमंतेषु मासं गोमूत्रयावकमश्नीयुरिति यत्तु यमः शूरोपश्रुद्रवर्णस्य ब्राह्मणेन यः प्रवर्तते सोभार

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्यापविशुद्धय इति इत्यग्नित्यागो कौमारदारत्यागे न विशेषमाह शातातपः कौमारदारत्यागात्संप्रयोभर्तुः शुध्यति इदं
चाल्पकालत्यागे बहुकालत्यागे तु कौमारदारत्यागे प्रकाममाह हारीतः पंचतपा अभ्रावकाशजलशायनान्यं वृत्तिरेतद्वर्षीय
वर्षा हैमन्तेषु मासं गोमूत्रयावकमश्नीयादिति अथ वृक्षच्छेदे मनुः फलदानां च वृक्षाणां छेदने जप्यमृक्शतं गुल्मवल्लील
तानां च पुष्पितानां च वीरुधां यत्तु यमः वृक्षलतागुल्मतृणच्छेदे वृद्धवृक्षफलवतां प्राजापत्यमिति प्रायश्चित्तविवेके पुरा
णैंच वृक्षगुल्मलतावीरुच्छेदने वृद्धवृक्षक्रमइति पाठक्रमः वृद्धवृक्षच्छेदे दिनसाध्यः प्राजापत्यः यत्तु हारीतः स्थावरसरीसृपादिव
धेयस्येदं प्रायश्चित्तं तथाप्यकृत्वा तिलपात्रं ब्राह्मणाय दद्यादिति तदस्वल्पच्छेदविषयमिति केचित् युक्तं तच्चैत्यश्म
शानादिस्थलजवृक्षाणां कामतः छेदनविषयं तत्रोद्देशगुल्मादिदर्शनात् यथाह याज्ञवल्क्यः चैत्यश्मशानसीमासु पुण्यस्था
ने सुरालये जातद्रुमाणां द्विगुणो दमो विशेषाद्विख्याते गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधां पूर्वस्मृतादर्धदण्डः स्थानेषूक्तेषु कृन्त
नइति गुल्मास्तम्बादयः गुच्छाः कुरण्टकादयः क्षुपाः करवीरादयः लताद्राक्षाद्याः प्रतानाः सारिवाद्याः औषध्यः शाल्याद्याः वीरुधा
गुडूच्याद्या इति विज्ञानेश्वरः यस्त्वेदमिति मन्त्रस्तैत्तिरीये पुरुषं प्राप्तं निमित्तपदे जन्ततियस्मृता जननमानं च केवलं हैतोस्मत्रिं नापि
तो जैव हविर्मिस्सनो मुंचत्व हस इति यत्तु संवत्सरं व्रतं कुर्यात् छित्वा वृक्षं फलप्रदमिति शौनकोक्तं तन्महाफलप्रदनालिकेरादिवृ
क्षाणां कामतः छेदनं सततान्यासविषयं वृक्षमित्येकवचनं त्वविवक्षितविशेषणत्वादविवक्षितं यत्तु विष्णुपुराणे भिनत्ति वीरु
धो यस्तु वीरुधः संस्थे निशाकरे पत्रं वा यस्ततः स्यैकं ब्रह्महत्यां स विन्दतीति तदर्थवादमात्रं स्मृतिपालितस्यैवमेव इति द्रुमच्छेद
व्यसनेषु बौधायनः अनृतवाक्तस्करो राजभृत्यो वृक्षारोपवृत्तिर्गरदोऽग्निदोऽश्वरथ्यागजारोहणवृत्तीरङ्गोपजीवी घाग

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राय·

णिकाः षण्डोपाध्यायो हृदयली पतिं भौंडिकोनत्तगोपजीवी श्वहतिर्ग्रैत्तजीवी चिकित्सको देवलकः पुरोहितः कितवो मद्यपः कूट
कारकोपपत्यविक्रयी मनुष्यविक्रीता चेति तास्तु चरेत्तत्प्रायतो ब्राह्मणव्यवस्थया सर्वद्रव्यत्यागे न च तत्पर्यंकालाहाराः संवत्सरं त्रि
षवणमनुतिष्ठेत् पुत्रसंततेर्देवपितृतर्पणं गवाह्निकं चेत्येवं व्यवहार्या इति तदपत्याभ्यासेष्वागणिकोयः षण्णामिनृजीव
ति षण्णाणां तन्चेति न भौंडिकस्तर्यादिरखैनैरात्तः प्रबोधयिता सूहृतिः सेवकः ब्रह्मजीवी मूल्येन वैदिककार्यकर्ता। गवा
ह्निकं गोवधप्रायश्चित्तमुक्तं यदपि बौधायनः अथाशुचिकितरोग्यन्तमभिचारो नाहितये हं ब्रह्महतिः समाहृतस्य भेत्तव
र्षांतस्य च गुरुजलेवासरूर्ध्वं च तप्तौ मासेभ्योयश्रुतमध्यापयतीति तत्रैव निर्देशो नचेति द्वादशमासान्द्वादशार्द्धमासान्द्वाद
शाहान्द्वादशषडहान् द्वादशत्र्यहान् त्र्यहमेकाहं चेति पूर्णसंवत्सरमाह तदप्यत्यंताभ्यासविषयमेव यत्तु स्वल्पसेवायां बौधा
यनः समुद्रयाने ब्राह्मणस्वन्यासापहरणं सर्वापण्येर्व्यवहरणं भूम्यनृतं शूद्रसेवया यश्च शूद्रायामभिजायते तदपत्यं च भ
वति तेषां तन्निर्देशश्चतुर्थकालमितभोजिनः स्युरपोऽभ्युपेयुः सवनानुकल्पं स्थानासनाभ्यां विहरंत एते त्रिभिर्वर्षैस्तदपघ्नंति पा
पमिति तदकुकालस्वल्पसेवाविषयं अथानाश्रमे हारीतः अनाश्रमी संवत्सरं प्राजापत्यकृच्छ्रं चरित्वाश्रममुपेयात् द्वितीये
ति कृच्छ्रे तृतीये कृच्छ्रातिकृच्छ्रमत ऊर्ध्वं चान्द्रायणमिति इति याज्ञवल्क्योक्तोपपातकप्रायश्चित्तानि अथ मनूक्तोपपातकेषु तत्रा
भिचारे मनुः आत्मानं याजनं कृत्वा परेषामात्मकर्म च अभिचारमहीनं च त्रिभिः कृच्छ्रैर्विशुद्ध्यति अहीनो द्विरात्रादिः अहीनो
धार्मिकस्तद्विषयमभिचारमिति सामानाधिकरण्यमिति शूलपाणिः केचित्वेतद्वाक्योक्तकर्मयाजनपरमेवैतत्प्रायश्चित्तं न तत्प
जनइत्याहुः त्रिभिः कृच्छ्रैः प्राजापत्यसांतपनातिकृच्छ्रैरित्यर्थः एतच्च सकृत्करणे अभ्यासे मूलकर्मणि च साधारणप्रायश्चित्तानि

126

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जाति शक्तिगुणं यद्यपि तथापि योग्यानि तत्र ज्ञानाद्भ्यासे प्रतिनिमित्तं नैमित्तिकमावर्त्तते इति न्याये न प्रतिनिमित्तं नैमित्तिकावृत्तौ
प्राप्तायां विशेषमाह विंशतिमते सकृत्तु नेतरयत्नोक्तं विगुणं तद्विमिष्टैः मासमासं वगुणं प्रोक्तं वत्सरं सार्धमासं भवेत् संवत्सरान्
चदशाब्दाद्द्विगुणं भवेत् ततोर्ध्वं प्रकल्प्य स्याज्ज्ञानात्तपश्चचीर्य्यते ज्ञानाद्भ्यासे लोगाहि विशेषमाह अभ्यासे हि गुणं
हि मासा द्वादशकविधीयते ततो मासगुणं वृद्धि यावत्संवत्सरं भवेत् ततः संवत्सरगुणं यावत्प्रायं समाचरेत् अथासत्प्रतिग्रहे
तत्र दुष्टप्रतिग्रहनिषेधः मनुः असत्प्रतिग्रहीतारं लोभेनायाज्ययाजकाः न हो वै जीवते यस्तु संधकारं प्रपद्यते मात्स्ये तस्मा
त्तीर्थे न गृह्णीयात्तीर्थेष्वायतनेषु च निमित्तेषु च सर्वेषु नमप्यत्तो भवेद्द्विजः मनुः हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान् घृतं अ
विद्वान् प्रतिगृह्णाणो भस्मी भवति दारुवत् अत्र मंत्रायादि दुष्टप्रतिग्रहे तिग्रहीनि विहिते नन्हिरण्यादीनां कृष्णानि काद्दिवत्प्रतिग्र
यं वस्कोटे अनिनंस्तपशायां च मेषी चौभयतोमुखी कुरुक्षेत्रे च गृह्णानो न भूयः पुरुषो भवेत् पाद्मे महादानानि ये विप्रा गृह्णन्ति
तानर्दुर्वता हुताशने हिज न्युपेण नापश्यते ब्रह्मराक्षसाः अयं च निषेध एकस्यैव नानेकेषां तथा च वह्निपुराणे महादानमिदं यस्मादेकोऽति
नार्हति वसिष्ठः शास्त्रविद्यं वा प्रतिग्राह्याणि ब्राह्मणस्य पाद्मे अशोउ भूमिदानं च ग्राह्यं नैकेनैव भवेत् गृह्णन्दोषमवाप्नोति ब्रह्मह
स्यान्न संशयः भूमिदानं षोडश महादानानां तर्गतकांचनमेदिनीदानमिति धर्मप्रकाशे हेमाद्रौ आपस्तंबः प्रतिगृह्णीयाद्भूतः सर्वं सपुनः
सदाः अश्वं च मणिमातंगतिलं लोहानि वर्जयेत् कृष्णाजिनं तिलग्राही न भूयः पुरुषो भवेत् शय्यालंकारवस्त्राणि प्रतिगृह्य समत
स च नरकान्नृनिवर्त्ततयेद्धिरिति समर्थी तथा वह्निपुराणे कृष्णाम्बरयानानि नश्याच्चासनानि च कृष्णाजिनं च गृह्णाति श्राद्धे पतस्त
गतो द्विजः तथोभयमुखी वीरांसशैलां मेदिनीं द्विजः कुरुक्षेत्रे च यद्दानं चंडालान्पतितास्तथा मासिके चानवश्राद्धे भुंजन्स्नेतत्वमा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राय॰ मुधात् देसाद्रौ स्व संतरे कृत्वाजिनप्रतिग्राही विक्रयी चैव रेतसः गजच्छायाश्रितो भुक्त्वा न भूयः पुरुषो भवेत् पाद्मे न तीर्थे प्रतिग्र-
हीयात् प्राणैः कंठगतैरपि अपि कामातुरो जंतुरेकाकी त्यजति मातरं तीर्थे प्रतिग्रहो यस्तु तीर्थे विक्रय एव सः विक्रीतायां तु गंगायां
विक्रीतः स्याज्जनार्दनः जनार्दने तु विक्रीते विक्रीतं भुवनत्रयं यस्तु लोभाद्द्विजः तेन प्रतिग्रहरुचिर्भवेत् नैव तस्य परो लोको
नायं लोको दुरात्मनः ब्राह्मे प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयं तत्र नारायणः स्वामी नान्यः स्वामी कदाचन तत्र न प्रतिग्र-
हीयात् प्राणैः कंठगतैरपि दानधर्मे आकम्पकं च तु दंष्ट्रायावदाक्रयते न तं तावद्गर्भं विजानीयात् तदूर्ध्वं तीरमुच्यते ब्राह्मे सार्द्धहस्त-
शतं यावद्गर्भं तत्तीरमुच्यते स्कांदे तीराद्गव्यूतिमात्रं तु परतः क्षेत्रमुच्यते अत्र दानं जपो होमो गंगायां नात्र संशयः तटयोः प्र-
त्येकं क्रोशद्वयं गव्यूतिमात्रं गंगायास्तेन मन्यत्र न यावत्तावत्तु भौमे नेति धर्मप्रकाशे याज्ञवल्क्यः विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्र-
तिग्रहः गृह्णन्प्रदातारमधो नयत्यात्मानमेव चेति एते चानिषेधा अनेकविधाः कालदेशद्रव्यकर्तृदात्रादिभेदात् तत्र कालत उप-
रागादौ देशतः कुरुक्षेत्रादौ द्रव्यतो कर्तृतस्तु विद्यातपोहीनस्य दातृतस्तु हेयाज्जातितः कर्मतश्च तथा चंडालादेः पतितादेश्च प्राय-
श्चित्तमाह योगीश्वरः गोष्ठे वसन्ब्रह्मचारी मासमेकं पयोव्रतः गायत्रीजप्यनिरतः शुद्ध्यते सत्प्रतिग्रहात् मनुः जपित्वा त्रीणि सा-
वित्र्याः सहस्राणि समाहितः मासं गोष्ठे पयः पीत्वा मुच्यते सत्प्रतिग्रहात् मासमित्यंतसंयोगवाचिन्या द्वितीयया त्रिसहस्रज-
पस्य प्रतिदिनव्यापित्वं गम्यते इदं च गुरुत्वान्निमित्तद्वयसमुच्चये [illegible] पवित्रेष्या विष्णुक्रांति सर्वे चोराप्रतिग्रहाः
ऐंद्वेन मृगारेष्या कराचितिर्मित्रविंदया रेवत्यालक्षजपेनैव शुद्ध्यंते दुःप्रतिग्रहाः इति तु देशकालकर्तृद्रव्याणामन्यतरदुष्टेष
ज्ञेयं अनयैवाभिप्रायेण निबन्धः संनिपाते प्रायश्चित्तगौरवं कल्प्यं सर्वत्र गायत्रीलक्षत्रयो वेति केचित् षडब्दं पान्यमते भिक्षामात्रेण गृहीते

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

णावकाशोग्नौ तिष्ठति पाठक राज्ञम भोजनमिति तदनु द्विसर्वकं सहकृत्वा वर्णे निमाकरणे सामान्यप्रायश्चित्तं मनुराह वेदोदि
तानां नित्यानां कर्मणां समतिक्रमेति स्नातकव्रतलोपे च प्रायश्चित्तमभोजनमिति नित्ययज्ञाद्यकरणे तु आचारमाधवीये प्राजाप
ति दर्शं च पूर्णमासं च लंघयित्वा यो भवेम वक्त्र एकलिङ्गाकृपादेन द्वयोरन्तर्गते धनं हविर्यज्ञेषु शाकस्थालीपाकमध्येक मादितः प्रा
जापत्येन सद्योत पाकसंस्था सु चैव हि संध्योपासन हानौ नित्यस्नानं तु लोपे च होमे च नैत्यके शुद्धो द्रायण्या एव तद्दे स्वकृत
सोमान्ते सोमयज्ञानां हानौ चान्द्रायणं चरेत् अकृत्वा व्रतमेवं तु यज्ञानामधिकारतः उपवासेन शुद्धेत पाकसंस्था सु चैव हीति
कात्यायनः पितृयज्ञात्यये चैव वैश्वदेवात्यये पि च अनिष्ठानं वयज्ञेम न वाप्यश्रावणं तथा भोजने पतितान्नस्य च तु वैश्वानरो
भवेत् इति विहितं तदहिरण्यवर्णा [illegible] नितान्तसोमयेते बौधायनः स्वस्य नित्यानि लुप्तानि तथैवागंतुकानि च विपद्यपि न स
स्वर्गं गच्छेत् पतितो नादिमः तस्मात् कंदैः फलैर्मूलैर्मधुना वा रसेन वा नित्यं नित्यानि कुर्वीत न च नित्यानि लोपयेदिति पंचमहाय
ज्ञाकरणे तु बृहस्पतिः अनिवर्त्य महायज्ञान्यो भुंक्ते प्रत्यहं गृही अनातुरः सति धने कृच्छ्रार्द्धेन स शुद्ध्यति एतच्च निर्दिनातिपा
तइति केचित् तथा आदित्याग्निहुतस्थानेन कुर्यात् पर्वणि अतीते न गच्छेद्भार्यां वा सोपि कृच्छ्रार्द्धमाचरेत् विस्तरपि पर्वा
नरिगपर्ववर्जन्म तावगच्छत्स्त्री चिरात्मनुपवसेत् अरतुरजस्नानदिनादारभ्य द्वादशदिनानि यत्र संवृत्तः अतीतेनोपैति यो भार्यां
नियतां व्रतचारिणीं नियमातिक्रमात्तस्य प्राणायामशतं स्मृतमिति तदकामतः एतच्च समानदेशविषयं अतुस्नातां तयोर्भा
र्यास नियोनोपगच्छति घोरायां भ्रूणहत्यायां पितृभिः सह मज्जतीति मिताक्षरावचनात् एतदेव च प्रायश्चित्तं स्त्रिया अपि स्त्र
नौ भर्तुरनुपसर्पणे भवति तस्मात् अपि नारदीये दोषदर्शनात् आहूता यातु वै भर्त्रा नोपयाति स्वरान्विता सोधां ही जायते शुचिर

129

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राय•

शवर्षाणि पंच चेति नास्तनस्त्री त्यादर्द्धं हारीतः वह्नकमंडलं विक्रमस्नातोऽश्रुभोजनं अहोरात्रेण शुद्धः स्याद्दिनजप्ये नचैव हि
अत्रचकारेणाप वासदिनजपयोः समुच्चयः आपस्तंबः इंद्रचापं पलाशाग्निं यद्यन्यस्य प्रदर्शयेत् प्रायश्चित्तमहोरात्रं यत्रदंडस्य
दक्षिणे यत्रसोदंडस्यचंक्रमेण दानं ज्ञातव्यं अंगिराः अनापदि चरेद्यस्तु सिद्धामित्तां गृहे वसन् दशरात्रं पिवेद्गव्यं ग्रामकालेऽग्न्य
हे द्विजइति वज्रकुक्कसं वयिष्ठव्य एकसुपर्णं नौविषमदानेन यमः नयंत्या विषमं दूयात्र याचेनन्न दापयेत् याचको दायको दा
तानवैस्वर्गस्यगामिनः प्राजापत्येन कृच्छ्रेण मुच्यते कर्मणस्ततः सएव नदीसंक्रमहृतस्य कन्याविक्रकरस्य च समेविषमक
न्यश्चनिष्कृतिर्नोपपद्यते ब्राह्मणमपि चेत्तेषां प्रत्यापत्तिं तु मार्गतो भैक्षलब्धेन वान्नेन द्विजश्चांद्रायणं चरेत् संक्रमः उदकावत
रणमार्गः समेविषमकर्त्तासन्नादेशालः एकपंक्त्युपविष्टानां विषमं यः प्रयच्छति यश्च याचतस्तस्यापत्तं कृच्छ्रार्द्धकृच्छ्रेण चतं व
सिष्ठः दंडोत्सर्गे राजैकरात्रमुपवसेत् त्रिरात्रं पुरोहितः कृच्छ्रमदंड्यदंडने पुरोहितस्त्रिरात्रं राजा कृच्छ्रवत्सपावदं ततस्त कृच्छ्रं हा
दशरात्रं च रितो बोहुरेखानामिति उद्घरेखाणां कलितानां दत्तानां नभत्वानां चोद्धरणं कुर्यादिति मिनपर्वः ब्राह्मणस्य क्षत्रियाद्यभिवा
दने हारीतः क्षत्रियाद्यभिवादने रात्रमुपवसेद्वैश्यस्य शूद्रस्याभिवादने त्रिरात्रमुपवास इति समित्युपव्यहस्ताभिवादनेप्ये
वमितिकेचित् तथा श्वपथ्या इडठया डुकोपानद्धा रोपितया दोकिं होथकारस्यश्रान्द्ध्र कृतपदेवहृज्ञा भिरताभिवादने त्रिरात्रमुपवा
सःस्यादन्यत्रनिमंत्रितेनान्यत्रभोजनेपि त्रिरात्रमिति देवादीनामाभिमुख्येनष्ठीवनादौ सुमंतुः देवर्षिगोब्राह्मणाचार्यमात
पितृनरेंद्राणां प्रतिष्ठीवनमाक्रोशने निकृंतदेहेहिरण्यं दद्यादिति दाहो जीवनाविरोधेन मंडपाद्यानुदेवतागारादिमंदं काश्यपः
वापीकूपारामसेतुस्तातडागवप्रदेवतायतनभेदने प्रायश्चित्तं ब्राह्मणेभ्यो निवेषचतमस्त्राज्याहुतीर्जुहुयादिदंविष्णुरिति प्रय

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मामानस्तोक इतिद्वितीयां विष्णोःकर्माणीति तृतीया पादोस्यांतामितिच चतुर्थीयां देवतामुद्दिश्य दयति तस्यै देवतायै ब्राह्मणान्भोज
येदिति एतच्चो लोपपाते महतोपपाते भ्यासंग्राज्ञापत्यादिकं स्मृतीमं देवताचात्मनम्न यीरु नितो ग्नितोचग्राह्या प्रायश्चि
त्तपास्यत्वादन्यत्रतु दंडगौरवदर्शनेन प्रायश्चित्तकल्पं दंडकल्पायश्चित्तं भवतीतिवचनात् तथात्रदंडगौरवमाह कात्यायनः
हरेर्हि यादद्देद्दापि देवानां प्रतिमां यदि तत्कृच्चैवयोर्मिया त्वामुपा त्स्वंसाहस्रं विष्णुरपि क्रमस्य स्वाविक्रेयस्य विक्रयी प्र
तिमाभेदकश्च उत्तमसाहसं दंडनीयः अत्र भेदोदाबादिकमप्याह तः ग्रं वलिखितौ प्रतिमारामक्रूपसंक्रमणध्वजसेतुनिपा
नभंगेषु तत्समुद्धापनं प्रतिसंस्कारोहापानं चेति मनुः संक्रमध्वजयष्टीनां प्रतिमानांच भेदकः प्रतिकुर्याञ्च तत्सर्वं पंचदद्याच्छ
तानिच अत्र च प्रतिमा तारतम्ये तत्रद्वैततारतम्ये नदंडप्रायश्चित्तयोर्व्यवस्थोन्नेया दारिद्र्यादिना भर्तुरतिक्रमे आपस्तंवः भर्तुरक्र
मेकृच्छ्रइति अतिक्रमोदारिद्र्याक्रोधमात्सर्यादिना वमानं तं पर्वणि मैथुने विष्णुपुराणे निंदाश्रवणं चतुर्दश्यष्टमीचैव अ
मावास्याथपूर्णिमा पर्वाण्येतानि राजेन्द्ररविसंक्रांतिरेवच स्त्रीतैलमांससंभोगी पर्वस्वेतेषुयोनरः विण्मूत्रभोजनंनाम
प्रयातिनरकंमृतः मितात्त्तरायां स्मृत्यंतरे अष्टम्यांच चतुर्दश्यां दिवापर्वणि मैथुनं कृत्वा सचैलं स्नात्वा च वारुणीभिश्च मा
र्जयेदिति श्राद्धदिनमैथुनेस्नानकवत लोपेचेत्यनेनोपवास एव वमनेशातातपः विक्रद्देनेद्विजातीनां मित्रभांडेत्वभोजने पं
चगव्येनशुद्धिःस्यादिति शातातपोब्रवीत् मासादिवमनेतुविशेषमाह यमः मस्तुरमाषमांसानि भुक्त्वावा वमतिद्विजः त्रि
रात्रमुपवासोस्य प्रायश्चित्तं विधीयते प्राणायामैः स्त्रिभिःस्नात्वा घृतंप्राश्य विशुध्यति तथायज्ञोपवीतादिनाशेमेखलाद्यं
जिनयज्ञोपवीतावपाते सुमनोवातवतीभिश्च समन्त्रामाष्टोत्तरं स्त्रुवा हुत्वा तथा यार्घंप्रतीपादसहंडैस्त्वभोजनेभुवितिमिनि

ग्राम

क्षेवांते दिवास्वप्नेन स्त्रीदर्शने नग्नस्नाये श्मशानमाक्रम्य हयादीनारुह्य आमिषक्रमे चैतैर्निमित्तैर्जपेदग्ना समिंधने स्वा
वरस्त्री स्पर्शादीनां वयेयद्देव देवहेलनमिति कुर्काडी मिरान्नं कृत्वा यानान्यारोहणे सोमवादीनांप्रतिग्रहे गायत्र्या सहस्रं जपे
दिति मनोज्योतिर्जुषतामिति मनोलिंगाभिरस्त्वमग्ने व्रतपा असीति व्रतलिंगाभिश्च यथार्थंत्रयमनयनोक्तेन विधिना समंत्रकं
प्रतीयात्स्वीयात् अभ्युदितादिस्वरूपमाह यमः सूर्योदयेत्तु यः शेते सस्र्योदित उच्यते अस्तंगते तु यः शेते सूर्ये निम्रुक्त एव
स अभ्युदिते प्रायश्चित्तमाह यमः अनीर्णेऽभ्युदिते वांते स्वप्नकर्मणि भोजने दुःस्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते अत्रे
वकामतो गौतमः सूर्याभ्युदितो ब्रह्मचारी तिष्ठेदहरभुञ्जानोऽभ्यस्तमितो रात्रिं सावित्रीं जपेत अभ्यासे त्वाहतिरूपा गर्भाधा
नादिसंस्कारानिपमेन आश्वलायनः आरभ्याधानमाचौलात्कालेऽतीते तु कर्मणाम् आहृत्याज्यं तु संस्कृत्य कृत्वा कर्मय
याक्रमं एतेष्वेकैकलोपे पादकृच्छ्रं समाचरेत् चूडायास्त्वर्धकृच्छ्रः स्यात् आपदि त्वेवमीरितं अनापदि तु सर्वत्र द्वि
गुणं चरेत् कात्यायनोऽपि लुप्ते कर्मणि सर्वत्र प्रायश्चित्तं विधीयते प्रायश्चित्ते कृते पश्चाल्लुप्तकर्म समाचरेत् त्वं नः सत्वं न इत्याभ्यां इमं मे
वेतयाऽऽत्रूची ऋचैतेषु ततस्वा हाभ्यां तु नमस्त्वाहुतीः कृत्वा एष कल्प एकादश्यां चौले समाचरेत् स्त्रीणाममेवमेव स्याज्जातादया
मंत्रिका क्रियेति गर्भाधानाकरणे एवाश्वलायनः गर्भाधानस्याकरणे तस्यां जातस्तु दुष्यति अक्षता तां गांततो दद्यात् कुर्यात् पुंस्व
नेपतितिरिति सतादौ हृद्धपराशरः विप्रः स्वस्थासनिष्ठीवत्कृत्वाचांतभाषणं वचनं पतितैः कृत्वा दत्ति एणश्रवणं स्पर्शेन् डो
स्त्रणं एशिनोर्क स्पर्ब्रह्मेषावि स्मसंस्मृतिः एतच्च जलाभावे कर्मणि अपटतो वा अत एव हृद्धशातातपः कृत्वा निष्ठीव्यावास
स्त्र परिधाय चमेद्बुधः ऊर्ध्वादाचमनं स्पर्शो गोपृष्ठस्य च दर्शनं यथाविभावतो हो तत्सर्वाभावे ततः परं अविद्यमाने सर्वोक्तेउ

८७

132

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वपुरीषदर्शनादौ यमपराशरौ प्रक्षालितं त्यजेन्मेढ्रे तेन स्पृष्टो दात्मनः शाकुनं हंसाहृतं निरीक्षेत तमामृतिं ब्राह्मणं तथेति यज्ञोपवीतं
विनावांतिमूत्रोत्सर्गादिकरणे तु मदनरत्ने स्मृत्यंतरे विनायज्ञोपवीतेन यच्चुच्छिष्टो भवेद्द्विजः प्रायश्चित्तमहोरात्रं गायत्र्यष्टशतं ज
पः इति व्यवस्था यत्तु नैवपिबतो मेढ्रतश्चैव भुंजतो नुपवीतिनः प्राणायामत्रिकं षट्कं नक्तं चत्रितयं क्रमादिति तत्कामतः यत्तु वृ
द्धपराशरः यज्ञोपवीतेन विना भोजनं कुरुते द्विजः प्रायश्चित्तपुरीषं वा रेतः सेवनमेव वा त्रिरात्रेणोपोषितो विप्रः पादकृच्छ्रेण भूमि
पः अहोरात्रोषितो वैश्यः शुद्धिरेषा सनातनीति तत्कामतोभ्यासे भुक्त्वतो नाचांतस्योच्छिष्टेपि तत्रैव यदोच्छिष्टस्यानाचांतो भुक्तवा
न्शनानंतः सद्यः स्नानं प्रकुर्वीत सोमपाञ्चयतो भवेत् इति पालाशशय्यानाधारोहणे शंखः प्राप्यस्य शायने चैव मासमेनपादुकत
या पालाशस्य द्विजश्रेष्ठस्त्रिरात्रं तु व्रती भवेदिति निषिद्धकाष्ठदंतधावने वृद्धपराशरः पलाशशिंशिपाकाष्ठदंतधावन सत्वरः
दिवाकीर्ति समस्ता वयावक्तां नैव पश्यतीति एतच्च निषिद्धकाष्ठांतराणामप्युपलक्षणं अंतरागमनेपि तत्रैव द्वौविप्रौब्राह्मणा
ग्नीचदंपती तेद्विजो न व्रजेत् अंतरेण यदागच्छेत् कृच्छ्रं सांतपनं चरेत् होमकाले तथा दोहे स्वाध्याये दानसंग्रहे अंतरेण यदागच्छेद्द्विज
श्चांद्रायणं चरेत् यत्तु गिराः दंपत्योर्विप्रयोरग्न्योर्विप्राग्न्योर्गोद्विजातिषु अंतरेयो व गच्छेत्तु द्विजश्चांद्रायणं चरेत् इति तत्काम
तः एतदेव च विप्राग्न्योर्विप्रपिंडानां न गोस्त्रोर्विस्मृतास्यैषोः भ तु व्योमादिकानां च न कुर्यादंतरागतिमिति पराशरोक्तेपि द्रष्टव्या
वृद्धपराशरः पादप्रतापनं कृत्वा कृत्वा चाग्निलंघनम् ऊर्ध्वोच्छिष्टस्त्र्यादेत्वदिनमेकं व्रतं चरेत् स्नात्वकव्रतादिकारेकृतः एतेषामा
चाराणामेकैकस्य व्यभिचारे एकरात्रोपोषणमिति ब्रह्मचारिधर्मलोपे बौधायनः शौचाचमनसंध्यावंदनदर्भभिक्षाग्निकार्यरहि
तम्स्नानदिस्पर्शन कौपीनकटिसूत्र यज्ञोपवीत मेखलादंडाजिनदिवास्वापस्यत्र पारणपादुकाध्यारोहरंगमालाधारणेष्वष्टनात

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राय॰

नुलेपनं जननलक्रीडाहासं नृत्तगीतवाद्यव्यसिद्दलिः पादंडादिसंभाषणं पर्युषितभोजनादि ब्रह्मचारिव्रतलोपजसकलदोष
निर्हारार्थं ब्रह्मचारी कृच्छ्रत्रयं चरेत् महाव्याहृतिहोमं च कुर्यात् प्रथमं विप्रः समस्तव्याहृतिभिश्च ततस्त्र्याज्याहुतीर्जुहुयादग्न
ग्नये च पृथिव्यै च पृथिव्यै च महते च स्वाहा ॐ भुवो वायवे चांतरिक्षाय च महते च स्वाहा ॐ स्वरादित्याय च दिवे च महते च स्वा
हा ॐ भूर्भुवः स्वश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा ॐ पाहि नो अग्न एनसे स्वाहा पाहि नो अग्ने विश्ववेदसे स्वाहा ॐ
यज्ञं पाहि विभावसो स्वाहा ॐ सर्वं पाहि शतक्रतो स्वाहा ॐ पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा पुनर्नः पाह्यंहसः स्वाहा सहर
य्या निवर्तस्वाग्ने पिन्वस्व धारया विश्वप्स्न्या विश्वतस्परि स्वाहा पुनर्व्याहृतिभिर्जुहुयादिति एतदल्पधर्मलोपे वाकृत्स्नप्राय
श्चित्ते विशेषमाह ऋग्विधाने शौनकः तवोथियाजपेतंमंत्रं लक्षं चैवाशिवालये ब्रह्मचारिणो धर्मं च पूर्णं न्यचेत् पूर्णमेव हीति इति
ब्रह्मचारिधर्मलोपप्रायश्चित्तं स्त्रियस्मरणे दृष्टे दर्शने शुचः स्त्रियस्त्वरणे दृष्टदत्वा प्राणपरायणः संवत्सरं व्रतं कु
र्यात् क्लिष्टाहृतं फलप्रदं एतस्य कामतोभ्यासे अन्यत्वहीदियोजेन गृहीतव्रतभंगे वायुपुराणे लोभान्मोहात्प्रमादाद्वा व्रतभं
गो यदा भवेत् उपवासत्रयं कुर्यात् कुर्याद्वा केशमुंडनं प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत् वासिष्ठः स्मृत्युच्चये मिथ्यापापथे
यमः विप्रस्त्वव्यर्यसंयुक्तं कृत्वा तत्पापधर्ममृषा ब्रह्महत्यावकाशेन व्रतेचांद्रायणं चरेत् एतत्त्वपापव्याप्तरस्याप्युपरत्तकं सं
न्यस्तं ये प्रयच्छंति यावज्जीवं हतं नराः सोपि ध्यानेशिलापे स्वैयथैते पापकारिणः इति मार्कंडेयपुराणवाक्यात् यत्रोक्तं यज्ञवानो
कृमिस्तो शानस्य वाक्यात् तत्प्रायश्चित्तं कल्पनीयः ब्राह्मणस्य द्वितीयादिपुत्रस्य पुनर्जन्म प्रचेतां ब्राह्मणस्याप्यकाले पितृमा
तृवृद्धमस्यानंतरेऽग्नेोपनिवेशः तत्र संवत्सरमर्धं चांद्रायणं चरेदिति वैष्णवे हतिजीवनेन तत्र वर्षाभ्यंतरे मासद्विमासा

134

८६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यप्रसंगाद्वा तस्य कृच्छ्रो विशोधनमिति तदकामतो ब्राह्मणविषयं चंडालादिस्त्रीगमनादीनामकामतः पाठेन षट्त्रिंशन्म
ते चंडालश्वपाकाशौचस्पर्शे तिस्रः निपतितो कृच्छ्रमिति यत्तु वसिष्ठः पतितचंडालशवश्वपाकागमने त्रिरात्रं वाग्यता अनश्नंतश्चा
सीरन् सहस्रपरमं वा तदभ्यस्यंतः पूता भवंतीति विज्ञायत इत्यनेनैव गर्हिताध्यापनरूपातकाद्याख्याता दक्षिणात्यायाज्ञस्
ता भवंतीति तद्बुद्धिपूर्वविषयमिति विज्ञानेश्वरः इत्ययाज्ययाजनं चित्तमात्रसंतमनश्चाचार्यभार्यागमस्य कारणपरित्यक्ता
माता पितृ गुरोः स्यपेति मनुवाक्ये यमध्येपाठ तत्र प्रायश्चित्तमाह मनुः गुरुतल्पव्रतं कार्यं शेषेष्वितरेषु वा हविष्यं शाकप
लौनिर्त्यं अपांसुलानां विशोधनमिति प्रतिलोम्येन दैविकं सहेलनमित्यादिभिर्वा करणकः अथ कन्यादूषणे शंखः आह कन्यादूषी
सोमविक्रयी च कृच्छ्रमब्दं चरेयुरिति हारीतोपि कन्यादूषी सामुपक्रम्य प्रेतस्य च तत्पोष्यावकाशं जलशयनायते तिष्ठेद्ग्रीष्मे
वर्षा हेमंते पुनः संगो न यावककमश्नीयादिति मनुस्मृतौ प्रातिलोम्येन कन्यादूषणे वधप्रदूषणे कृच्छ्रं चरेद् गुरुमासांपावधमार्थे
तिवचनात् इति कन्यादूषणे अथाग्निलयागे मनुः अग्निहोत्रपविध्याग्नीन् ब्राह्मणः कामकारतः चांद्रायणं चरेन्मासं वीरहत्यासमं
हि तत् अपविध्य तत्का वीरो यजमानः मासमपविद्धे स्तवयः इदं च कामतः यत्तु हारीतः संवत्सरोत्सन्नेग्निहोत्रे चांद्रायणं कृ
त्वा पुनराधानं दध्यात् द्विवर्षोत्सन्ने सोमायनं चांद्रायणं कुर्यात् त्रिवर्षोत्सन्ने संवत्सरं कृच्छ्रमभ्यस्य पुनराद्ध्यादिति तदकामतो विषयं
शंखस्तु त्रिवर्षोत्सादे गोदानमप्यधिकमाह अग्न्युत्सादी संवत्सरं प्राजापत्यं चरेत् कृच्छ्रं चरेदादिति विस्तरपि वेदाग्न्युत्सादी त्रिष
वणस्नायी पयःशायी संवत्सरं भैक्ष्याचरणं वर्तयेदिति कामतस्त्वेतान्येव स्वस्वविषये द्विगुणानि यत्तु वसिष्ठः योग्नीनपविध्येत्स कृ
च्छ्रं द्वादशरात्रं चरित्वा पुनराधानं कारयेदिति आपस्तंबः मासं हव्यं तैर्यो वह्निं समेदेवं समाचरेत् नास्तिकान्त्कृच्छ्रमेकं तत्कोम

प्रा.म. द्रव्यं ददाति च होमद्रव्यं यावत्कालं होमो न हातव्यस्तावद्धोमपर्यायं तथा भरद्वाजगृह्ये यावत्कालमहोमी स्यात्तावद्द्रव्यमशेष
तः तदानं चैव विप्रेभ्यो यथा होमस्तथैव चेति जातूकर्ण्योपि अतीतकालं जुहुयाद्द्वौ विप्राय वा स्वयं दद्याद्द्रव्यविदे सम्य
क्कृत्वा यानं तु नर्हति इति इदं च होमद्रव्यदानं स्मार्ताग्निः त्यागविषयमिति माधवः उभयत्यागेपि युक्तमिति तत्प्रति
भाति मासचतुष्टयत्यागेन सप्तवर्षं च तुष्टयेन संकृत्वाणं ब्राह्मणानां तु कृत्वा शानं त्यक्तारो ब्रह्मकूर्चं पीत्वा ततः पापात्प्रमुच्यते
षण्मासत्यागे पराकः अत ऊर्ध्वं महत्पर्यन्तं पयोव्रतं यथा होतान्नां षण्मासांस्त्यजन्तेषो वै पराकं तु समाचरेत् ऊर्ध्वं पयोव्र
तं कुर्यान्मासमेकं समाहितः वर्षपर्यन्तमेवाकृत्त्वेनयः शास्त्रवताः मासबद्धाद्ध्वं संवत्सरं यावद्यावत्संवत्सरात्काम्यपापा
तकसामान्यप्रायश्चित्तानि जातिशास्त्रिपुलाहाये त्वया योननीयानि संवत्सरादूर्ध्वं तु मनुक्तं द्वैमासिके त्रैमासिके काला
त्यय महत्वापेक्षया याज्ञे एतानि च सर्वाणि प्रायश्चित्तानि नास्तिक्यादग्नित्यागे यद्वा तु प्रमादात्संजातं तदा भरद्वाजगृह्ये वि
शेष उक्तः प्राणायामशतं सायं त्रिरात्रादुपवासः स्याद्विंशतिरात्रात् अत ऊर्ध्वं माघषष्टिरात्रात्रिरात्रीकपवसेत् अत ऊर्ध्वं
मासं संवत्सरात्प्राजापत्यं चरेत् अत ऊर्ध्वं कालबहुत्वे दोषबहुत्वमिति इदमेव कामतो गृह्याग्नित्यागे इत्यपरार्के अत्रैवावि
षये स्कान्दे कृत्वा स्नानं ततो विप्रः प्रमादाद्यज्ञात्तु पश्ची प्राणायामशतं कुर्यादुपवासमथापि वेति कामतस्त्यागे तत्रैव द्वा
दशाहातिक्रमे त्र्यहमुपवासः मासातिक्रमे द्वादशाहमुपवासः संवत्सरातिक्रमे मासोपवासः पयोभक्षणं वा कूष्माण्डीभि
र्होमः क्रमेणोभयं वेति उपवासासमर्थो मासमयोभक्षणं संवत्सरानंतरमाधिककालाधिकमुभयमिति मदनपारिजा
ते इदमेव चालस्येन यौताग्नित्यागे ज्ञेयमिति तथा स्मृत्यन्तरे आलस्येन यदा वह्निं द्वादशाहे त्यजेत्ततो त्रिरात्रमुपवासं च चरे

13८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मेवच लौकिकं स्त्री त्यागे विशेषमाह योगीश्वरः पतितानामेष एव विधिः स्त्रीणां प्रकीर्त्तितः वासो गृहान्तिके देयमन्नं वासः सरक्षणं
अन्नं जीवनमात्रं तु मलिनं वस्त्रं यत्तु वसिष्ठः चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या पतिघ्नी च विशेषेण जुङ्गितोपगता
चयेति तत्सर्वं व्यवहारादिमात्रं वस्त्राच्छादनादिमात्रार्थं अन्यासां तु पतितानामन्नवस्त्रादि देयमिति विज्ञानेश्वरः जुङ्गितः प्रतिलो
मजः संभाषणे प्रायश्चित्तं मिताक्षरायां अतऊर्ध्वं तेन संभाष्य तिष्ठेदेकरात्रं न यस्त्वविज्ञो महाज्ञानतः एवं तु तान्नेत्रिरात्रमिति त्यागोत्तरम
नुतापादिना प्रायश्चित्तं कृत्वा समापने विशेषमाह मनुः प्रायश्चित्ते तु चरिते पूर्णकुंभमपां नवं तेनैव सार्द्धं प्रास्येयुः स्नात्वा पुण्ये जला
शये गौतमोपि यस्तु प्रायश्चित्तेन शुध्येत् तस्मिन् शुद्धे शातकुंभमयं पात्रं पुण्यतमात् ह्रदात् पूरयित्वा स्रवंतीभ्यो वा जलं तत एनमप उपस्प
र्शयेयुः अथास्मै तत्पात्रं दद्युः तत्संप्रतिगृह्य जपेत् शान्ता द्यौः शान्ता पृथिवी शान्तं शिवमंतरिक्षं यो रोचनस्तमिह गृह्णामीत्येतैर्यजुर्भिः
पावमानीभिस्तरत्समंदीभिः कूष्मांडैश्चाज्येन जुहुयात् हिरण्यं ब्राह्मणाय दद्यात् गां चाचार्याय यस्य तु प्राणांतिकं प्रायश्चित्तं स मृ
तः शुध्येत् एतदेव शान्त्युदकं सर्वेषूपपातकेषु ततः पतितप्रायश्चित्तं नैव कृतवत्सु तथा सर्वकार्येषु क्रयविक्रयादिषु तेन संव्य
वहरेयुरिति उपस्पर्शो गुरावाचमनं कार्येषु उपपातकेष्वभ्यासेन महापापपतोत्पन्नपातित्यापादकेषु अत्र विशेषमाह हारीतः स
त्रिवर्षं यवसमाचारगोप्रदानादिनाः प्रतिगृह्णीयुरथैनं प्रवर्तयेयुरितरथा नैव त्वमिमं प्रतिग्रहं भक्षणं इतरथा भक्षणाभा
वेन संव्यवहार्यः स्पर्शः मिताक्षरायां स्पर्शः सारे च भक्षणाभावे प्रायश्चित्ताहर्तित्वात् वसिष्ठः तथाभिषिक्तस्य प्रत्याहारः सं
ग्रहः सचपुत्रजन्मना व्याख्यातः संग्रहोत्तरं जातकर्मादिना संस्कुर्यादित्यर्थः क्वचित् प्रायश्चित्तोत्तरमपि संव्यवहाराभावमाह
योगीश्वरः शरणागतबालस्त्रीहिंसकान्संविशेत्तु चीर्णव्रतानपि सतः कृतघ्नसहितानिमान् संविशेत् व्यवहरेत् इतिपति

138

प्राय॰

तत्यागविधिः अथ रहस्यप्रायश्चित्तं रहस्यं कर्त्रतिरिक्तेनाज्ञातं अगम्यागमने च द्वयोः कर्तृत्वं व्यासक्तमतस्तत्र तदतिरिक्तेना
ज्ञाते रहस्यत्वं एतेन पापमात्रे कर्त्रीयेनाज्ञाते रहस्यत्वमिति वदंतः प्राच्याः परास्ताः अत्र प्रायश्चित्तमपि रहस्यमेव कुर्यात् तथा च
हारीतः रहस्ये रहस्यं प्रकाशे प्रकाशमिति अत्र पर्षदुपस्थानमपि नास्ति तथा च याज्ञवल्क्यः विख्यातदोषः कुर्वीत पर्षदोनुमतं
व्रतं अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेत् तत्र यद्यनभिज्ञः कर्त्ता तदा अमुकस्मिन् रहस्यपापे किं प्रायश्चित्तमिति व्याजात् शृण
एयात् कुर्यात् तत्र साधारणप्रायश्चित्तानि मनुः एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः अनाविष्कृतपापांस्तु मंत्रैर्होमैश्च शो
धयेत् दानैर्होमैर्जपैर्नित्यं प्राणायामैर्द्विजातयः पातकेभ्यः प्रमुच्यंते वेदाभ्यासान्न संशयः वशिष्ठः जपिनां होमिनां चैव ध्यायि
नां तीर्थसेविनां निवसंति न पापानि ये च स्नाताः शिरोव्रतैः मनुः वेदाभ्यासोन्वहं शक्त्या महायज्ञक्रिया क्षमा नाशयंत्याशु पापानि
महापातकजान्यपि यथैधांस्तेजसा वह्निः प्राप्तं निर्दहति क्षणात् तथा ज्ञानकृतं पापं विप्रो दहति वेदवित् सव्याहृतिकाः सप्रण
वाः प्राणायामास्तु षोडश अपि भ्रूणहनं मासात् पुनंत्यहरहः कृताः भ्रूणहमित्यत्रापि कालांतरादप्ययं मासादित्यन्वेति माधवीये
यमः सहस्रपरमां देवीं शतमध्यां दशावरां गायत्रीं संजपेन्नित्यं महापातकनाशिनीं विरजं द्विगुणं जप्त्वा तदह्नैव विशुध्यति वा
मदेव्यं द्विरावर्त्य तदह्नैव विशुध्यति पौरुषं सूक्तमावर्त्य मुच्यते सर्वकिल्बिषात् हूमं शतगुणं जप्त्वा तदह्नैव वेदमेकगुणं कृत्वा तद
हरैकादशकं जप्त्वा तदह्नैव विशुध्यति चतुर्विंशतिमते पावमानीस्तथा कौत्सं पौरुषं सूक्तमेव च जप्त्वा पापैः प्रमुच्येत सपुत्रम
पुंडरीकं विशालब्राह्मणं रुद्रं शुक्रियोमोचकं तथा वामदेव्यं बृहत्साम जप्त्वा पापैः प्रमुच्यते यज्ञायज्ञीयमादित्यं ज्येष्ठसाम च
राजनं पावक्येयं च सामानि जप्त्वा मुच्येत किल्बिषात् अथर्वशिरसं चैव पुरुषसूक्तं तथैव च नीलरुद्रांस्तथैवेंद्रं जप्त्वा पापैः प्र

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नरःप्राप्नरिष्यतइति संवत्सरंक्रियातिपाते विष्णुपुराणे संवत्सरंक्रियाहानिर्यस्यपुंसःप्रजायते तस्यावलोकनात्सूर्यो निरीक्ष्यः
साधुभिःसदा सचैलस्नानंसचैलंतु शुद्धिहेतुर्महामते पुंसोभवतितस्योक्तानशुद्धिःपापकर्मणइति अत्रचप्रायश्चित्तविशे
षाश्रवणादेकाहातिक्रमेचैकाहमभोजनेनतस्योक्तत्वात्तदनुसारेणवर्षस्याधिकत्वात्तत्रयदिनापचारे तावदुपवासकरणं
शास्त्रेस्तस्यास्तस्यास्त्रायत्वेन बहुपवासैरेकैकप्राजापत्यकल्पनयायोज्यं निमंत्रणंगृहीत्वात्यागेतु यमः केतनंकारयित्वातुयो
तिपातयतिद्विजः ब्रह्महत्यामवाप्नोतिशूद्रयोनौचजायते एतस्मिन्नेवनिमन्त्रणेब्रह्मणोनियतःव्रतः यतिचान्द्रायणंचीर्त्वात
तःपापात्प्रमुच्यतेइति निमंत्रितस्यानाह्नानेप्येतदेव एतच्चकामाभ्यासे अन्यत्रभोजनेतुहारीतः अन्यत्रनिमंत्रितेनान्यत्रभोजन
नेत्रिरात्रमिति अनन्तवृन्दादौ शंखलिखितौ आक्रोशनानृतवादेपकरात्रिरात्रंवोपवासइति कामतोभ्यासेतु असत्यभाष
णंशूद्रसेवनमित्यपात्रीकरणेषु वाचतप्तकृच्छ्रंकृत्वाशुध्यतीति विष्णूक्तेर्ज्ञेयं वधफलकेनतेनव्यसनप्रायश्चित्तप्रसंगेनोप
पातकेषु प्रसंगात् निषिद्धदेशागमने देवलः सिंधुसौराष्ट्रसौवीरान्तथाप्रत्यन्तवासिनः अंगवंगकलिंगांश्चगत्वासंस्कारमर्ह
ति कर्मनाशाजलस्पर्शात्करतोयाविलंघनात् गंडकीबाहुतरणात्पुनःसंस्कारमर्हतीति तीर्थयात्रांविनाचेतत अंगवंगकलिंगां
श्चसौराष्ट्रमगधानपि तीर्थयात्रांविनागत्वापुनःसंस्कारमर्हतीतिस्मरणात् तद्देशवासिनांतुप्रायश्चित्ततारतम्यंकल्पनीयं
व्रणमध्येकृमिपाते गरुडपुराणे जायतेयस्यशिरसिकृमयोविनतासुत हंकृतदाचरेत्प्राज्ञः प्रजुद्येकश्यपपात्मजेति यत
च्यवनः कृमिदर्शनेसांतपनंतथाभोदक्षिणेति युगपदनेकव्रणेषुखरकुम्भन्यायोज्ञेयं अत्रचत्रियादीनांपादपादन्यूनं खरयाना
यारोहणे याज्ञवल्क्यः प्राणायामीजलेस्नात्वाखरयानोष्ट्रयानगः नग्नःस्नात्वाचभुक्त्वाचगत्वाचैवदिवास्त्रियं खरोष्ट्रंक्रयानप्रकरा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राम॰ दिपनवं गृह्णुयानेसमारूढस्त्वेर्यानेचकामतः सवासाजलमाप्लुत्य प्राणायामेनशुध्यतीति मनुर्बृहस्पतिस्मरणात्कामकारवि
षयं अकामतस्तुस्नानमात्रं तत्रैववसिष्ठः उष्ट्रेणखरेणवागत्वानग्नःस्नात्वाभुक्त्वाच प्राणायामंकुर्यादिति सात्रात्खरोष्ट्रयानारोहणे
त्रयमः खरयानमुष्ट्रयानंवायोधिरोहेद्दिजोत्तमः अपोवाप्रविशेन्नग्नःत्रिरात्रंक्षपणंस्मृतमिति दिवामैथुनारोहेत्प्रायश्चित्तमाह
शातवः दिवामैथुनंकृत्वानग्नःस्नात्वानयांमति नग्नापरस्त्रियं दृष्ट्वादिनमेकमभोजनमिति अत्रनग्नस्नानादावेकरात्रत्रिरात्रयोरभ्या
साद्यपेक्षयाव्यवस्था दृष्टव्या अनुदकमूत्रपुरीषकरणेयमम नूतम् अपकृत्योयदानोयं शारीरंयोनसेवते एकाहंक्षपणंकृत्वास
चैलस्नानमाचरेदिति अनापदिदिगुणंपतनञ्चकामतः अत्रैवसंवर्तः अनुदकमूत्रपुरीषकरणेनखकेशकृमिरप्राशनेसद्यःस्नान
हृतकुशाहिरण्योदपानेचेति अत्रयूतादिपानस्यप्रायश्चित्तापत्यावज्ञानतःनिवृत्तिः यद्वाङ्गिराः कृतेमूत्रपुरीषेवायदानेवोदकंभवे
त् स्नात्वालब्धोदकंपश्चात्सचैलस्तुविशुध्यतीति यत्तुशातातपः अनुदकमूत्रपुरीषकरणेसचैलंस्नानंमहाव्याहृतिहोमश्चेति त
दकामतः अत्रैवमनुः विनाद्भिरप्सुवाप्यार्तःशारीरंसमभिसेवतु सचैलोवहिराप्लुत्यगामालभ्यविशुध्यतीति यत्तुसएव आर्त्याम
टमानस्यब्राह्मणस्यविशेषतः प्रणष्टसलिलेदेशेकथंशुद्धिर्विधीयते अपांदृष्टेवविप्रस्तुकुर्याच्चैवसचैलकं गायत्र्यष्टशतंजप्य
स्नानमेतत्समाचरन् देशकालंसमासाद्य अवस्थामात्मनस्तथा धर्मशौचेवतिष्ठतनकुर्याद्वेगधारणं त्रिरात्रंवाप्युपवसेअहंहति
सवर्णीभवेत् तथैवांभसिमग्नस्तुत्रिःपठेदघमर्षणमिति धर्मशौचंशास्त्रीयशौचम् वेगधारणंशास्त्रीयशौचप्रतीक्षयामूत्रपुरी
षोत्सर्गविलंबनंकुर्यादित्यर्थः त्रिरात्रोपवासस्त्वनापदिकामतः अपकामतोमूत्रपुरीषोत्सर्गयोरभ्यासे शंखलिखितौ देतोमूत्रपु
रीषाण्युदकेकृत्वात्रिरात्रोपोषितःइदमापःप्रवहंतिजपेदिति यत्तुसमंतः अप्सुग्रीवामेहतेत्स्तप्रकृच्छ्रमिति तत्कामतोसंतताभ्यासे

140

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA